
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥भारती तिर्थ विद्या प्रा.॥ श्री. रे. शा. घाटेशास्त्री / चिटणीस

६॥१७६

॥श्रीगणेशायनमः॥वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्॥पुमर्थांश्चतुरोदद्याद्विद्यातीर्थमहेश्व

विद्यारण्य रः॥१॥नत्वाश्रीभारतीतीर्थमुनीश्वरौ॥क्रियतेतृप्तिदीपस्यव्याख्यानंगुर्वनुग्रहात्॥२॥तृप्ति

दीपाख्यंप्रकरणंप्रारभमाणःश्रीभारतीतीर्थगुरुस्तस्यश्रुतिव्याख्यानरूपत्वाद्व्याख्येयांश्रुतिमा

दौपठति॥आत्मानंचेदिति॥१॥इदानींचिकीर्षितंविचारंतत्फलंचदर्शयति॥अस्याइति॥अत्र॥

॥आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः॥किमिच्छन्कस्यकामायशरीरमनुसंज्वरेत्॥१॥

॥अस्याःश्रुतेरभिप्रायःसम्यगत्रविचार्यते॥जीवन्मुक्तस्ययातृप्तिःसातेनविशदायते॥२॥

तृप्तिदीपाख्येग्रंथेआत्मानंचेद्विजानीयादित्यादिकायाःश्रुतेरभिप्रायस्तात्पर्यंसम्यग्विचार्यते॥

तेनाभिप्रायविचारेणजीवन्मुक्तस्यश्रुतिसिद्धायातृप्तिःसाविशदायतेस्पष्टीभवति॥२॥

पदच्छेदःपदार्थोक्तिर्विग्रहोवाक्ययोजना॥आक्षेपस्यसमाधानंव्याख्यानंपंचलक्षणमिति

व्याख्यानलक्षणस्योक्तत्वोत्सुकपदस्यार्थमभिधातुंतदुपोद्घातत्वेनसंक्षिप्तंसंक्षेपेणदर्शयति

प्रतिपाद्यमर्थंबुद्धौसंगृह्यतदर्थअर्थांतरवर्णनमुपोद्घातः॥

॥ तृ०

मायाभासेनेति ॥ अत्र मायाशब्देन चिदानंदमयब्रह्मप्रतिबिंबसमन्विता सत्वरजस्तमोगुणात्मिका ज-
गदुपादानभूता प्रकृतिरुच्यते ॥ सा च सत्वस्य शुद्ध्यशुद्धिभ्यां द्विधा भिद्यमाना क्रमेण मायाविद्या च
भवति ॥ तयोर्मायाविद्ययोः प्रतिबिंबितं ब्रह्मचैतन्यमेवेश्वरो जीवश्चेत्युच्यते ॥ तदिदं तत्वविवेकाख्ये
ग्रंथे श्रीमद्विद्यारण्यगुरुभिर्निरूपितं ॥ चिदानंदमयब्रह्मप्रतिबिंबसमन्विता ॥ तमोरजःसत्वगुणा

॥ मायाभासेन जीवेशौ करोतीति श्रुतत्वतः ॥ कल्पितावेव जीवेशौ ताभ्यां सर्वं प्रकल्पितं ॥ २५

॥ [illegible] प्रकृतिर्द्विविधा च सा ॥ सत्वस्य शुद्ध्यशुद्धिभ्यां
मायाविद्ये च ते मते ॥ मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः ॥ अविद्यावशगस्त्वन्यस्तद्वैचि-
त्र्यादनेकधा ॥ सा कारणशरीरं स्यादिति ॥ इममेवार्थं मनसि निधाय जीवेशावाभासेन करोति
माया चाविद्या च स्वयमेव भवतीति श्रुतिरपि प्रवृत्ता ॥ अतो जीवेश्वरयोर्मायाकल्पितत्वं मन्य-
ते सर्वं जगत्ताभ्यामेव कल्पितं ॥ ॥

तत्र केन कियत्कल्पितमित्यत आह ॥ ईक्षणादीति ॥ तदैक्षत बहु स्यां प्रजायेयेति श्रुतमीक्षणमादिर्यस्याः
सेक्षणादिः ॥ अनेन जीवेनात्मनानुप्रविश्येति श्रुतः प्रवेशोऽन्तो यस्याः सा प्रवेशान्ता ॥ ईक्षणादिश्चासौ
प्रवेशान्ता चेति पश्चात्कर्मधारयः ॥ सेयं सृष्टिरीश्वरेण कल्पिता ॥ जागरादिर्यस्य संसारस्यासौ जा-
ग्रदादिः ॥ विमोक्षो मुक्तिरन्तो यस्यासौ विमोक्षान्तः संसारो जीवेन कल्पितस्तदभिमानित्वाज्जीवस्येत्य-

॥ ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता ॥ जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः ॥ [illegible] ॥

र्थः ॥ ते च जाग्रदादयः श्रूयन्ते ॥ स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वं ॥ स्त्र्य-
न्नपानादिविचित्रभोगैः स एव जाग्रत्परितृप्तिमेति ॥ स्वप्नेऽपि जीवः सुखदुःखभोक्ता स्वमाय-
या कल्पितविश्वलोके ॥ सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति ॥ पुनश्च जन्मा-
न्तरकर्मयोगात्स एव जीवः स्वपिति प्रबुद्धः ॥ पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलं वि-
चित्रं ॥ जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते ॥ तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥

॥ मू० २८ ॥
॥ २ ॥

एवं पुरुषशब्दार्थोपयोगिनीं सृष्टिमभिधायेदानीं पुरुषशब्दार्थमाह ॥ भ्रमाधिष्ठानेति ॥ यः कूटस्थासंगचि
द्रूपः विकार्यसंगचिद्रूपः भ्रमाधिष्ठानभूता सा भ्रमस्य देहेन्द्रियाद्यध्यासस्याधिष्ठानभूतोऽधिष्ठानत्वेन
वर्तमानः परमात्मा साक्षी सो संग एवान्योन्याध्यासतः अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चा
ध्यस्येत्याचार्यैर्निरूपितेनान्योन्याध्यासेनासंगधीस्थजीवः स्वेन पारिमार्थिकसंबन्धशून्यायां बुद्धे

॥ भ्रमाधिष्ठानभूतात्मा कूटस्थासंगचिद्वपुः ॥ अन्योन्याध्यासतोऽसंगधीस्थजीवोऽत्र पूरुषः ॥५॥
॥ साधिष्ठानो विमोक्षादौ जीवोऽधिक्रियते न तु ॥ केवलो निरधिष्ठानविभ्रांतेः क्वाप्यसिद्धितः ॥६॥

वर्तमानो जीवः सन्नत्रास्यां श्रुतौ पूरुष इत्युच्यते ॥ स वा अयं पुरुषः सर्वासु पूर्षु पुरिशय इति श्रुतेः सा श्रुत्या
पुरुषशब्दस्य व्युत्पादितत्वात् पुरुषस्यैव पूरुषत्वात् पुरुष एव पूरुषः ॥ बुद्ध्यादिकल्पनाधिष्ठानं कूटस्थचैतन्यं बु
द्धौ प्रतिबिंबितत्वेन प्राप्तजीवभावं पुरुषशब्देनोच्यत इत्यभिप्रायः ॥५॥ नन्वत्र पुरुषशब्देन केवलचिदा
भासरूपो जीव एवोच्यतां किमनेन कूटस्थचैतन्येनाधिष्ठानभूतेनेत्याशंक्य तस्य मोक्षाद्यन्वयित्वं
सिद्ध्येत् तदपि स्वीकर्तव्यमित्याह ॥ साधिष्ठान इति ॥ साधिष्ठानोऽधिष्ठानेन कूटस्थचैतन्येन सहि

तन्यमेर

इदानीं साधिष्ठानस्यैव तस्य संसारादयन्न्यथात्वं श्लोकद्वयेन विभज्य दर्शयति ॥ अधिष्ठानांशेति ॥ जीवो
यदा अधिष्ठानांशसंयुक्तं कूटस्थांशसहितं भ्रमांशं चिदाभासोपेतं शरीरद्वयमवलम्बते ॥ स्वस्वरूपत्वेन स्वी-
करोति तदाहं संसारीत्येवमभिमन्यते ॥ ७ ॥ यदा पुनर्भ्रमांशस्य देहद्वयसहितस्य चिदाभासस्य तिरस्का-
रः स्यात् ज्ञानेनानादरणाद् अधिष्ठानप्रधानता अधिष्ठानस्यैव कूटस्थस्य स्वरूपत्वं जीवेन स्वीक्रि-

॥ अधिष्ठानांशसंयुक्तं भ्रमांशमवलम्बते ॥ यदा तदाहं संसारीत्येवं जीवोऽभिमन्यते ॥ ७ ॥ भ्रमांशस्य
॥ तिरस्काराद् अधिष्ठानप्रधानता ॥ यदा तदा चिदात्माहमसंगोऽस्मीति बुध्यते ॥ ८ ॥ नासंगेऽहंकृ-
॥ तिर्युक्ता कथमस्मीति चेच्छृणु ॥ एको मुख्यो द्वावमुख्यावित्यर्थस्त्रिविधोऽहमः ॥ ९ ॥

क्रियते तदाहं चिदात्मासंगोऽस्मीति बुध्यते मानाति ॥ ८ ॥ नन्वधिष्ठानचैतन्यस्य जीवस्वरूपत्व-
स्वीकारे चिदात्माहमसंगोऽस्मीति बुध्यत इति यदुक्तं तदनुपपन्नं स्यात् असंगचिद्रूपस्य कूटस्थस्याहंप्र-
त्ययविषयत्वाभावादिति शंकते ॥ नासंग इति ॥ असंगे चिदात्मन्यहंविषयेऽहंप्रत्ययो न युज्यते ॥ यु-
क्तौ न कथमस्मीति जानीयान्न कथमुपपत्त्यर्थः ॥ मुख्यया वृत्त्याऽहंप्रत्ययविषयत्वाभावेऽपि लक्षणया

॥ तृदि० ॥

॥ कू॰

त

कीदृशो मुख्योऽर्थ इत्याकांक्षायामाह ॥ अन्योन्येति ॥ कूटस्थचिदाभासयोः स्वरूपं अन्योन्याध्यासेनैक्यं प्रा प्यमहंशब्दस्य वाच्यत्वेन मुख्योऽर्थो भवति ॥ अस्मिन्कुतो मुख्यत्वमत आह ॥ तत्र मूढा इति ॥ यत इदं व्याख्या तारः ॥ तत्र तस्मिन्नविविक्ते कूटस्थचिदाभासयोः स्वरूपे यतो विवेकज्ञानशून्यैः सर्वैरपि अहंश ब्दः प्रयुज्यते अतोऽस्य मुख्यत्वमित्यर्थः ॥ १० ॥ इदानीममुख्यार्थो दर्शयति ॥ पृथगिति ॥ आभासकूट

अन्योन्याध्यासरूपेण कूटस्थाभासयोर्वपुः ॥ एकीभूय भवेन्मुख्यस्तत्र मूढैः प्रयुज्यते ॥ १० ॥ पृथगाभासकूटस्थावमुख्यौ तत्र तत्त्ववित् । पर्यायेण प्रयुङ्क्तेऽहंशब्दं लोके च वैदि

स्थौ प्रत्येकमहंशब्दार्थत्वेन यदा विवक्षितौ तदाऽमुख्यार्थौ भवतः ॥ अनयोरमुख्यत्वे कारणमाह ॥ तत्रेति ॥ अत्रापि यत इदं व्याख्यातारः ॥ तत्त्ववित्तत्र तयोः कूटस्थचिदाभासयोरहंशब्दं लौकिके वैदिके च व्यवहारे पर्यायेण प्रयुङ्क्ते इति योजना ॥ अयं भावः ॥ चिदाभासकूटस्थयोरविविक्तरूपस्य सर्वजनव्य वहारविषयत्वान्मुख्यार्थत्वं विविक्तरूपस्य तु कतिपयदिनैः कदाचिदेव व्यवह्रियमाणत्वादमुख्यार्थ

पर्यायेणेत्युक्तमेवार्थं प्रपंचयति प्रतिपत्तिसौकर्याय श्लोकद्वयेन लौकिके इत्यादिना ॥ बुधो विद्वान् अहं गच्छा-
मीत्यादिके लौकिके व्यवहारे कूटस्थाच्चिदाभासं विविच्यैतमेवाहंशब्देन विवक्षति वक्तुमिच्छति ॥१२॥
अयमेव शास्त्रीयदृष्टितो वेदांतश्रवणजनितज्ञानेन केवले चिदाभासाद्विविक्ते कूटस्थे ऽसंगो-
ऽहं चिदात्माहमिति लक्षणयाहंशब्दं प्रयुंक्ते ॥ अतो लक्षणयाहंशब्दार्थत्वेनाहंप्रत्ययविषयत्वसंभवाद्

॥ लौकिके व्यवहारेऽहं गच्छामीत्यादिके बुधः ॥ विविच्यैव चिदाभासं कूटस्थात्तं विवक्षति ॥१२॥
॥ असंगोऽहं चिदात्माहमिति शास्त्रीयदृष्टितः ॥ अहंशब्दं प्रयुंक्तेयं कूटस्थे केवले बुधः ॥१३॥
॥ ज्ञानिताज्ञानिते त्वात्माभासस्यैव न चात्मनः ॥ तथा च कथमाभासः कूटस्थोऽस्मीति बुध्यता =

संगोऽस्मीति ज्ञानमुपपद्यत इत्यभिप्रायः ॥१३॥ ननु पृथगाभासकूटस्थावहंशब्दस्य मुख्यार्थावित्युक्तं
तयोर्मध्ये कूटस्थः किमज्ञाननिवृत्तये ऽसंगोऽस्मीति जानाति । किं वा चिदाभासः । न तावत्कूटस्थः । त-
स्यासंगचिद्रूपत्वेन ज्ञानित्वाज्ञानित्वयोरनुपपत्तेः तत् चिदाभासस्य ज्ञानित्वादिकं वक्तव्यं तथा सति

॥तृ०॥
॥८॥

तस्य कूटस्थादन्यत्वमेवासिद्धमिति परिहरति॥ नायमिति॥ तत्रोपपत्तिमाह॥ आभासत्वस्येति॥ यथा
दर्पणे प्रतीयमानस्य मुखाभासस्य ग्रीवास्थमुखमेव तत्त्वं तद्वदिति भावः॥१५॥ ननु चिदाभासस्य मिथ्या
त्वे तदाश्रितं कूटस्थोऽस्मीति ज्ञानमपि मिथ्या स्यादिति शंकते॥ कूटस्थ इति॥ कूटस्थस्वरूपातिरिक्तस्य
कृत्स्नस्यापि मिथ्यात्वाभ्युपगमेन मिथ्यात्वमस्माकमिष्टमेवेति परिहरति॥ नेति॥ उक्तमर्थं दृष्टान्तेन स्प

नायं दोषश्चिदाभासः कूटस्थैकस्वभाववान्॥ आभासत्वस्य मिथ्यात्वात्कूटस्थत्वावशेषणात्॥१५॥
कूटस्थोऽस्मीति बोधोऽपि मिथ्या चेन्नेति को वदेत्॥ न हि सत्यतयाभीष्टं रज्जुसर्पविसर्पणं॥१६॥
तादृशेनापि बोधेन संसारो विनिवर्तते॥ यक्षानुरूपो हि बलिरित्याहुर्लौकिका जनाः॥१७॥८९

ष्टयति॥ न हीति॥ रज्ज्वां कल्पितस्य सर्पस्य गत्यादिकमपि प्रतीयमानं वास्तवं नांगीक्रियते यथा तद्वदित्य
र्थः॥१६॥ ज्ञानस्य मिथ्यात्वे तेन संसारनिवृत्तिर्न स्यादित्याशंक्य निवर्त्यस्य संसारस्यापि तथात्वात्तन्नि
वृत्तिरुपपद्यते स्वाप्नव्याघ्रदर्शनेन निद्रानिवृत्तिवदित्यभिप्रायेणाह॥ तादृशेनापीति॥ तत्र यादृशो
यक्षस्तादृशो बलिरिति लौकिकगाथां संवादयति॥ यक्षानुरूपो हीति॥१७॥ ८९ ८९

उपपादितमर्थमुपसंहरति॥ तस्मादिति॥ यस्मात्कूटस्थ एव चिदाभासस्य निजं स्वरूपं तस्मात्पुरुषशब्दवा-
च्यः कूटस्थसहितश्चिदाभासः तं कूटस्थं मिथ्याभूतात्तस्माद्विविच्य लक्षणया कूटस्थोहमस्मीत्येवगंतुं
शक्यते इत्यभिप्रायेण श्रुतिरप्युक्तवतीत्यर्थः॥१८॥ एवं कूटस्थोस्मीति पदद्वयप्रयोगाभिप्रायमभिधायायमि-
तिपदप्रयोगाभिप्रायमाह॥ असंदिग्धेति॥ लौकिकानां प्रसिद्धे देहरूपे आत्मनि संशयविपर्ययरहितो

॥ तस्मादाभासपुरुषः सकूटस्थो विविच्यतां॥ कूटस्थोस्मीति विज्ञातुमर्हतीत्यभ्यधाच्छ्रुतिः॥१८॥
॥ असंदिग्धाविपर्यस्तबोधो देहात्मनीक्ष्यते॥ तद्वदत्रेति निर्णेतुमयमित्यभिधीयते॥ १९॥ देहा-
त्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं॥ आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते॥ २०॥ ५९ ॥

ऽयमस्मीति बोधो यद्वदुपलभ्यते। अत्र प्रत्यगात्मनि विषये तथाविधं ज्ञानं मुक्तिसिद्धये संपाद्यमिति
निर्णेतुमयमित्यभिधीयते श्रुत्येति शेषः॥१९॥ अयं मनुष्य इति देहात्मविषयो दृढप्रत्ययो यथा। एवं
प्रत्यगात्मन्येव देहात्मज्ञानापबाधनेन ब्रह्माहमस्मीति ज्ञानं यस्य जायते स विद्वान्नेच्छन्नपि मो-
क्षेच्छारहितोपि मुच्यते॥ संसारहेतोरज्ञानस्य ज्ञानेन बाधितत्वादिति भावः॥२०॥ ५९ ॥

[illegible] ईदृशस्यैव बोधस्य मोक्षसाधनत्वे आचार्यवाक्यं संवादयति। देहात्मेति ५३

॥ते०॥
॥५॥

अथमितिः॥

अथमितिपदप्रयोगस्याभिप्रायांतरं शंकते॥ यथायं घट इत्यादिप्रयोगेषु इदमा निर्दिष्टस्य

अथमित्यपरोक्षत्वमुच्यते चेत्तदुच्यतां॥ स्वयंप्रकाशं चेतन्यमपरोक्षं सदायत॥२१॥

वस्तुन आपरोक्ष्यं दृष्टं तथायमस्मीत्यत्रापीति भावः॥ तदप्यस्माकमिष्टमेवेत्याह॥ तदुच्यता मिति॥ कुत इत्यत आह॥ स्वयंप्रकाशेति॥ साधनांतरनिरपेक्षतत्तयावभासनं चैतन्यं व्यवच्छायकाभावान्नि

नन्वात्मनः स्वप्रकाशचिद्रूपत्वेन नित्यापरोक्षत्वाभ्युपगमेऽयमिति पदप्रयोगस्याभिप्रायवर्णनांगीकारव
त्वादागतमात्मनः परोक्षविषयत्वमपरोक्षविषयत्वं पूर्वोक्तज्ञानाज्ञानाश्रयविषयत्वं चानुपपन्नमित्या
शंक्य दशमदृष्टान्तेन सर्वमुपपद्यत इत्याह॥ परोक्षमिति॥ परोक्षमपरोक्षं चैवं युगुलं ज्ञानमज्ञानमित्यपरं द्वं त्ये
द्वयं नित्यापरोक्षरूपेऽप्यात्मनि दशमस्येव स्यादित्यर्थः॥२२॥ दृष्टान्तं व्युत्पादयति॥ नवसंख्येति॥ परि

परोक्षमपरोक्षं च ज्ञानमज्ञानमित्यदः॥ नित्यापरोक्षरूपेऽपि द्वयं स्याद्दशमे यथा॥२२॥ नवसंख्या
हृतज्ञानो दशमो विभ्रमात्तदा॥ मत्वा वक्ति तदज्ञानकृतमावरणं विदुः॥२४॥ नद्यां ममार दशम इति शोचन्
प्ररोदिति॥ अज्ञानकृतविक्षेपं रोदनादिं विदुर्बुधाः॥२५॥

गणनीयत्वेन पुरुषनिष्ठया नवसंख्यया परिहृतविवेकज्ञानो दशमस्तदा तान्परिगणनीयान्नवसंख्याकान्वीक्ष
माणोऽपि सम्यक्प्रत्यक्षेण पि भ्रान्त्या गणनाकर्तारं स्वमात्मानं दशमोऽहमस्मीति न वेत्तीत्यर्थः॥ एवं दशमे तानं प्र
दर्श्य तत्कार्यमावरणं दर्शयति न भातीति॥ तदा दशमः स्वं दशमं सन्तं दशमो न भाति नास्तीति मत्वा वक्ति तस्य वक्त
त्वस्य प्रकारणं तदज्ञानकृतमज्ञानकार्यमावरणं विदुर्बुधा इति शेषः॥२४॥ अज्ञानस्यैव कार्यं विशेषं विक्षेपं दर्शयति॥

न वेत्ति दशमोऽस्मीति वीक्षमाणोऽपि तान्नव॥२३॥ न भाति नास्ति दशम इति स्वं दशमं तदा॥

थि

दृशमस्यासत्वांशनिवर्त्तकं परोक्षज्ञानमाह ॥ नमृत इति ॥२६॥ तस्यैवाभानांशनिवर्त्तकमपरोक्षज्ञानं दर्शयति ॥ समे
वेति ॥ स्वेन परिगणितेन नवभिः सह स्वात्मानं गणयन् आत्मानमेव दशमोऽसीति प्रदर्शितो दशमोऽस्मीत्यपरोक्षतया
ज्ञात्वा हर्षं प्राप्नोति रोदनं च जहातीत्येवं दृष्टान्तभूतस्य ग्रामे प्रदर्शितमेव कूटस्थस्य सप्तकमनुघटय्यते के आत्मन्यपि तद्योजनी
यमित्याह ॥ अज्ञानावृतीति ॥ अज्ञानं चावृतिश्च विक्षेपश्च द्विविधज्ञानं च दृष्टिश्च द्वन्द्वसमासः ॥२८॥ मज्ञात्मन्य

न भूतो दशमोऽस्तीति श्रुत्वा नमवचनं नन्दा ॥ परोक्षत्वेन दशमं वेत्ति स्वर्गादिलोकवत् ॥२६॥ समेव दशमोऽसीति गणयित्वा
ता प्रदर्शितः ॥ अपरोक्षतया ज्ञात्वा हृष्यत्येव न रोदिति ॥२७॥ अज्ञानावृतिविक्षेपद्विविधज्ञानतृप्तयः ॥ शो
कापगमश्चेत्येते योजनीयाश्चिदात्मनि ॥२८॥ संसारासक्तचित्तः सन् चिदाभासः कदाचन ॥ स्वयंप्रकाश
नभातीति नास्ति कूटस्थ इति वक्ति प्रसंगतः ॥ कर्त्ता भोक्ता हमस्मीति
स्वयंप्रकाशः कूटस्थस्तत्त्वं नैव वेत्त्ययं ॥३०॥

ता नास्तित्वमेव दर्शयति ॥ संसारासक्तेत्यादिना श्लोकचतुष्टयेन ॥ अयं चिदाभासो विषयसंपादनादिष्वासक्तचित्तः सन्
कदाचन श्रुतिविचारात् पूर्वं कदाचित् स्वतत्त्वं स्वनिजरूपं कूटस्थप्रत्यगात्मानं नैव वेत्ति न जानातीति यत् तदज्ञानं चिदात्म
विषयप्रसंगेनातिकूटस्थो नास्ति न भातीति यल्लोकं तदिदमज्ञानकार्यमावरणं कूटस्थस्य सत्ताभानाभिधानवत् कल्पनं सारस्य

वा

मो

12

अस्यारोपस्य हेतुर्देहद्वयपुत चिदाभासे विक्षेपः परैर्बोधितः कूटस्थोऽस्तीति जानाति इदं परोक्षज्ञानं। अत एवादिपरिपाक
वशात् कूटस्थोऽहमेवास्मीति जानाति इदमपरोक्षज्ञानं॥ कूटस्थासंगात्मज्ञानान्नरकं नृत्यादिशोकज्ञानसन्तती निरुदयं शोका
पगमः कृत्यं कृतव्यमातं तत्तन्निष्पादितं प्राप्तव्यपुफलं ज्ञातं प्राप्तं लब्धमिति तुष्यतीयं तृप्तिरित्यर्थः॥ २२॥ दृष्टान्ते कृत्क्रम
स्त्रं दृष्टान्तसमकमनुवदति अज्ञानमिति॥ ननूक्तावस्थासप्तकस्यात्मधर्मत्वाङ्गीकारे तस्य कूटस्थत्वं व्याहन्येतेत्याशंक्य एताः सप्ताव

अस्ति कूटस्थ इत्यादौ परोक्षं वेत्ति वार्तया। पश्चात्कूटस्थ एवास्मीत्येवं वेत्ति विचारतः॥ २१॥ कर्ता भोक्तेत्येवमादिशोकजा
तं प्रमुञ्चति॥ कृतं कृत्यं प्रापणीयं प्राप्तमित्येव तुष्यति॥ २२॥ अज्ञानमावृतिस्तद्वद्विक्षेपश्च परोक्षधीः। अपरोक्ष
मतिः शोकमोक्षस्तृप्तिर्निरंकुशा॥ २३॥ सप्तावस्था इमाः सन्ति चिदाभासस्य तास्विमौ॥ बन्धमोक्षौ स्थितौ तत्र तिस्रो ब
न्धकृतः स्मृताः॥ २४॥ न जानामीत्युदासीनव्यवहारस्य कारणं॥ विचारप्रागभावेन युक्तमज्ञानमीरितं॥ २५॥ ८२॥

स्थाश्चिदाभासस्यैव न कूटस्थस्येत्याह॥ सप्तावस्था इति। सर्ववाक्यं सावधारणमिति न्यायेन चिदाभासस्यैवेत्य
वगम्यते। आसां मध्ये उपन्यासो वृथेत्याशंक्य न वृथा बन्धमोक्षकारित्वद्योतनफलत्वादुपन्यासस्येत्यभिप्रायेणाह॥
तास्विमाविति। किमासां सप्तानां मध्ये विशेषेण बन्धमोक्षकारित्वेन सादृशा तत्रेति। अज्ञानावरणविक्षेपरूपास्ति
स्र इत्यर्थः॥ २४॥ आसां बन्धकारित्वं दर्शनायत्तिस्रणामपि स्वरूपं प्रत्येकं कार्यप्रदर्शनेन स्पष्टीचिकीर्षुरज्ञानस्य
स्वरूपं तावद्दर्शयति॥ न जानामीति॥ आत्मतत्त्वविचारप्रागभावसहितं उदासीनव्यवहारस्य कारणं न जानामी

13

॥ ७० ॥
॥ ७ ॥

आवृतिकार्यं दर्शयति ॥ अमार्गेणेति । शास्त्रोक्तप्रकारेमतिरेण्यं केवलं तर्केण विचार्यानेन तरं कूटस्थो नास्ति न
भातीत्येवंरूपो विपरीतव्यवहार आवृतिकार्यमित्यर्थः ॥ ३६ ॥ विक्षेपस्य स्वरूपं तत्कार्यं च दर्शयति । देहद्वयेति । स्थू
लसूक्ष्माख्यशरीरद्वयसहितश्चिदाभास एव विक्षेपो बन्धकः । बन्धहेतुः संसाराख्यः कर्तृत्वाद्यखिलः शोको
स्य चिदाभासस्य कार्यमित्यर्थः । कर्तृत्वादीत्यादिपदेन प्रमातृत्वादयो गृह्यन्ते ॥ ३७ ॥ ननु सत्तावस्थाश्चिदाभास

अमार्गेण विचार्याथ नास्ति नो भाति चेत्यसौ ॥ विपरीतव्यवहृतिरावृतेः कार्यमिष्यते ॥ ३६ ॥ देहद्वयचिदाभा
सरूपो विक्षेप ईरितः ॥ कर्तृत्वाद्यखिलः शोकः संसाराख्योऽस्य बन्धकः ॥ ३७ ॥ अज्ञानमावृतिश्चैते विक्षेपा
त्प्राक् प्रसिध्यतः ॥ यद्यप्यथाप्यवस्थे ते विक्षेपस्यैव नात्मनः ॥ ३८ ॥ विक्षेपोत्पत्तितः पूर्वमपि विक्षेपसं
स्कृतिः ॥ अस्त्येव तदवस्थात्वमविरुद्धं ततस्तयोः ॥ ३९ ॥

स्येत्युक्तमनुपपन्नं । अज्ञानावरणयोर्विक्षेपो
त्पत्तेः पुरा स्थितत्वाच्चिदाभासस्य च विक्षेपान्तःपातित्वेऽनुपपन्ने इत्याशङ्क्याह । अज्ञानमिति ॥ अनयोर्विक्षे
पात्पुरा स्थितत्वेन नात्मावस्थात्वं तस्यासंगत्वेनावस्थावत्त्वानुपपत्तेरतः परिशेषाच्चिदाभासावस्थात्वमेव वक्त
व्यमिति भावः ॥ ३८ ॥ अवस्थावतो विक्षेपस्य तदानीमभावात्तदवस्थात्वाभिधानमनुपपन्नमित्या
शङ्क्य विक्षेपाभावेऽपि तत्संस्कारस्य तदानीं सत्त्वाद्विक्षेपावस्थात्वाभिधानं न विरुध्यत इत्याह । विक्षेपेति । त

तदवस्थात्वा

तः कारणात्तदवस्थात्वं विक्षेपावस्थात्वमविरुद्धमिति

क्रमात् ॥ ३९ ॥ ७

न च प्रसिद्धसंस्काराभ्युपगमाद्वारा विक्षेपावस्थानवर्णनानुपपत्तिः अज्ञानतत्पापशलिद्ब्रह्मावस्थानवर्णन
मित्याशंक्याह निष्प्रसंगो मैव मिति परिहरति । ब्रह्म लीनेति ॥ ननु ब्रह्मण्यारोपितसाविद्यस्यापि विक्षेपोत्पत्ति
तत्कालेनभाविनो नासंसारितावस्थानां जीवाश्रितत्वेनानुभूयमानत्वात् ब्रह्मावस्थात्वमिति शंकते । संसा
रोहमिति । संसारी कर्तृत्वादिधर्मवान् विबुद्धस्तस्साक्षात्कारवान् विशोकः शोकरहितः तुष्टोवक्ष्यमाणब्रह्म
ब्रह्मण्यारोपितत्वेन ब्रह्मावस्थेयमेवेति ॥ नसङ्कर्तृपरत्वोसां ब्रह्मण्येवाधिरोपणात् ॥ ५० ॥ संसारोहं वि
बुद्धोहं विशोकस्तुष्ट एव हि ॥ जीवगता अवस्था भान्ति न ब्रह्मणा परिहि ॥ ५१ ॥ नहि तो हि ब्रह्मसत्वभानमहं
स्थितो नहि ॥ इति पूर्वेभवस्थेचभासितं जीवगेत्यत्र ॥ ५२ ॥ अज्ञानस्यात्र योग्यमित्यधिष्ठानतत्पाद्गुणे ॥ जीवावस्थासाक्षात्पत्तिरादिपाद्यम्
त्पत्त्यादिजनितसंतोषवानहमस्मीत्यतत्तावस्थाजीवगताः जीवाश्रिता भान्ति न ब्रह्माश्रिता इत्यर्थः ॥ ५१ ॥ एवं तस्यैता
न्वरणयोरपिजीवाश्रितत्वेनानुभूयमानत्वा सा जीवावस्थात्वमेवेति परिहरति ॥ तत्येतरति । महस्थितोमणानुभ
वेनेत्यर्थः ॥ ननु तह्यज्ञानाश्रयत्वं ब्रह्मणः पूर्वाचार्यैः कथमुक्तमित्याशंक्य तद्विवक्षां दर्शयति । अज्ञानस्येति । ब्र
ह्मणोज्ञानाधिष्ठानत्वविवक्षया तदाश्रयत्वमुक्तमित्यर्थः । पर्वद्वस्तोहि किं विवक्षया जीवावस्थात्वमुक्तमित्याशंक्याह
विवक्षां दर्शयति । जीवावस्थात्वमिति । ५२

॥तृ०॥
॥८॥

एवंधीहेतुमवस्थाद्वयं प्रदर्श्यावशिष्टास्ववस्थासु मध्ये पूर्वोक्ताज्ञानावरणनिवृत्तिद्वारा मुक्तिहेतुमवस्थाद्वयं दर्शय
ति॥ ज्ञानद्वयेनेति। परोक्षापरोक्षत्वलक्षणेन ज्ञानद्वयेनावरणे/ [illegible] कारणभ्रान्ते नष्टे सति तत्त्व
नावृत्तिस्तेनाज्ञानेनोत्था/ दृष्टं न भाति नास्तीति व्यवहारकारणं द्विविधमप्यावरणं कारणाभावान्नश्यत
नीति॥ ५४॥ कस्माज्ज्ञानद्वयेनेत्यपेक्षायामुभयं विभज्य दर्शयति। परोक्षज्ञानं न तरति॥ कूटस्थोऽस्ती

परोक्षज्ञानतो नश्ये॥ ज्ञानद्वयेन नष्टेऽस्मिन्नज्ञाने तत्कृतावृतिः। न भाति नास्ति चेत्येषा द्विविधापि वि
नश्यति ५४॥ दसत्त्वावृतिहेतुता॥ अपरोक्षज्ञाननाश्या ह्यभानावृतिहेतुता॥ ५५॥ अभानावरणे
नष्टे जीवत्वारोपसंक्षयात्॥ कर्तृत्वाद्यखिलः शोकः संसाराख्यो निवर्तते॥ ५६॥ निवृत्ते सर्वसंसा
रे नित्यमुक्तत्वभासनात्॥ निरङ्कुशा भवेत्तृप्तिः पुनः शोकासमुद्भवात्॥ ५७॥ एवंरूपात्परोक्षज्ञानाज्ज्ञान

स्य कूटस्थो नास्तीत्यसत्त्वावरणकारणं निवर्तते। कूटस्थोऽस्तीति परोक्षज्ञानेन तु कूटस्थो न भातीत्येवंरूपावरणकारण
त्वं निवर्तते। इदानीं ज्ञानस्य फलरूपावस्थाद्वये प्रथमावस्थामाह॥ अभानेति। अभानावरणे निवृत्ते भ्रान्त्याप्रतीप
मानस्य जीवत्वस्यापि निवृत्तत्वात्तन्निमित्तकः कर्तृत्वादिलक्षणः संसाराख्यः शोकः सर्वोऽपि निवर्तत इत्यर्थः। एवं शो
कापगमरूपामवस्थां प्रदर्श्य निरङ्कुशां तृप्तिलक्षणां द्वितीयां दर्शयति॥ निवृत्त इति॥ ५७॥

ननु आत्मानं चेद्विजानीयादिति मंत्रव्याख्याने प्रवृत्तत्वात् तद्विहाय मध्ये अज्ञानाद्यवस्थासप्तक निरूपणं प्रवृत्तासंगतमित्याशंक्य आत्मानं चेद्विजानीयादित्यस्याः श्रुतेस्तात्पर्य निरूपणशेषत्वेनाभिहितत्वान्न प्रवृत्तासंगतत्वमित्यभिप्रेत्य श्रुतितात्पर्यमाह ॥ अपरोक्षेति । चिदाभासनिष्ठ यदवस्थासप्तकमस्ति तत्रापरोक्षज्ञान शोकनिवृत्तिलक्षणमवस्थाद्वयं प्रतिपादयितुमयं मंत्रः प्रवृत्त इत्यर्थः ॥४८॥ अयमित्यपरोक्षत्वमित्यत्रायमिति पदे

॥ अपरोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे ॥ अवस्थे जीवगे ब्रूते आत्मानं चेदिति श्रुतिः ॥४८॥ अयमित्यपरोक्षत्वमुक्तं तद्विविधं भवेत् ॥ विषयस्वप्रकाशत्वाद्धियाप्येवं तदीक्षणात् ॥४९॥ परोक्षज्ञानकालेपि विषयस्वप्रकाशता ॥ समा ब्रह्म स्वप्रकाशमस्तीत्येवं विबोधनात् ॥५०॥ ४९ ॥

नात्मनोपरोक्षत्वमुच्यत इत्युक्तं तथा सति अपरोक्षज्ञानविषयत्वमेव स्यान्न परोक्षज्ञानविषयत्वमित्याशंक्य तदुपपादनायापरोक्षज्ञानं विभजते ॥ अयमिति ॥ द्वैविध्ये कारणमाह । विषयेति । विषयस्य चिद्रूपस्यात्मनः स्वप्रकाशत्वात् तस्य व्यवहारे साधनांतरनिरपेक्षत्वात् धिया बुध्या एवं स्वप्रकाशत्वेन तदीक्षणात्तस्य विषयात्मनोऽवलोकनाच्चेत्यर्थः ॥ भवतु द्वैविध्यमेतावता परोक्षज्ञानविषयत्वे किमायातमित्याशंक्य विषयस्वप्रकाशत्वं परोक्षज्ञानविषयत्वविरोधीन भवतीत्याह । परोक्षेति । अपरोक्षज्ञानकाल इव परोक्षज्ञानकालेपि विषयस्य स्वरूपं स्वप्रकाशता अस्त्येव ॥ तत्रोपपत्तिमाह ॥ अस्येति ॥५०॥

॥ तृ० ॥

प्रत्यगभिन्नब्रह्मगोचरस्य ज्ञानस्य कुतः परोक्षत्वमित्याशंक्य प्रत्यगात्माग्रहणादित्याह ॥ अहं ब्रह्मेति ॥ नन्वि
दं भ्रान्तमित्याशंक्याऽस्य भ्रान्तत्वे किं बाध्यत्वादुत व्यतयनुल्लेखाद् अथवाऽपरोक्षेण ग्रहणयोग्यस्य परोक्ष्येण ग्र
हणात् यद्वाऽऽत्माग्रहणादिति चतुर्धा विकल्प्य प्रथमं प्रत्याह ॥ एतन्नेति । हेतुं विवृणोति । ब्रह्म नास्तीति । द्विती
यमतिप्रसंगेन दूषयति । व्यतयनुल्लेखेति । अयं स्वर्ग इत्येवमाकारग्रहणाभावात् किंतु स्वर्गोऽस्तीत्येवं सामा

अहं ब्रह्मेत्यनुल्लेखाद् ब्रह्मास्मीत्येवमुल्लेखतः । परोक्षज्ञानमेतन्न भ्रान्तं बाधानिरूपणात् ॥५०॥
ब्रह्म नास्तीति मानं चेत्स्याद्बाध्येत तदा ध्रुवम् ॥ न चैवं प्रबलं मानं पश्यामो तो न बाध्यते ॥५१॥ व्य
त्यनुल्लेखमात्रेण भ्रमत्वे स्वर्गधीरपि ॥ भ्रान्तिः स्याद्व्यत्यनुल्लेखात् सामान्योल्लेखदर्शनात् ॥५२॥
अपरोक्षत्वयोग्यस्य न परोक्षमतिर्भ्रमः ॥ परोक्षमित्यनुल्लेखादर्थात्संरोक्ष्यसंभवात् ॥५३॥

न्याकारेण प्रतीतेः स्वर्गबुद्धेरपि भ्रमत्वप्रसंग इत्यर्थः ॥५२॥ तृतीयं निराकरोति । अपरोक्षेति ॥ अपरोक्ष
त्वेन ग्रहणयोग्यस्य प्रत्यगभिन्नब्रह्मविषयस्य परोक्षज्ञानस्य भ्रमत्वं न संभवति । कुत इत्यत आह । परो
क्षमिति । ब्रह्म परोक्षमित्येवमाकारेण ग्रहणाभावात् । कुतस्तर्हि तस्य परोक्षत्वमित्याशंक्याह । अर्था

११५३॥

२ रं ब्रह्मेत्येवं व्यक्त्युल्लेखाभावस्सामर्थ्यात्परोक्षत्वसिद्धेरिति भावः। चरम मांशं कृते। अंशागृहीतेति। ब्रह्मांशग्रहणेऽपि प्रत्यगंशाग्र
हणाद्भ्रमत्वमित्यर्थः। एवं तर्हि घटादिज्ञानस्यापि भ्रमत्वप्रसंग इति परिहरति। घटेति। आंतरावयवानामग्रहणादिति भावः॥ न
नु घटस्य सावयवत्वादंशाग्रहणेऽप्यंशग्रहणं संभवति। ब्रह्मणस्तु निरंशत्वात्कथमंशाग्रहणसंभव इत्याशंक्य व्यावर्त्योपाधिनि
मित्तकं सांशत्वं तत्र भविष्यतीत्याह। निरंशस्येति तौ कौ व्यावर्त्यौ इति विवक्षायामाह। असंगतेति। अपरोक्षत्वेनाग्रहण

ति अंशागृहीतेर्भ्रान्तिश्चेत्घटज्ञानं भ्रमो भवेत्॥ निरंशस्यापि सांशत्वं व्यावर्त्यांशविभेदतः॥५५॥ असंगतांशो निवर्तेत परोक्ष
ज्ञानतस्तथा॥ अभानांशनिवृत्तिस्यादपरोक्षधिया कृता॥५६॥ दशमोऽस्तीत्यविभ्रान्तं परोक्षज्ञानमीक्षते। ब्रह्मा
स्तीत्यपि तद्वत्स्यादज्ञानावरणं समम्॥५७॥ आत्मा ब्रह्मेति वाक्यार्थे निःशेषेण विचारिते॥ व्यक्तिरुल्लिख्यते यद्वद्दशम
स्त्वमसीत्यतः॥५८॥

योग्यविषयं परोक्षज्ञानं भ्रमो न भवतीत्येतद्दृष्टान्तप्रदर्शनेनोपपादयति॥ दशमोऽस्तीति। दशमोऽस्तीत्या ६८
प्तवाक्यजन्यं परोक्षज्ञानमभ्रान्तं यथा। ब्रह्मास्तीति वाक्यजन्यज्ञानमपि तदभ्रान्तं स्यात् ज्ञानद्वयस्यासत्त्वावरणांशनाशकत्वसमत्वादि
ति भावः॥ ननु वाक्यस्यापरोक्षज्ञानमुत्पद्यते चेत्परोक्षज्ञानं कुतो जायत इत्याशंक्य विचारसहिताद्वाक्यादेवेत्याह। आत्मा ब्रह्मे
ति। अयमात्मा ब्रह्मेति महावाक्यार्थे सम्यग्विचार्यमाणे पूर्वमस्तीति परोक्षतयाऽवगतस्य ब्रह्मणः प्रत्यगभिन्नत्वं साक्षात्क्रि
यते। तत्र दृष्टान्तः यद्वदिति दशमस्त्वमसीत्येतद्वाक्याद्दशमस्य यथा साक्षात्क्रियते तद्वदित्यर्थः॥५८॥

॥२०॥
॥१०॥

विचारसहकृतेन वाक्येनापरोक्षज्ञानोत्पत्तिप्रकारं तावद्दृष्टान्तेन दर्शयति। दशम इति॥ स्वयाऽस्तीति निरूपितो दशमः क्व इति प्र
श्ने कृते तस्य त्वमेवेति परिहारेऽभिहिते स्वात्मना सह दशत्वगणयित्वाऽहं दशमोऽस्मीति स्वमेव दशमं स्मरेदित्यर्थः॥ ५९॥
अस्य दशमोऽस्मीति ज्ञानस्य विचारसहितवाक्यजनितत्वान्न विपर्ययादिरूपतेत्याह। दशमोऽस्मीतीति। अस्य दशमस्य
त्वमेव दशमोऽसीति वाक्यात् परिगणनादिलक्षणविचारसहितादुत्पन्नाऽहं दशमोऽस्मीति बुद्धिर्न विहन्यते। न केनापि ज्ञाने

दशमः क्व इति प्रश्ने त्वमेवेति निराकृते। गणयित्वा सह स्वेन स्वमेव दशमं स्मरेत्॥ ५९॥ दशमोऽस्मीति वाक्योत्थान
धीरस्य विहन्यते॥ आदिमध्यावसानेषु न नवत्वस्य संशयः॥ ६०॥ सदेवेत्यादिवाक्येन ब्रह्मसत्त्वं परोक्षतः॥
गृहीत्वा तत्त्वमस्यादिवाक्याद्व्यक्तिं समुल्लिखेत्॥ ६१॥ आदिमध्यावसानेषु स्वस्य ब्रह्मत्वधीरियं॥ नैव व्यभिच
रेत्तस्मात् पारोक्ष्यं प्रतिष्ठितं॥ ६२॥

न न विहन्यते। परिगणनक्रियायां च नवानामादिमध्यावसानेषु परिगणने
प्यहं दशमो न वेति संशयश्च नोत्पद्यते। अतः सा दृढापरोक्षरूपेत्यर्थः॥ ६०॥ एतत्सर्वं दार्ष्टान्तिके योजयति। सदेवेत्यादि
ना। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिवाक्येन ब्रह्मसद्भावं निश्चित्य तत्स्वजीवरूपेण प्रवेशादिश्रुतिप
र्यालोचनया प्रत्यग्रूपत्वं संभाव्य तत्त्वमसीत्यादिवाक्येनाद्वितीयब्रह्मरूपमात्मानमहं ब्रह्मास्मीति साक्षात्कुर्यादि
तरयमात्मनो ब्रह्मत्वबुद्धिः पंचानां कोशानामादिमध्यावसानेषु आत्मनो व्यवहारेऽपि नैवान्यथाभवत्यतोऽस्या बुद्धेर्प

[illegible]

नन्वेवं प्रथमतः केवलवाक्यात्परोक्षज्ञानमुत्पद्यते पश्चाद्विचारसहितादपरोक्षज्ञानमित्येतत्कुतोऽवगम्य
ते इत्याशंक्य तैत्तिरीयकादिश्रुतिपर्यालोचनमेवाह । नन्वादीति । भृगुर्नाम कः कश्चिदृषिः पुरा यतो वा
इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति वाक्यश्रुतेन
जगज्जन्मादिकारणत्वाख्यलक्षणेन जगत्कारणं ब्रह्म परोक्षतयावगम्यान्नमयादिपंचकोशेषु वि-चा

जन्मादिकारणत्वाख्यलक्षणेन भृगुः पुरा ॥ परोक्षेण गृहीत्वाथ विचाराद्व्यक्तिमैक्षत ॥६२॥ =
यद्यपि त्वमसीत्यत्र वाक्यं नोचे भृगोः पिता ॥ तथाप्यन्नं प्राणमिति विचार्यस्थलमुक्तवान् ॥
अन्नप्राणादिकोशेषु सुविचार्य पुनः पुनः ॥ आनंदव्यक्तिमीक्षित्वा ब्रह्मलक्ष्माप्ययूयुजत् =

रेण विचारं प्राप्य गात्मनो रूपं ब्रह्म दृष्टवानित्यर्थः ॥६३॥ नन्वस्मिन्प्रकरणे त्वं ब्रह्मासीत्येवमाद्युपदेशाभा
वात्कथं भृगोरात्मतत्त्वसाक्षात्कार इत्याशंक्यात्मसाक्षात्कारहेतुविचारयोग्यस्थलप्रदर्शनादित्याह । यद्य
पीति ॥६४॥ नन्वन्नमयादिकोशेषु विचारितेषु प्रतीचः साक्षात्कारो भवतु ब्रह्मणस्तु कथमित्याशंक्य प्र
तीच एव ब्रह्मत्वात्पंचकोशविचारेणानंदात्मव्यक्तिं साक्षात्कृत्यानंदाद्ध्येव खल्विमानि भूतानि जायन्ते सं
विशन्तीत्यंतं तद्ब्रह्मलक्षणमपि प्रतीच्येव योजितवानित्याह ॥ अन्नप्राणादीति ॥६५॥ ६९

नतु ब्रह्मलक्षणस्यानंदात्मरूपे प्रतीचि योजनं न घटते ब्रह्मणस्तदभावेन प्रतीचो भिन्नत्वादित्याशंक्य न भेदः॥ सत्यादिलक्षणस्य ब्रह्मणः प्रत्यग्रूपेणावस्थानश्रवणादित्याह॥ सत्यमिति॥ सत्यं ज्ञानमनंतं ब्रह्मेत्येवं ब्रह्मणः स्वरूपलक्षणमभिधाय यो वेद निहितं गुहायां परमे व्योमन्नित्यनेन वाक्येन ब्रह्मणः पंचकोशगुहायां स्थितत्वेन तस्यैव प्रत्यग्रूपत्वमभिहितमित्यर्थः॥६६॥ एवं तैत्तिरीयकश्रुतिपर्यालोचनया भृगोः परोक्षज्ञानपूर्वकं विचारजन्यत्वं साक्षात्कारस्य दर्शयित्वाथ छांदोग्यश्रुतिपर्यालोचनयापि तद्दर्शयति॥ परोक्षेणेति॥ इंद्रो य आत्मापहतपा

सत्यं ज्ञानमनंतं चेत्येवं ब्रह्मस्वलक्षणं॥ उक्त्वा गुहाहितत्वेन कोशेष्वेतत्प्रदर्शितं॥६६॥ परोक्षेण विबुध्येंद्रो य
आत्मेत्यादिलक्षणात्॥ अपरोक्षीकर्तुमिच्छंश्चतुर्वारं गुरुं ययौ॥६७॥ आत्मा वा इदमित्यादौ परोक्षं ब्रह्मल
क्षितं॥ अध्यारोपापवादाभ्यां प्रज्ञानं ब्रह्म दर्शितं॥६८॥

प्मा विरजो विमृत्युर्विशोक इत्यादिवाक्यप्रतिपादितेन लक्षणेनात्मानं परोक्षतयावगत्य विचारार्थं शरीरत्रयनिराकरणेन तत्साक्षात्काराय गुरुं ब्रह्माणं चतुर्वारमुपसन्न इति छांदोग्योपनिषदष्टमाध्याये श्रूयते॥६७॥ इदानीमैतरेयकश्रुतावपि तद्दर्शयति॥ आत्मा वा इदमिति॥ आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषदित्यनेन वाक्येन ब्रह्मणो लक्षणमभिधाय स ईक्षत लोकान्नु सृजा इत्युपक्रम्य तस्य त्रय आवसथास्त्रयः स्वप्ना अयमावसथोऽयमावसथोऽयमावसथ इत्यनेन परमात्मनि जगदध्यारोपणप्रकारमभिधाय स जातो भूतान्यभिव्यैख्यत् किमिहान्यं वावदिषदिति तस्यारोपितस्यापवादमभि

...त्वंपदार्थशोधनपुरःसरं प्रज्ञानं ब्रह्मेति प्रज्ञानरूपस्यात्मनो ब्रह्मत्वं दर्शितमित्यर्थः॥६८॥

उक्तन्यायमित्तरासु श्रुतिष्वप्यतिदिशति ॥ अवांतरेणेति ॥ सर्वत्र सर्वासु श्रुतिष्वित्यर्थः ॥ ६९ ॥ ननु महावाक्यविचारस्या
परोक्षज्ञानजनकत्वं स्वकपोलकल्पितमित्याशंक्य वाक्यवृत्तावाचार्यैस्तथाप्रतिपादितत्वान्नैवमित्याह ॥ ब्रह्मापरोक्षे
ति । अतो वाक्याद्ब्रह्मापरोक्षज्ञाने विप्रतिपत्तिर्नास्तीत्यर्थः ॥ ७० ॥ वाक्यवृत्तावुपपादनप्रकारं दर्शयति ॥ आलंबन
तयेति ॥ अंतःकरणसंभिन्नबोधः अंतःकरणसहितश्चिदात्मा अस्मत्प्रत्ययशब्दयोरहमितिज्ञानस्याहमितिशब्दस्य
चालंबनत्वेन विषयत्वेन भाति स तथाविधो बोधस्त्वंपदाभिधस्त्वमितिपदं अभिधा वाचकं यस्य स त्वंपदाभिधस्त्वंप

श्री ॥ अवांतरेण वाक्येन परोक्षा ब्रह्मधीर्भवेत् ॥ सर्वत्रैव महावाक्यविचारात्त्वपरोक्षधीः ॥ ६९ ॥ ब्रह्मापरोक्षसिध्य
र्थं महावाक्यमितीरितं ॥ वाक्यवृत्तावतो ब्रह्मापरोक्ष्ये विमतिर्न हि ॥ ७० ॥ आलंबनतया भाति योऽस्मत्प्रत्यय
शब्दयोः ॥ अंतःकरणसंभिन्नबोधः स त्वंपदाभिधः ॥ ७१ ॥ मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः ॥ पा
रोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः ॥ ७२ ॥ प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता ॥ विरुध्येते यतस्त

दवाच्य इत्यर्थः ॥ ७१ ॥ एवं त्वंपदवाच्यार्थमभिधाय तत्पदवाच्यार्थमाह ॥ मायोपाधिरिति ॥ पारोक्ष्यशबलः परोक्षत्वध
र्मविशिष्ट इत्यर्थः ॥ एवं तटस्थलक्षणमभिधाय स्वरूपलक्षणमाह ॥ सत्याद्यात्मक इति ॥ सत्यमादिर्येषां ज्ञानादीनां ते
सत्यादयस्त आत्मा स्वरूपं यस्य स तथाविधस्तत्पदाभिधस्तत्पदमभिधा वाचकं यस्य स तत्पदाभिधस्तत्पदवाच्य
इत्यर्थः ॥ एवं पदार्थावभिधाय वाक्यार्थबोधनाय लक्षणावृत्तिराश्रयणीयेत्याह ॥ प्रत्यगिति ॥ प्रत्यक्परोक्षत्वे
सद्वितीयत्वेन सहिता पूर्णतेति मध्यमपदलोपिसमासः ॥ सद्वितीयत्वपूर्णते च एकस्य वस्तुनो यतो विरुध्येते ऽतो

॥७०॥
॥१२॥

सा चकी दर्शीत्यत आह॥ तत्त्वमस्यादीति॥ भागलक्षणा भागत्यागलक्षणेत्यर्थः॥ तत्र दृष्टांतः॥ सोयमिति॥ सोयं देव
देवदत्त इति वाक्यस्थयोः सोयमिति पदयोर्यथा जहदजहल्लक्षणावृत्तिराश्रिता॥ नापरा जहल्लक्षणा नाप्यजह
णा तद्वदत्रापीत्यर्थः॥ ७४॥ ननु गामानयेत्यादिवाक्येषु लक्षणावृत्त्या विनापि वाक्यार्थबोधो दृष्टस्तत्तद्वदत्रापि
किं न स्यादत आह॥ संसर्ग इति॥ यथा लोके गामानयेत्यादौ पदैः स्मारितानां माकांक्षासंनिध्यादिमतां गवादि

तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा॥ सोयमित्यादिवाक्यस्थपदयोरिव नापरा॥ ७४॥ संसर्गो वा विशि-
ष्टो वा वाक्यार्थो नात्र संमतः॥ अखंडैकरसत्वेन वाक्यार्थो विदुषां मतः॥ ७५॥ प्रत्यग्बोधो य आभाति सो-
द्वयानंदलक्षणः॥ अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः॥ ७६॥

दिपदार्थानामन्वयो वाक्यार्थत्वेन स्वीकृतो यथा वा नीलं महत्सुगंध्युत्पलमित्यादौ नीलत्वादिविशिष्टस्योत्पलस्य
वाक्यार्थत्वं स्वीकृतं॥ नैवमत्र महावाक्येषु संसर्गो विशिष्टयोरन्यतरस्य वा वाक्यार्थत्वमभ्युपेयते॥ किंतु अखंडैकरस
त्वेन स्वगतादिभेदशून्यवस्तुमात्ररूपेण वाक्यार्थो विद्वद्भिरभ्युपगम्यतेऽतो लक्षणाश्रयणीयेत्यर्थः॥ ७५॥
अखंडैकरसं वाक्यार्थं दर्शयति॥ प्रत्यग्बोध इति॥ यः प्रत्यग्बोधः सर्वांतरश्चिदात्मा आभाति बुद्ध्यादिसाक्षि
त्वेन स्फुरति॥ सोद्वयानंदलक्षणो द्वितीयानंदरूपः परमात्मेत्यर्थः॥ अद्वयानंदरूपश्च तथाविधः परमात्मा

एवमखण्डार्थबोधने किं स्यादित्यत आह ॥ इत्थमिति ॥ त्वमर्थस्य प्रत्यगात्मनो ब्रह्मत्वं भ्रान्तिसिद्धापरोक्षता तदर्थस्य-
च ब्रह्मणश्च पारोक्ष्यं परोक्षज्ञानविषयत्वं निवर्तते । ततोऽपि किमिति पृच्छति । यद्येवमिति ॥ उत्तरमाह ॥ शृण्विति ॥ ७८ ॥
ननु सम्मन्वयबलेन सम्यक्परोक्षानुभवसाधनमागम इति आगमलक्षणमतो वाक्यस्यापरोक्षज्ञानजनकत्वं कथमु
च्यते इत्याशंक्य सिद्धान्तज्ञानपरिहार्योऽयमिति मनसि निधायोपहसति ॥ एवमिति ॥ एवं वदन्तः सिद्धान्तरहस्यं ने
व जानन्तीत्यर्थः ॥ ७९ ॥ ननु सिद्धान्तस्तावत्तिष्ठतु वाक्यस्यापरोक्षज्ञानजनकत्वं त्वनुमानसिद्धमिति शंकते ॥ आस्ता

इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् । अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ॥ ७७ ॥ तदर्थस्य च पा-
रोक्ष्यं यद्येवं किं ततः शृणु ॥ पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥ ७८ ॥ एवं सति महावाक्यात्परोक्षज्ञा-
नमीर्यते ॥ येषां तेषां शास्त्रसिद्धान्तज्ञानं [illegible]तरां ॥ ७९ ॥ आस्तां शास्त्रस्य सिद्धान्तो युक्त्या वाक्यात्परो-
क्षधीः ॥ स्वर्गादिवाक्यवन्नैवं दशमे व्यभिचारतः ॥ ८० ॥ स्वतोऽपरोक्षजीवस्य ब्रह्मत्वमभिवाञ्छतः ॥ न
श्येत्सिद्धापरोक्षत्वमिति युक्तिर्महत्यहो ॥ ८१ ॥ वृद्धिमिष्टवतो मूलमपि नष्टमितीदृशं ॥ लौकिकं वचनं [illegible]

मिति ॥ विमतं वाक्यं परोक्षज्ञानजनकं भवितुमर्हति वाक्यत्वात् स्वर्गादिप्रतिपादकवाक्यवदित्यनुमानेन परोक्ष-
ज्ञानजनकत्वं सिद्धमित्यर्थः ॥ अनैकान्तिकोऽयं हेतुरिति परिहरति ॥ नैवमिति ॥ दशमस्त्वमसीति वाक्ये वाक्यत्वे
सत्यपरोक्षज्ञानजनकत्वस्योपलंभादिति भावः ॥ ८० ॥ किंच त्वंपदार्थस्य जीवस्यापरोक्षत्वाभावप्रसंगादपि

॥त्र०॥
॥१३॥

ननु सोपाधिकत्वाज्जीवस्यापरोक्षत्वमुक्तं ब्रह्मणस्तु निरुपाधिकस्य तत्त्वं युज्यते इति शंकते ॥ अंतःकरणेति ॥ ब्रह्मणो निरुपा-
धिकत्वमसिद्धमिति परिहरति ॥ नैवमिति ॥ जीवस्य ब्रह्मरूपताज्ञाने यदस्ति तस्य सोपाधिकवस्तुविषयत्वात्तद्विषयस्य
ब्रह्मणोपि सोपाधिकत्वं ज्ञानस्य सोपाधिविषयत्वं चेत् ज्ञेयस्य सोपाधिकत्वमंतरा न घटत इति भावः ॥ तदेव कुत इत्यत आ-
ह यावदिति ॥ ननु तर्हि जीवब्रह्मणोर्विलक्षणमुपाधिद्वयं वक्तव्यमित्याशंक्याह ॥ अंतःकरणेति ॥ जीवब्रह्मणोरंतःकरण-
साहित्यसाहित्ये एवोपाधी इत्यर्थः ॥ नन्वंतःकरणसंबंधस्य भावरूपत्वादुपाधित्वमस्तु नाभावरूपस्य तद्राहित्यस्येत्यतदु
॥ अंतःकरणसंभिन्नबोधो जीवोऽपरोक्षतां ॥ अर्हत्युपाधिसद्भावान्न तु ब्रह्मानुपाधितः ॥८३॥ नैवं ब्रह्मत्वबोधस्य
सोपाधिविषयत्वतः ॥ यावद्विदेहकैवल्यमुपाधेरनिवारणात् ॥८४॥ अंतःकरणसाहित्यराहित्याभ्यां विशिष्यते ॥
उपाधिर्जीवभावस्य ब्रह्मतायाश्च नान्यथा ॥८५॥ यथा विधिरुपाधिः स्यात्प्रतिषेधस्तथा न किं ॥ सुवर्णलोहभेदेन
चित्तमित्याशंक्य यावत्कार्यमवस्थायि भेदहेतोरुपाधितेत्युक्तोपाधिलक्षणस्य साहित्यराहित्ययोरुभयोरपि सत्वादुच्चित्तं सो-
पाधित्वमित्यभिप्रायेण परिहरति ॥ यथेति ॥ विधिर्भावरूपोंतःकरणसंबंधो यथोपाधिः स्यात्तथा प्रतिषेधोऽभा-
वरूपोंतःकरणवियोगो न किं ॥ उपाधिर्न स्यात्किं स्यादेवेत्यर्थः ॥ तथापि भावाभावरूपत्वमवांतरवैलक्षण्यं दृश्यत ए-
वेत्याशंक्य तस्याकिंचित्करत्वेनानादरणीयत्वमित्यभिप्रेत्य दृष्टांतमाह ॥ सुवर्णेति ॥ पुरुषप्रचारप्रतिबंधकत्वांशे-
ऽनुपयुक्तं सुवर्णत्वं लोहत्वादि वैलक्षण्यं यद्वदनादरणीयं तद्वदित्यर्थः ॥ ८५ ॥

विधेरिव निषेधस्यापि ब्रह्मबोधोपायत्वेन ब्रह्मस्वरूपाविसंवादरूपितं विधिनिषेधयोरुभयोरपि ब्रह्मबोधोपायत्वमा
चार्यैर्निरूपितमिति दर्शयति ॥ अतएवेति ॥ तदुक्तं न ब्रह्मात्माभिधीयते ॥ अतएवेन तदन्तिरिक्तमतानां दि
व्यावृत्तिनिरसनेन स्वरूपमुपायत्वेन । साक्षाद्विधिमुखेन च विधिविधानं ॥ साक्षादित्युक्तं यः प्रयोगः
सत्यं ज्ञानमनन्तमित्येवमा । दिरूपत्वेन च विधिमुखेनेत द्वारेणापीत्यर्थः वेदान्तानामुपनिषदां प्रवृत्तिः प्र

अत एवावृत्तिरूपेण साक्षाद्विधिमुखेन च ॥ वेदान्तानां प्रवृत्तिः स्याद्द्विधेत्याचार्यभाषितं ॥ ८६ ॥
अहमर्थपरित्यागादहं ब्रह्मेति धीः कुतः ॥ नैवमंशपरित्यागो भागलक्षणयोदितः ॥ ८७ ॥
अन्तःकरणसंत्यागादवशिष्टे चिदात्मनि ॥ अहं ब्रह्मेति वाक्येन ब्रह्मत्वं साक्षिणीक्ष्यते ॥ ८८ ॥

वर्तनं प्रतिपादनं ब्रह्मणीति शेषः ॥ ८६ ॥ ननु वेदान्तानामत एवावृत्त्या ब्रह्मबोधकत्वाङ्गीकारे अहंशब्दार्थस्यानूद्यस्य
अहमर्थेति । अहंशब्दार्थस्यापि त्यागप्रसंगादहं ब्रह्मास्मीति सामानाधिकरण्येन तात्पर्यं तदनुपपन्नमिति शङ्कते ॥ अहमर्थेति । अहंशब्द
स्यापि त्यागप्रसंगादहं ब्रह्मास्मीति सामानाधिकरण्येन ज्ञानं नोदेतुमर्हतीति शङ्कते ॥ नैवमिति । हि यस्मात्कारणाद्भागलक्षणयाऽहंशब्दार्थ
थस्य सर्वस्यापरित्यागात्तन्मेवमिति परिहरति । नैवमिति । हि यस्मात्कारणाद्भागलक्षणया तत्र अहंलक्षणा
यां अहंशब्दार्थैकदेशस्य त्यागस्य त्यागः इति तो न कुरस्थस्यात्मनो ब्रह्मास्मीति ज्ञानमुपपद्यते । इत्यर्थः । ८७
अंशत्यागेन बोधकप्रकारमभिनीय दर्शयति । अन्तःकरणेति ॥ ८८ ॥

ननु चेवं केवलस्य प्रत्यगात्मनः स्वप्रकाशत्वाद्बुद्धिवृत्तिविषयत्वेऽपि घटस्येव न घटत्वं स्यादित्याह ॥ स्वप्रकाशो
पीति । अन्यथा घटादिवदित्यर्थः । स्वप्रकाशोऽहमित्येवं बुद्धिसंभवादिति भावः । नन्वपसिद्धान्तापातः स्यादित्याश
ङ्क्य पूर्वाचार्यैः धीवृत्तिव्याप्यत्वस्यांगीकृतत्वान्नापसिद्धान्तापात इत्याह । फलव्याप्यत्वमिति । फलं वृत्ति
प्रतिबिम्बितश्चिदाभासस्तद्व्याप्यत्वमेवास्य प्रत्यगात्मनो निराकृतं स्वस्यैव स्फुरणत्वादिति भावः ॥ आ
त्मनि फलव्याप्यत्वाभावं दर्शयितुं अनात्मनो वृत्त्या फलेन च व्याप्यत्वं दर्शयति । बुद्धीति उभयव्याप्तेः प्रयोजनमा

स्वप्रकाशोऽपि साक्ष्येष धीवृत्त्या व्याप्यतेऽन्यवत् । फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ॥ ९० ॥
बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटं । तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ॥ ९१ ॥ ब्रह्मण्य
ज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता । स्वयंस्फुरणरूपत्वान्नाभास उपयुज्यते ॥ ९२ ॥

ज्ञातत्वेनेति । तत्र तयोर्बु
द्धिचिदाभासयोर्मध्ये धिया बुद्धिवृत्त्या प्रमाणभूतया ज्ञानं नश्यति ज्ञानाज्ञानयोर्विरोधात् । आभासेन चिदा
भासेन घटः स्फुरेत् । जडत्वेन स्वतः स्फुरणाभावादिति भावः । इदानीमात्मनि ततो वैलक्षण्यं दर्शयति । ब्र
ह्मणीति । प्रमेयब्रह्मणि रुक्तस्याज्ञानावृतत्वात्तस्याज्ञानस्य निवृत्तये वाक्यजन्यया अहं ब्रह्मास्मीति वृत्त्या ब्रह्मा
कारया धीवृत्त्या व्याप्तिरपेक्ष्यते स्वस्यैव स्फुरणरूपत्वात्तत्स्फुरणाय चिदाभासो नापेक्ष्यते । नोपयुज्यमानोऽपि चिदा

उक्तमर्थं दृष्टांतप्रदर्शनेन विशदयति ॥ चक्षुरिति ॥ अंधकारावृतघटादिदर्शनेन चक्षुर्दीपोभावप्यपेक्ष्यते ॥ दीपदर्शनेतु तत्रान किंतु चक्षुरेवापेक्षते यथा ॥ तथा ब्रह्मण्य ज्ञानना शायेति पूर्वेण संबंधः ॥ ९२ ॥ ननु बुद्धितद्वृत्तिनां चिदाभासयैश्रिष्य भावा घटादि ष्विव ब्रह्मण्यपि फलव्याप्तिर्बलाद्भविष्यती त्याशंक्याह ॥ स्थितोपीति ॥ यद्यपि घटावृतिवद्ब्रह्मगोचरवृत्तावपि चिदाभासोस्ति ॥ तथापि नासौ ब्रह्मणो भेदेन भासते किंतु प्रचंडातपमध्यवर्तिदीपप्रभावत्तेने कीभूत इव भवति ॥ अतोन स्फुरणलक्षणातिशय जनको ब्रह्मणीत्यर्थः ॥ ९३ ॥ ननु ब्रह्मणि फलव्याप्ति

स्वा

चक्षुर्दीपावपेक्ष्यैते घटादेर्दर्शने यथा ॥ न दीपदर्शने किंतु चक्षुरेकमपेक्षते ॥ ९२ ॥ स्थितोप्यसौ चिदाभासो ब्रह्मण्येकी भवेत्परं ॥ ननु ब्रह्मण्यतिशयं फलं कुर्याद्घटादिवत् ॥ ९३ ॥ अप्रमेयमनादिं चेत्यत्र श्रुत्येदमीरितं ॥ मनसैवेदमाप्तव्यमिति धीव्याप्यता श्रुता ॥ ९४ ॥ आत्मानं चेद्विजानीयादयमस्मीति वाक्यतः ॥

नास्ति वृत्ति व्याप्तिस्तु वर्तते इत्यत्र किं प्रमाणमित्याशंक्यागमः प्रमाणमित्याह ॥ अप्रमेयमिति ॥ निर्विकल्पमनंतं च हेतुदृष्टांतवर्जितं ॥ अप्रमेयमनादिं च यज्ज्ञात्वा मुच्यते बुध इत्यस्मिन्मंत्रे श्रुत्यामृतबिंदूपनिषदा प्रमेयशब्देनैव फलव्याप्तिरा हित्यमुक्तं ॥ मनसैवेदमाप्तव्यं नेह नानास्ति किंचनेति कठवल्यां धीव्याप्यता श्रुता वृत्तिव्याप्यत्वं श्रुतमित्यर्थः ॥ ९५ ॥ आत्मानं चेद्विजानीयादिति मंत्रेणापरोक्षज्ञानं शोकनिवृत्त्याख्यं जीवगतमवस्थाद्वयं अभिधीयते इत्युक्तं अपरोक्षज्ञानं शोकनिवृत्त्याख्ये उभे इमे ॥ अवस्थे जीवगे ब्रूते आत्मानं चेदिति

श्रुतिरित्यनेन श्लोकेन ॥ तत्र कियताऽज्ञो नापरोक्षज्ञानमुच्यते इत्याकांक्षायामाह ॥ आत्मानं चेदिति ॥ ८०:

॥६०॥
॥१५॥

ब्रह्मात्मव्यक्तिं सत्यादिलक्षणब्रह्माभिन्नप्रत्यगात्मस्वरूपमुल्लिख्य विषयीकृत्य यो बोधो जायते ब्रह्माहमस्मीति सोऽभिधीयते ॥ अनेन वाक्येनेत्यर्थः ॥१५॥ ननु तर्हि पूर्वोक्तरीत्या सद्गुरुद्वाक्यविचारादेवापरोक्षज्ञानसिद्धेरावृत्तिरसद्गुरूपदेशादित्यादौ विहितश्रवणाद्यावर्तनमननुष्ठेयं स्यादित्याशङ्क्य ज्ञानदार्ढ्यो यत्तदावर्तनानुष्ठानस्याचार्यैरभिहितत्वादनुष्ठेयमेवेत्याह ॥ अस्त्विति ॥ अत्र ब्रह्मात्मनि विषये महावाक्यात्सद्गुरुना

ब्रह्मात्मव्यक्तिमुल्लिख्य यो बोधः सोऽभिधीयते ॥१५॥ अस्तु बोधोऽपरोक्षोऽत्र महावाक्यात्तथाप्यसौ
न दृढः श्रवणादीनामाचार्यैः पुनरीरणात् ॥१६॥ अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढीभवेत् ॥
शमादिसहितस्तावदभ्यसेच्छ्रवणादिकं ॥१७॥ बाढं सन्ति ह्यदार्ढ्यस्य हेतवः श्रुत्यनेकता ॥ असं
भाव्यत्वमर्थस्य विपरीता च भावना ॥१८॥ विचारसहितादपरोक्षबोधोऽस्तु भवत्येव नासौ दृढोऽतः श्र
वणाद्यावर्तनीयं ॥ श्रीमच्छंकराचार्यैः पुनर्वाक्यार्थज्ञानोत्पत्त्यनंतरमपि श्रवणाद्यावर्तनाभिधानादि
त्यर्थः ॥ ज्ञानदार्ढ्याय त्यर्थाल्लभ्यते ॥१६॥ आचार्यैः केन वाक्येनाभिहितमित्याशङ्क्य तद्वाक्यं पठति ॥
अहमिति ॥ ननु वाक्यप्रमाणजनितस्य ज्ञानस्यादार्ढ्यं कुत इत्याशङ्क्याह बाढमिति ॥ हि यस्मात्कारणा
च्छ्रुत्यनेकता श्रुतीनां नानात्वमेको हेतुरर्थस्याखण्डैकरसस्याद्वितीयब्रह्मरूपस्यालौकिकत्वेन संभावित

एवं चावर्तनीयमिति भावः ॥१८॥

एवंविधविधानस्यार्थस्य हेतूनुपन्यस्यन्ने श्रुतिन्यस्तव प्रयुक्तादर्थस्य निवृत्तये श्रवणावृत्तिः कर्तव्येत्याह ॥ शाखाभे दादिति । यथा शाखाभेदैः श्रूयते परस्यैव वेदान्त प्रतिपाद्यस्य ब्रह्मणोऽध्ययनसामर्थ्यमिति । यथा वा काम्यभेदो कारीर्यादि वृ ष्टिकामो यजेत इत्यत्र कृष्णान्नमाषुः काम्यरूपादि रूपभेदः श्रुतः एवमुपनिषत्स्वपि प्रतिपाद्यतत्त्वस्य भेदशङ्कायां तन्निवारणाय श्रवणं पुनः पुनः कर्तव्यमित्यर्थः ॥९८॥ किं तच्छ्रवणमित्याकाङ्क्षायां तल्लक्षणमाह ॥ वेदान्तानामिति ।

शाखाभेदात्कर्मभेदाच्छ्रुतं कर्मान्यथा ॥ तद्वदत्रापि माशङ्की त्यतः श्रवणमाचरेत् ॥९९॥ वेदान्तानामशे षाणामादिमध्यावसानतः ॥ ब्रह्मात्मन्येव तात्पर्यमिति धीः श्रवणं भवेत् ॥१००॥ समन्वयाध्याये एतत्स्फुटं धीस्वास्थ्यकारिभिः ॥ तर्कैः संभावनार्थस्य द्वितीयाध्याय ईरिता ॥१०१॥ बहुजन्मदृढा भ्यासाद्देहादिष्वात्मधीः क्षणात् ॥ पुनः पुनरुदेत्येवं जगत्सत्यत्वधीरपि ॥१०२॥ विपरीता भावनेयं

सर्वासामप्युपनिषदामुपक्रमोपसंहारादिपर्यालोचनायां ब्रह्मरूपे प्रत्यगात्मन्येव तात्पर्यमिदं पर्येण पर्यवसा नमित्येवंरूपो निश्चयः श्रवणमित्यर्थः ॥१००॥ एवंविधं श्रवणं कुत्र निरूपितमित्यत आह ॥ समन्वयेति ॥ एतत् श्रवणं समन्वयाध्याये स्फुटम् । व्यासादिभिरिति शेषः ॥ अर्थासंभवनानुमननं तु द्वितीयाध्याये निरू

प पितमित्याह ॥ धीस्वास्थ्येति ॥ प्रमेयगतानुपपत्तिपरिहारद्वारा बुद्धिस्वास्थ्यकारिभिस्तर्कैरर्थस्य संभावना संभावितत्वानुसंधानं मननं द्वितीयाध्याये निरूपितमित्यर्थः ॥१०१॥ इदानीं विपरीतभावनां ताञ्च स्फु

॥२०॥
॥१६॥

विपरीतभावनानिवर्तकं यदैकाग्र्यं तत्कुतो जायते इत्याशंक्याह ॥ तदिति ॥ एतदैकाग्र्यं ब्रह्मोपदेशात्प्रागपि सगुणब्रह्मोपासनाद्भवति भवेदित्यर्थः ॥१०२॥ ननु तत्कुतो वरात्तमिसायास्योपासनाविचारस्य वेदांतशास्त्रे द्व तत्त्वादित्याह ॥ उपास्तय इति ॥ अकृतोपास्तिकस्य कुतस्तज्जन्मेत्यत आह ॥ प्रागिति ॥१०४॥ ब्रह्माभ्यासस्व कीदृश इत्याकांक्षायामाह ॥ तच्चिंतनमिति ॥१०५॥ एतदेकपरत्वं विद्व द्दर्शयितुं श्रुतिमाह ॥ तमेवेति ॥ धीरः ब्र

॥ तत्त्वोपदेशात्प्रागेव भवत्येतदुपासनात् ॥१०३॥ उपास्तयोऽत एवात्र ब्रह्मशास्त्रेऽपि चिंतिताः ॥
॥ प्रागनभ्यासिनः पश्चाद्ब्रह्माभ्यासेन तद्भवेत् ॥१०४॥ तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं ॥ एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ॥१०५॥ तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ॥
नानुध्यायेद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् ॥१०६॥ ब्रह्मचर्यादिसाधनसंपन्नः ब्राह्मणः ब्रह्म

भवितुमिच्छुः मुमुक्षुस्तमेव प्रत्यग्रूपं परमात्मानमेव विज्ञाय संशयाद्यभावो यथा भवति तथा ज्ञात्वा प्रज्ञां ब्रह्मा त्मैकत्वज्ञानसंततिरूपमेकाग्र्यं कुर्वीत संपादयेत् अनात्मगोचरान्बहूञ्छब्दान्नानुध्यायात् न स्मरेत् ॥ ध्यानेनो भिध्यानमप्युपलक्ष्यते ॥ नाभिध्यायात् अन्यथा शब्दध्यानेन वाग्विग्लापनोपपत्तेः ॥ कुत इत्यत आह ॥ वाच इति ॥ हि यस्मात्तदभिध्यानं ॥ अनेन स्मरणमप्युपलक्ष्यते ॥ वाच इति मनसोऽप्युपलक्षणं ॥ विग्लापनं विग्लाप

यतीति विग्लापनं श्रमहेतुः ॥ अयमभिप्रायः ॥ इतरद्रष्टव्यानुसंधानेन मनसः श्रमो भवति ॥ तदभिध्यानेन वाचः इति ॥१०६॥

नु

32

एवमेकात्म्यप्रतिपादिकां श्रुतिमभिधाय स्मृतिमप्याह ॥ अनन्या इति ॥ ये जना अनन्या अहं ब्रह्मास्मीति ज्ञानेन मदभि
न्नाः सन्तः तथैव मां चिन्तयन्तः पर्युपासते परितः सर्वेष्वपि कालेषु उपासते मद्रूपा एव वर्तन्ते ॥ नित्याभियुक्तानां सदा म
च्चिन्तानां तेषामहं तदात्मत्वेनानुसंधीयमानो ऽहं योगक्षेमम् अलब्धलाभलब्धपरिरक्षणरूपो योगक्षेमो वहामि सं
पादयामीत्यर्थः ॥ ७ ॥ उदाहृतयोः श्रुतिस्मृत्योस्तात्पर्यमाह ॥ इतीति ॥ एते श्रुतिस्मृती विपरीतभावनानिवृत्तये आत्म
नि सदा चित्तैकाग्र्यं प्रतिपादयेते इत्यर्थः ॥ ८ ॥ ननु देहाद्यात्मत्वबुद्धेर्जगत्सत्यत्वबुद्धेश्च कुतो विपरीतभावनात्वमि

॥ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ॥ तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं ॥ १०७ ॥ इति श्रुति
स्मृती नित्यमात्मन्येकाग्रतां धियः ॥ विधत्ते विपरीताया भावनायाः क्षयाय हि ॥ १०८ ॥ यद्यथा वर्तते तत्त
स्य तत्त्वं हित्वान्यथात्वधीः ॥ विपरीता भावना स्यात्पित्रादावरिधीर्यथा ॥ १०९ ॥ आत्मा देहादिभिन्नो ऽयं
मिथ्या चेदं जगत्तयोः ॥ देहाद्यात्मत्वसत्यत्वधीर्विपर्ययभावना ॥ ११० ॥ त्यागैक्यतल्लक्षणयोगादिति दर्शयितुं

तस्या लक्षणमाह ॥ यद्यथेति ॥ यद्वस्तु श्रुत्यादियेन प्रकारेण श्रुत्यादिरूपेण वर्तते तस्य तत्त्वं श्रुत्यादिरूपत्वं प
रित्यज्यान्यथात्वधीरन्यथात्वस्य ज्ञानं तस्य धीर्ज्ञानं विपरीता भावना स्यात् तस्मिंस्तद्बुद्धिरिति यावत् ॥ तामुदा
हरति ॥ पित्रादाविति ॥ ९ ॥ उक्तलक्षणं प्रकृते योजयति ॥ आत्मेति ॥ अयमात्मा वस्तुतो देहादिभिन्न इदं जगन्मि
थ्यैवं सत्यपि तयोरात्मजगतोर्यथाक्रमं देहाद्यात्मत्वबुद्धिः सत्यत्वबुद्धिश्च या सा विपरीतभावनेत्यर्थः ॥ ११० ॥

॥तृ०
॥१७॥

यात्मत्वजगत्सत्यत्वधीरूपाविपरीतभावना

सा पूर्वमेकाग्र्यों नियमेनेति सामान्येनोक्तमर्थं विशेषाकारेणाह। तत्त्वभावनयेति। सा देहात्तत्त्वभावनया आत्मनो देहातिरिक्तत्वस्य जगतो मिथ्यात्वस्य च भावनया निरंतरध्यानेन नश्येत् आत्मनो देहाद्यतिरिक्तत्वं देहादेर्जगतो मिथ्यात्वं च भावयेदित्युक्तं॥११॥ तत्र जपादाविव तत्त्व पूर्वपक्षी प्रति पृच्छति किमिति॥ आत्मभेदधीः आत्मनो देहादिभ्यो विभिन्नता तं जगतो मिथ्यात्वानुसंधानं च मंत्रजपदेवताध्यानादिवत्किं नियमेनानुष्ठातव्यमुत लौकिकव्यवहारवन्नियम

तत्त्वभावनया नश्येत् सात्तो देहातिरिक्तता। आत्मनो भावयेत्तस्मान्मिथ्यात्वं जगतोऽनिशं॥११॥ किं मंत्रजपवन्मूर्तिध्यानवद्वात्मभेदधीः॥ जगन्मिथ्यात्वधीश्चात्र व्यावर्त्यास्यादुतान्यथा॥१२॥ अन्यथेति हि विजानीहि दृष्टार्थत्वेन भुक्तिवत्॥ बुभुक्षुर्जपवद्भुंक्ते न कश्चिन्नियतः क्वचित्॥१३॥

मंतरेणापि कर्तुं शक्यत इति। दृष्टफलकत्वान्नात्र नियमः कश्चिदस्तीत्याह अन्यथेति। अन्यथा नियमं विनेत्यर्थः। तत्र हेतुमाह॥ दृष्टार्थत्वेनेति॥ तत्र दृष्टांतमाह॥ भुक्तिवदिति। दृष्टार्थेऽपि भोजने नियमाभुतिस्पृष्टो रूपत्वमंतरस्याशंक्याह। बुभुक्षुरिति। क्षुदपनयनाय भोक्तुमिच्छन्पुरुषो जपं कुर्वाणइव न नियमेन भुंक्ते। पितुपथा क्षुद्बाधोपशांतिः स तथा भोजनं करोतीत्यर्थः॥१३॥

एतदेव प्रपंचयति ॥ अश्नातीति ॥ अश्नाति वा चेत्सति कदाचिद्भुंक्ते [illegible] न वाश्नाति तस्मिन्नसति क्षुद्बाधा
विस्मारकभूतादिचेष्टया ऽनश्नन्नेव कालं नयति ॥ अन्यथा चानिष्टनूरागच्छनूरायानो वा स्वेच्छया भुंक्ते एवं
येन केन प्रकारेण तात्कालिकीं क्षुद्बाधामपनेतुमिच्छति ॥ अयमभिसंधिः ॥ क्षुद्बाधानिवृत्तिलक्षण
दृष्टफलाय भोजनमेव कार्यं नियमास्तु परलोकहेतव इति ॥ जपादौ भोजनाद्वैलक्षण्यं दर्शयति ॥ नि

॥ अश्नाति वा न वाश्नाति भुंक्ते वा स्वेच्छया यथा ॥ येन केन प्रकारेण क्षुधामपनिनीषति ॥ ११४ ॥
॥ नियमेन जपं कुर्यादकृतौ प्रत्यवायतः ॥ अन्यथाकरणेनर्थः स्वरवर्णविपर्ययात् ॥ ११५ ॥
॥ क्षुधेव दृष्टबाधाकृत् विपरीता च भावना ॥ जेया केनाप्युपायेन नास्त्यत्रानुष्ठितेः क्रमः ॥ ११६ ॥

नियमेनेति ॥ तत्र हेतुमाह अकृतौ प्रत्यवायत इति ॥ भवत्येवमकरणे प्रत्यवायोऽन्यथाकरणे तु स नास्ती
त्याशंक्याह ॥ अन्यथेति ॥ मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ॥ स वाग्वज्रो यज
मानं हिनस्ति यथेंद्रशत्रुः स्वरतोऽपराधादिति भावः ॥ ननु क्षुद्बाधाया दृष्टबाधाहेतुत्वात्तन्निवृत्तये
ऽनियमेनापि भोक्तव्यमेव विपरीतभावनायास्तु तथात्वाभावात्तन्निवर्तकं ध्यानमदृष्टफलाय
नियमेनानुष्ठेयमित्याशंक्याह ॥ क्षुधेवेति ॥ विपरीतभावनायास्तु दुःखहेतुत्वस्यानुभवसिद्धत्वा

दिप्तृक्ता

॥पं०॥
॥११८॥

तर्हि स उपायः प्रदर्शनीय इत्याशंक्य पूर्वमेव प्रदर्शित इत्याह॥ उपाय इति॥ ननु जपवत्प्राणस्तुत्यादि नियमाभ्यां ध्यानवदेतदेकपरत्वलक्षणैकाग्रता निर्बध्योऽस्तीत्याशंक्याह॥ एतदिति॥ ननु ध्यानस्य ध्येयचिंतामात्रात्मकत्वात्तत्र को निर्बंध इत्याशंक्य ध्याने निर्बंधं दर्शयितुं ध्यानस्वरूपं तावदाह॥ मूर्तीति॥ धियो बुद्धेः संबध्नि नाम्नि निर्मलस्यानीदेवतादिमूर्तिगोचराणां प्रत्ययानां यत्सांतत्यं अविच्छिन्नत्वं यावतीमानत्वे तदन्यानंतरितं अन्येन विजातीयप्रत्ययेनाव्यवहितं सदा ध्यानमि

॥उपायः पूर्वमेवोक्तस्तच्चिंताकथनादिकः॥ एतदेकपरत्वेऽपि निर्बंध्यो ध्यानवन्न हि॥११७॥
मूर्तिप्रत्ययसांतत्यमन्यानंतरितं धियः॥ ध्यानं तत्रातिनिर्बंधो मनसश्चंचलात्मनः॥११८॥
चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं॥११९॥ अप्य
ब्धिपानान्महतः सुमेरून्मूलनादपि॥ अपि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः॥१२०॥

त्युच्यते। एवं ध्यानस्वरूपं निरूप्य तत्र निर्बंधं दर्शयति॥ तत्रेति॥ सदा पर्यटनशीलस्य करितुरंगादेरेकत्र स्तंभादौ बंधने यथोपरोधस्तद्वदिति भावः॥ मनसश्चांचल्यादौ गीतावाक्यं प्रमाणयति॥ चंचलं हीति॥ प्रमाथि प्रमथनशीलं पुरुषस्य व्याकुलत्वकारणं बलवत् बलवत्समर्थं निग्राह्यमित्यर्थः॥ दृढं सत्यसति वा विषये लग्नं तत् तदुद्धर्तुमशक्यमित्यर्थः॥ अतस्तस्य मनसो निग्रहो वायोरिव सुदु

ष्करः॥११९॥ मनसो हि निग्रहे बालोऽप्यसमर्थ इत्यर्थः
प्रमापयति॥ अभ्यासेन ...॥१२०॥

प्रवृत्ते तत्तो वैषम्यं दर्शयति ॥ कथनादाविति ॥ श्टंखलाबद्धदेहस्य यथा निर्बंधो न तथा कथनादावित्यर्थः ॥ आदिशब्देन तच्चिंतनादिकं गृह्यते ॥ न केवलं निर्बंधाभावः प्रस्तुत प्रियो विनोदश्चेत्याह ॥ किं त्विति ॥ इतिहासः पूर्ववृत्तकथा आख्यायेषां लौकिककथानुकूलयुक्तिदृष्टांतप्रदर्शनादीनां तत्तथा अनंता असंख्याता अनंता श्चेतेः इतिहासाद्याश्चानंते तिहासा द्यास्तेर्धियो बुद्धेर्विनोदः क्रीडाविशेषो भवति ॥ तत्र दृष्टांतः ॥ नाट्यवदिति ॥ नर्त्यक्रियानिरीक्षणमिवेत्यर्थः ॥ १२१ ॥

कथनादौ न निर्बंधः श्टंखलाबद्धदेहवत् ॥ किं त्वनंतेतिहासाद्यै र्विनोदो नाट्यवद्धियः ॥ १२१ ॥ चिद्देहत्वा जग न्मिथ्यात्वस्य पर्यवसानतः ॥ निदिध्यासनविक्षेपो नेतिहासादिभिर्भवेत् ॥ १२२ ॥ कृषिवाणिज्यसेवादौ का व्यतर्कादिकेष्वपि ॥ विक्षिप्यते प्रवृत्या धीस्तै स्तत्त्वस्मृत्यसंभवात् ॥ १२३ ॥ [illegible] अनुसंदध्यतेवात्र भोजनादौ प्रवर्तितुं ॥ शक्यते त्यंत विक्षेपाभावादाशु पुनः स्मृतेः ॥ १२४ ॥

ननु कथादिभिरप्येतदेकपरत्वविघातः स्यादित्याशंक्याह ॥ चिद्देवेति ॥ इतिहासादीनामात्मा चिन्मात्ररूपो न देहा दिरूपो जगच्च मिथ्येत्येतस्मिन्नर्थे पर्यवसानान्नेतरे तदेकपरत्वद्वाद्वाभिध्येयनिदिध्यासनेस्य विक्षेप इत्यर्थः ॥ १२२ ॥ नन्वितिहासादीनामंगीकारे कृष्यादेरपि प्रसक्तिः स्यादित्याशंक्याह ॥ कृषीति ॥ कृष्यादीनां तत्त्वानुसंधानविघाति त्वेन त्याज्यत्वे भोजनादेरपि तथात्वात्तदपि त्याज्यमेवेत्याशंक्याह ॥ अनुसंदध्यतेवेति ॥ विक्षेपाभावोपि कुत इत्यत आ

॥ तृ० ॥
॥ १९ ॥

ननु तदानीं विक्षेपाभावेपि तत्त्वविस्मृतिसंभवात् पुरुषार्थहानिः स्यादित्याशंक्याह ॥ तत्वेति ॥ कुतस्तर्हि अनर्थ इत्यत
आह ॥ किं त्विति ॥ विस्मरणे सति विपर्ययोपि स्यादित्याशंक्याह ॥ विपर्येतुमिति ॥ १२५ ॥ ननु भोजनादि प्रवृत्तस्येव
तर्काद्यभ्यास प्रवृत्तस्यापि तत्त्वस्मरणं किं न स्यादित्याशंक्याह ॥ तत्त्वस्मृतेरिति ॥ न केवलं तत्त्वानुसंधानाव सराभाव एव
किंतु काव्यतर्काद्यभ्यासस्य तत्त्वाभ्यासविरोधित्वात् तदानीं स्मृतमपि तत्त्वं बलादुपेक्ष्यते इत्याह ॥ प्रसुप्तेति ॥ १२६ ॥ तत्त्वा
नुसंधानविरोधिवाग्व्यवहारस्य त्याज्यत्वे प्रमाणत्वेन तमेवैकं जानथ आत्मानमन्यावाचो विमुंचथामृतस्यैष सेतु
रिति श्रुतिवाक्यमर्थतः पठति ॥ तमेवैकमिति ॥ नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तदित्येतदपि वाक्यं श्रूयत
इत्याह ॥ अनुध्यायेति ॥ १२७ ॥ ननु तत्त्वानुसंधानातिरिक्तमाहारादि यथा न त्यज्यत एवमितरत्काव्याद्यभ्यासोपि क्रियता
मित्याशंक्याह कुर्वाणं प्रत्याह ॥ आहारादिति ॥ १२८ ॥ ननु जनकादीनां तत्त्वविदां कथं राज्यपालनादौ प्रवृत्तिरित्याशंक्याह ॥

त्तत्त्वविस्मृतिमात्रान्नानर्थः किंतु विपर्ययात् ॥ विपर्येतुं न कालोस्ति झटिति स्मरतः क्वचित् ॥ १२५ ॥ तत्त्वस्मृते
रवसरो नास्त्यन्याभ्यासशालिनः ॥ प्रत्युताभ्यासघातित्वाद्बलात्तत्त्वमुपेक्षते ॥ १२६ ॥ तमेवैकं विजानीथ ह्यन्या
वाचो विमुंचथ ॥ इति श्रुतं तथान्यत्र वाचो विग्लापनं त्विति ॥ १२७ ॥ आहारादि त्यजन्नैव जीवेच्छास्त्रांतरं त्यज
न् ॥ किं न जीवसि येनैवं करोष्यत्र दुराग्रहं ॥ १२८ ॥ जनकादेः कथं राज्यमिति चेद्दृढबोधतः ॥ तथा तवापि चेत्तर्कं प

[illegible]

ननु तत्त्वविदः संसारासारतां जानतः कुतस्तत्र प्रवर्तिष्यते इत्याशंक्य प्रारब्धस्यावश्यंभाविफलत्वाद्भोगेन तत्क्षयाय प्रवृत्तिरित्याह ॥ मिथ्यात्वेति ॥ २० ॥ तर्ह्यनाचारेऽपि प्रवृत्तिः स्यादित्याशंक्याह ॥ अतिप्रसंग इति ॥ प्रारब्धवशादेवातिप्रसंगोऽपि स्यादेवेत्याशंक्यांगीकरोति ॥ अस्तु वेति ॥ २१ ॥ ननु ज्ञान्यज्ञानिनोः प्रारब्धकर्मणि एव भोक्तव्यतया समानेऽनयोः

मिथ्यात्ववासनादार्ढ्यं प्रारब्धक्षयकांक्षया ॥ अक्लिश्यन्तः प्रवर्तन्ते स्वस्वकर्मानुसारतः ॥ २२ ॥ अतिप्रसंगो माशंक्यः स्वकर्मवशवर्तिनाम् ॥ अस्तु वा केन शक्येत कर्म वारयितुं वद ॥ २३ ॥ ज्ञानिनोऽज्ञानिनश्चात्र समे प्रारब्धकर्मणि ॥ न क्लेशो ज्ञानिनो धैर्यान्मूढः क्लिश्यत्यधैर्यतः ॥ २४ ॥ मार्गे गन्त्रोर्द्वयोः श्रान्तौ समायामप्यदूरताम् ॥ जानन्धैर्याद्द्रुतं गच्छेदन्यस्तिष्ठति दीनधीः ॥ २५ ॥ साक्षात्कृतात्मधीः सम्यगविपर्ययबाधितः ॥ किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥ २६ ॥ न गम्मिथ्यात्वधीभावादाक्षिप्तौ काम्यकामुकौ ॥ तयोरभावे संतापः शाम्येन्निःस्नेहदीपवत् ॥ २७ ॥

कुतो वेत्यक्षराणि विशिनष्टि इत्याशंक्याह ॥ ज्ञानिन इति ॥ तत्र दृष्टान्तमाह ॥ मार्ग इति ॥ दृष्टमुपपादितमात्मानं चेदिति मंत्रस्य पूर्वार्धमनुवदत्फलप्रदर्शनपरमुत्तरार्धमवतारयति ॥ साक्षादिति ॥ सम्यक् साक्षात्कृतात्मधीः साक्षात्कृतआत्मा यया सा साक्षात्कृतात्मा तादृशा धीर्यस्य स साक्षात्कृतात्मधीः अविपर्ययबाधितः विपर्ययेण देहाद्यात्मबुद्ध्या बाधितो न भवतीत्यविपर्ययबाधितः उभयं हेतुगर्भविशेषणम् ॥ २६ ॥ अस्य मन्त्रांशस्य तात्पर्यमाह ॥ न गमिति ॥ काम्यश्च कामुकश्च काम्यकामुकौ तावाक्षिप्तौ ॥ तन्निराकरणे कारणमाह ॥ न गम्मिथ्यात्वेति ॥ ततः किमत आह ॥ तयोरिति ॥ तयोः काम्यकामुकयोरभावे संतापः ॥ कामनानिमित्तकः कारणमभावकिः(?) चिदृष्टाविधायकसूक्तिः ॥ ३ ॥

त्वः मुकौ स्पः

॥तृ०॥
॥२०॥

काम्याभावात्कामनाभावः कुहकस्यास्य शंकामाह। गंधर्वेति। मायाविनिर्मितेपत्तने स्थितं वस्तु किंचिदपि इदमैंद्रजालिकं निर्मि तमिति जानन् न कामयते। न केवलं कामनाभावः प्रत्युतैतदमनुतमिति हसन् जिहासति परित्यक्तुमिच्छति। दार्ष्टांतिके योजय ति॥ आपातेति। एवमापातरमणीयेषु प्रतीतिमात्ररम्येषु भोगेषु भुज्यंत इति भोगा विषयाः स्रक्चंदनादयस्तेषु एवं विचार वान् आपातरमणीयसानुसंधानवान् नानुरज्यते नासक्तिं करोति किं तु दोषदर्शनेनैतान्परित्यक्तुमिच्छति के ते विषयदोषा

गंधर्वपत्तनेकिंचिदैंद्रजालिकनिर्मितं॥ जानन्कामयतेकिंतु जिहासति हसन्निव॥२६॥ आपातरमणीयेषु भोगेष्वेवं विचारवान्॥ नानुरज्यतिकिंत्वेतान्दोषदृष्ट्या जिहासति॥२७॥ अर्थानामर्जने क्लेशस्तथैव परिपालने॥ नाशे दुः खं व्यये दुःखं धिगर्थाः क्लेशकारिणः॥२८॥ मांसपांचालिकायास्तु यंत्रलोलेंगपंजरे॥ स्नाय्वस्थिग्रंथिशालि न्याः स्त्रियाः किमिव शोभनं॥२९॥ एवमादिषु शास्त्रेषु दोषाः सम्यक्प्रपंचिताः॥ विमृशन्ननिशं तानि कथं दुःखेषु मज्जति॥३०॥

इत्यत आह॥ अर्थानामिति॥२८॥ एवं विषयाणां दुःखहेतुतां प्रदर्श्याशोभनतां कश्चिद्दूषयति॥ मांसेति॥ स्नाय वः शिराः अस्थीनि प्रसिद्धानि ग्रंथयो मांसनिचयरूपाः स्तनादयः एतैः सहिता या मांसपांचालिका या योषित्तो यंत्रलोले यंत्रवच्चलनशीले अंगपंजरे अंगान्येव पंजरं नीडं तस्मिन् शरीरे किं शोभनमिव न किमपीत्यर्थः॥२९॥ एवमादिष्विति आदिशब्देन तल्पस्नसरुधिरबाष्पादि पृथक्कृत्वा विलोचने॥ समालोकय रम्यं चेत्किं मुधा परिमुह्य

वैराग्य टी० श्लो० ॥३०॥

विषयदोषदर्शने सति भोगेच्छाभावे युक्तिसहितं दृष्टान्तमाह। क्षुधयेति। स्वपममृदो विवेकी मिष्टान्नभोजने न धृत्वा विनष्टा तृट् तृष्णा आकांक्षा यस्य स तु यथा लोकः दंदविष[illegible]मिश्रं वान्नं स्वल्पं न जिघत्सति मान्नुमिच्छतीत्यर्थः॥ ननु प्रारब्ध[illegible]वशेन प्रबलत्वात् तज्ज्ञानिनोऽपीच्छा भवेदित्याशंक्य तस्यापीच्छा पापप्रतिपूरःसरं न भुंक्त इत्याह। प्रारब्धेति। कथमेतदवगम्यत इत्याशंक्य लोकदृष्टान्तादित्याह॥ भुंजाना नाना इति। ननु तत्त्वविदां संसारनिमित्तकस्तापोऽस्तु वे

क्षुधया पीड्यमानोऽपि न विषाद्यन्नमिच्छति। मृष्टान्नध्वस्ततृड्जानन् न मूढस्तज्जिघत्सति॥ ४१॥ प्रारब्धकर्मप्राबल्याद्भोगेष्विच्छा भवेद्यदि। क्लिश्यन्नेव तदाप्येष भुंक्ते विष्टिगृहीतवत्॥ ४२॥ भुंजाना नाना अपि बुधाः श्रद्धावन्तः कुटुंबिनः। नाद्यापि कर्म नश्छिन्नमिति क्लिश्यन्ति संततम्॥ ४३॥ नायं क्लेशोऽत्र संसारतापः किन्तु विरक्तता। भ्रान्तिज्ञाननिदानो हि तापः सांसारिकः स्मृतः॥ ४४॥ विवेकेन परिक्लिश्यन्नल्पभोगेन तृप्यति। अन्यथानन्तभोगेऽपि

पञ्चः ज्ञानेवैयर्थ्यापातादित्याशंक्याह॥ नायमिति॥ अयं क्लेशः नाद्यापि कर्म न च्छिन्नमित्येवमनुतापात्मकः संसारतापो न भवति किंत्वत्र संसारे विरक्तता आसक्तिरहितता॥ तापकत्वाभावे युक्तिमाह॥ भ्रान्तीति॥ हि यस्मात्कारणात्सांसारिकस्तापो भ्रान्तिज्ञाननिदानः भ्रान्तिज्ञानकारणकः स्मृतः पूर्वाचार्यैः अयं तु विवेकज्ञानमूलत्वान्न तथा विपर्यय इत्यर्थः॥ ४४॥ अयं क्लेशो विवेकमूल एवेति कुतोऽवगम्यत इत्याशंक्य कामनिवर्तकत्वाद्विवेकमूल इत्याह॥ विवेके

हेतु भोग

विवेकिन इवाविवेकिनोपि भोगेनैव तृप्तिः स्यादतो [illegible] विवेको प्रयोजक इत्याशंक्यात्र तृप्तिहेतुत्वाभावप्रतिपादिकां श्रुतिं पठति ॥ न जात्विति ॥ विवेकमूलस्य भोगस्य तृप्तिहेतुत्वमनुभवसिद्धमित्या[illegible]ह ॥ परित्तायेति ॥ अयं भोग एतावानेव प्रयाससाध्य इत्येवमनुभवपूर्वकश्चेदलं बुद्धिरुत्पद्यत इत्यर्थः ॥ ननु तृष्णाहेतोर्भोगस्य विवेकसाहचर्यमात्रेण कथं तुष्टिकरत्वमित्याशंक्य सहकारिविशेषवशाद्विपरीतकार्यकरत्वं लोके दृष्टमित्याह ॥ वित्तायेति

न जातु कामः कामानामुपभोगेन शाम्यति ॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥१४६॥ परित्तायोपभुक्तो हि भोगो भवति तुष्टये ॥ वित्तायसे वित्तश्चोरो मैत्रीमिति न चोरता ॥१४७॥ मनसो निगृहीतस्य लीलाभोगोल्पकोपि यः ॥ तमेवालब्धविस्तारं क्लिष्टत्वाद्बहु मन्यते ॥१४८॥ बद्धमुक्तो महीपालो ग्राममात्रेण तुष्यति ॥ परैर्न बद्धो नाक्रांतो न राष्ट्रं बहु मन्यते ॥१४९॥ विवेके जाग्रति सति दोषदर्शनलक्षणे ॥ कथमारब्धकर्मणि

अयं चोर इति ज्ञात्वा तेन सह वर्तमानस्य पुरुषस्य न चोरो भवति किंतु मित्रतामेतीत्यर्थः ॥१४७॥ ननु कामना स्वरसत्वान्मनसः कथं स्वल्पभोगेन तृप्तिः स्यादित्याशंक्य निदिध्यासेन निगृहीतस्यात्तथात्वाद्भवत्येव तृप्तिरित्याह ॥ मनस इति ॥ निगृहीतस्य योगाभ्यासेन वशीकृतस्य मनसः अल्पकोपि स्वल्पोपि लीलाभोगो लीलानुभवो योस्ति अलब्धविस्तारमप्राप्तबाहुल्यं तमेव भोगं क्लिष्टत्वाद्दोषयुक्तत्वाद्बहु मन्यते न जानातीत्यर्थः ॥१४८॥ निगृहीतस्य मनसः स्वल्पभोगेनापि तृप्तिर्भवतीति दृष्टांतमाह ॥ बद्धमुक्त इति ॥१४९॥ ननु प्रारब्धकर्मप्राबल्याद्भोगेषु

इच्छा

दोषदर्शनेसत्यपीच्छाजन्मसंभविष्यति प्रारब्धस्य नानाप्रकारत्वादित्तिमपरिहरति ॥ नैषदोष इति ॥ नानाप्रकारत्व
मेवदर्शयत्ति ॥ इच्छेति ॥ जनकस्वनिच्छया भोगप्रदं परेच्छया भोगप्रदं चेति त्रिविधमित्यर्थः ॥ इच्छा प्रारब्धं दर्श
यत्ति ॥ अपथ्यसेविन इति ॥ अपथ्यसेवादीच्छायाः प्रारब्धफलत्वं कुतोवगम्यत इत्याशंक्यापरिहार्यत्वादित्यभि
प्रेत्याह ॥ न चेति ॥ अस्मिंल्लोके अपथ्यादीच्छतीत्येतत्कुत इत्यत आह ॥ यत इति ॥ गीतावाक्यं पठति ॥ सदृशमिति ॥

नैषदोषो यतोनेकविधं प्रारब्धमिष्यते ॥ इच्छानिच्छा परेच्छा च प्रारब्धं त्रिविधं स्मृतं ॥१५१॥ अपथ्यसेविन
श्चोरा राजदाररता अपि ॥ जानंत एव स्वानर्थमिच्छंत्यारब्धकर्मतः ॥१५२॥ न चात्रैतद्वारयितुमीश्वरेणापि
शक्यते ॥ यत ईश्वर एवाह गीतायामर्जुनं प्रति ॥१५३॥ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ॥ प्रकृतिं याति
भूतानि निग्रहः किं करिष्यति ॥१५४॥ अवश्यंभाविभावानां प्रतीकारो भवेद्यदि ॥ तदा दुःखैर्न लिप्येरन्नलरा
मयुधिष्ठिराः ॥१५५॥ नचेश्वरत्वमीशस्य हीयते तावता यतः ॥ अवश्यंभाविताप्येषामीश्वरेणैव निर्मिता ॥

विवेकज्ञानवानपि पुरुषः स्वस्याः स्वीयायाः प्रकृतेः सदृशमनुरूपं चेष्टते प्रकृतिर्नाम धर्माधर्मादिसंस्कारो वर्त
मानजन्मादावभिव्यक्तः किंतु सर्वेस्तस्मात्प्रकृतिं यांति भूतानि निग्रहः प्रवृत्तिनिरोधो निरोधो मयान्येन वा कृतः
किं करिष्यति न किमपीत्यर्थः ॥ तीव्रप्रारब्धस्यापरिहार्यत्वे वचनांतरसंमतिमाह ॥ अवश्यमिति ॥ अवश्यंभा
विभावानां दुःखानामित्यर्थः ॥ प्रारब्धस्यापरिहार्यत्वे तत्परिहारासमर्थस्येश्वरस्यानीश्वरत्वप्रसंग इत्याशं

एवं सप्रपंचमनिच्छाप्रारब्धमभिधायानिच्छाप्रारब्धं वक्तुमारभते॥ प्रश्नोत्तराभ्यामिति॥ अनिच्छापूर्वकं च प्रारब्धमस्ति
एतदर्जुनकृष्णयोः प्रश्नोत्तराभ्यामेव गम्यते इत्यायतदृत्तियोजना॥ तदभिधानाय शिष्यमभिमुखीकरोति॥ शृण्विति
तत्रार्जुनस्य प्रश्नं तावद्दर्शयति॥ अथ केनेति॥ हे वार्ष्णेय वृष्णिसंबंधिन् अयं पूरुषः केन प्रयुक्तः प्रेरितः अनिच्छन्न
पि इच्छामकुर्वन्नपि रागात् बलान्नियोजित इव पापं चरति आचरति॥ कृष्णस्योत्तरमाह॥ काम इति॥ एष पुरुषप्रवर्तकः

प्रश्नोत्तराभ्यामेवैतद्गम्यतेर्जुनकृष्णयोः॥ अनिच्छापूर्वकं चास्ति प्रारब्धमिति तच्छृणु॥१५७॥ अथ केन प्रयुक्तोयं
पापं चरति पूरुषः॥ अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥१५८॥ काम एष क्रोध एष रजोगुणसमुद्भवः॥
महाशनो महापाप्मा विद्ध्येनमिह वैरिणं॥१५९॥ स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा॥ कर्तुं नेच्छसि यन्मोहा
त्करिष्यस्यवशोपि तत्॥१६०॥ रजोगुणसमुद्भवः रजोगुणात्समुत्पत्तिर्यस्य स रजोगुणसमुद्भवः कदाचित्क्रो
धरूपेण परिणमति ततः क्रोधः स पुनः कीदृशः महाशनः महदशनं विषय[illegible]जातं यस्य स महाशनः महापा
प्मा महतः पापस्य हेतुत्वादुपचारान्महापाप्मत्वमस्य अतः इह संसारे एनं कामं क्रोधरूपं वैरिणं विद्धि॥ अयमभिप्रायः
प्रारब्धवशाद्दुरितकृत् रजोगुणकार्ययोः कामक्रोधयोरन्यतरस्यैव पुरुषप्रवर्तकत्वेन प्रवृत्तीच्छायादिति॥ ननु अत्र
कामक्रोधयोरेव पुरुषप्रवर्तकत्वमुपलभ्यते नानिच्छाप्रारब्धस्येत्याशंक्य तस्यैव प्रवर्तकत्वप्रतिपादकं तद्वाक्यं
पठति॥ स्वभावजेनेति॥ हे कौंतेय स्वेनैवानुष्ठितेनात एव स्वकीयेन प्रारब्धेन कर्मणा निबद्धः सन् यत्कर्तुं नेच्छसि तत्

दपि मोहादविवेकत्तोपवशः परवशः करिष्यसीत्यतोनि
च्छाप्रारब्धमस्तीत्यभ्युपगंतव्यमिति भावः॥१६०॥

इदानीं परेच्छाप्रारब्धमस्तीत्याह ॥ नानिच्छन्त इति । अनिच्छतोऽपि न भवति इच्छतोऽपि न भवति किंतु परदाक्षिण्यसंयुताः से इदानीं परेच्छाप्रारब्धमस्तीत्याह ॥ अतः ...

तस्मात्सीत्यर्थमेव सुखदुःखमनुभवंति । अतः तत्सुखादि देहभोगहेतुभूतं परेच्छापूर्वकं प्रारब्धं प्रसिद्धमित्यर्थः ॥ अतः तत्स्वेच्छाजनकत्वेन निवारयितुं शक्यते इति भावः ॥१६१॥ ननु तत्त्वविदो वदोषदर्शने सत्यपि प्रारब्धस्यापरिहार्यत्वात् स्वेच्छाजनकत्वेन निवारयितुं ... कथमिति । किमिच्छन्निति वनेन वाक्येन कथमिच्छाभावो वर्णितः पीच्छांगीकारे किमिच्छन्निति श्रुतिविरोध इति शंकते ॥ कथमिति । किमिच्छन्निति ... समर्थमप्रवृत्तिजनकत्वेनास्तीति बोध्यत इति परिहरति ॥ इत्यर्थः ॥ नानेच्छाने भावोऽभिधीयते किंतु सत्ता अपि तस्याः समर्थम...

नानिच्छन्तो न चेच्छन्तः परदाक्षिण्यसंयुताः ॥ सुखदुःखे भजन्त्येतत्परेच्छापूर्वकर्म हि ॥१६१॥ कथं तर्हि किमिच्छन्नित्येवमिच्छा निषिध्यते ॥ नेच्छानिषेधः किंत्विच्छाबाधो भर्जितबीजवत् ॥१६२॥ भर्जितानि च बीजानि सन्त्यकार्यकराणि च ॥ विद्वदिच्छा तथेष्टव्याऽसत्त्वबोधान्न कार्यकृत् ॥१६३॥ दग्धबीजमरोहेऽपि भक्षणायोपयुज्यते ॥ विद्वदिच्छाप्यल्पभोगं कुर्यान्न व्यसनं बहु ॥१६४॥

नेच्छति ॥ स्वरूपेण सत्ता अपि तस्याः सामर्थ्यराहित्ये दृष्टांतमाह ॥ भर्जितेति ॥१६२॥ संक्षेपेणोक्तमर्थं प्रपंचयति ॥ भर्जितानीति । यथा भर्जितानि बीजानि स्वयं स्वरूपेण विद्यमानान्यपि नांकुरादिकार्यकराणि भवंति । तथा विद्वदिच्छा स्वयं विद्यमाना पीष्यमाणपदार्थस्यासत्त्वज्ञानेन बाधितत्वान्न व्यसनादिकार्यक्षमेत्यर्थः ॥१६३॥ ननु विदुष इच्छेव नांगीकर्तव्या फलाभावादित्याशंक्य फलाभावोऽसिद्धो भोगलक्षणफलसद्भावादिति सदृष्टांतमाह ॥ दग्धबीजमिति । दग्धं भर्जितमिति यावत् । व्यसनं विपदादिरूपं बहुविधं ॥ व्यसनं विपदि भ्रंशे दोषकामजकोपजे इत्यभिधानात्

॥२०॥
॥२३॥

ननु मोर्भैव भोगद्वारा व्यसनमपि जनयेदित्याशंक्याह ॥ भोगेनेति ॥ प्रारब्धकर्मणो भोगमात्रेण हेतुत्वान्न व्यसनजनकत्व
मित्यर्थः । कुतस्तर्हि व्यसनजन्मेत्यत आह ॥ भोक्तव्येति ॥ तत्र तस्मिन्विषये ॥ ९५ ॥ व्यसनहेतुर्दर्शयति ॥ मा विनश्यत्वि
ति । अयं भोगो मा विनश्यत्वेष उत्तरोत्तरं वर्द्धतां विघ्नाश्चैनं मा प्रतिबध्नन्तु अस्य प्रतिबंधनं कुर्वन्तु अस्मादेव भोगादहं
धन्यः कृतार्थोऽस्मीत्येवंरूपो भ्रमो भवति तत्तश्च व्यसनमित्यर्थः ॥ ९६ ॥ प्रसंगादस्य परिहारोपायमाह ॥ यदभावीति ॥
यद्भवितुमयोग्यं तन्न भवेदेव भवितुं योग्यं चेत्तदन्यथा न भवेदेवेत्येवंरूपः चिंताविषघ्नः इदं मे श्रेयः कदा भविष्यती

भोगेन चरितार्थत्वात्प्रारब्धं कर्म हीयते ॥ भोक्तव्यसत्यताभ्रान्त्या व्यसनं तत्र जायते ॥ ९५ ॥ मा विनश्यत्वयं
भोगो वर्द्धतामुत्तरोत्तरं ॥ मा विघ्नाः प्रतिबध्नन्तु धन्योऽस्म्यस्मादिति भ्रमः ॥ ९६ ॥ यदभावि न तद्भावि भावि चे
न्न तदन्यथा ॥ इति चिंताविषघ्नोयं बोधो भ्रमनिवर्तकः ॥ ९७ ॥ समेऽपि भोगे व्यसनं भ्रान्तो गच्छेन्न बुद्ध
वान् ॥ अशक्यार्थस्य संकल्पाद्भ्रान्तस्य व्यसनं बहु ॥ ९८ ॥ मायामयत्वं भोगस्य बुद्ध्वास्थामुपसंहरन् ॥ भुंजा
नोऽपि न संकल्पं कुरुते व्यसनं कुतः ॥ ९९ ॥

दमनिष्टं करानिरतिशयतरसेव मारिरिति चिंतैव विषमिव स्वसंसृष्टपुरुषस्य नाशहेतुत्वाद्दूषमिदं चिंताविषं हंतीति चिंताविषघ्नः ए
वंभूतो यो बोधः सोऽयं भ्रमनिवर्तकः पूर्वोक्तभ्रमस्य निवर्तक इत्यर्थः ॥ ९७ ॥ ननु विदुषविदुषोरुभयोरपि भोगिसादि
शेषेऽत्कस्य व्यसनमपरस्य नेति तन्न सेतल्क्तमाशंक्य विपरीतत्तानस्य सत्त्वासत्त्वाभ्यां तत्सिद्धिरित्याह ॥ समेपीति बुद्धवान् ज्ञा
नवान् ज्ञानीत्यर्थः । भ्रान्तेः कथं व्यसने हेतुत्वमित्यत आह ॥ अशक्येति ॥ विवेकिनः स्वदभावं दर्शयति ॥ मायामयत्वमिति ॥ ९ ॥

46

ननु मायामयत्वबोधे सत्यपि भोग्यस्य तदानीं तत्सुखहेतुत्वात् तत आसक्तोऽपि संभूतः स्यादित्याशंक्य बहुविधदोषदर्शनादित्याह। स्वप्ने इ-
न्द्रजालेति। ननु स्वप्नेन्द्रजालसादृश्यापादितानेकसत्यासत्त्वाभावो न भवेत्तदेव कुतो जायते इत्याशंक्य तज्जन्मोपायमाह। स्वस्वप्नमि-
ति। स्वकीयं स्वप्नमपरोक्षतया दृष्ट्वा स्वकीयं च जागरमनुभवन् स्वप्नजागरावुभावप्यप्रमत्तः सन्मुहुश्चिन्तयेत् स्वप्नतुल्यत्वाय जागरं दृ-
ति। एवं तयोः सर्वसाम्यतात्कालिकभोगहेतुत्वपरिणामविरसत्वविनाशित्वादिलक्षणं चिरमनुसंधाय जागरेऽपि सत्यत्वबुद्धि-

स्वप्ने इन्द्रजालसदृशमचिन्त्यरचनात्मकं। दृष्टनष्टं जगत्पश्यन्कथं तत्रानुरज्यति॥७०॥ स्वस्वप्नमापरोक्ष्येण दृष्ट्वा पश्यन्स्वजा-
गरं। चिन्तयेदप्रमत्तः सन्नुभावनुदिनं मुहुः॥७१॥ चिरं तयोः सर्वसाम्यमनुसंधाय जागरे। सत्यत्वबुद्धिं संत्यज्य नानुरज्य-
ति पूर्ववत्॥७२॥ इन्द्रजालमिदं द्वैतमचिन्त्यरचनत्वतः। इत्यविस्मरतो हानिः का वा प्रारब्धभोगतः॥७३॥

परित्यज्य नानुरज्यति पूर्ववज्जगत्सत्यत्वहानात् दृष्टनष्टमिव नानुरज्यति अनुरज्यतिः अनुरक्तो न भवतीत्यर्थः॥ ननु प्रपञ्चगोचरस्य
मिथ्यात्वज्ञानस्य विषयसत्यत्वलोपकत्वे विना भोगस्य स्वरूपस्य विधीयमानः मिथ्यात्वज्ञाने सति कथं भोगसिद्धिरित्याशंक्य भोगस्य
विषयसत्यत्वापेक्षाभावान्न विरोध इति परिहरति। इन्द्रजालमिति। इदं द्वैतं भोग्यजातमचिन्त्यरचनत्वादिन्द्रजालवन्मिथ्ये-
ति पुनस्तथानुसंधानाविस्मरतो विदुषः प्रारब्धभोगतः प्रारब्धकर्मफलयोः सुखदुःखयोरनुभवेन मिथ्यात्वानुसंधानस्य का हा-
निः वा न हानिः मिथ्यात्वानुसंधाने न वा भोगस्य का हानिः विभिन्नविषयत्वादिति भावः॥७३॥ ७॥ ७॥ ७॥

॥२०॥
॥२४॥

विभिन्नविषयत्वमेव दर्शयति ॥ निर्बध्य इति । तत्त्वविद्या मा जगत्तत्त्वगोचरस्य ज्ञानस्य इंद्रजालवज्जगतो मिथ्या
त्वानुसंधाने निर्बध्नोऽपि न तु भोगापलापः । प्रारब्धकर्मणस्तु जीवस्य सुखदुःखयोः प्रदाने आग्रहो न तु भोगसत्यत्वा
पादने इति भावः ॥ ७७ ॥ एवं विभिन्नविषयत्वं प्रदर्श्य प्रयोगमाह ॥ विद्येति । यविद्याप्रारब्धकर्मणी परस्परं
न विरुध्येते विभिन्नविषयत्वात् संप्रतिपन्नरूपरसज्ञानवदित्यर्थः ॥ भोग्यमिथ्यात्वज्ञानं भोगबाध्यकं न भ
वति ... अत्र दृष्टान्तमाह ॥ ज्ञानद्भिरिति । ऐन्द्रजालविनोदे इन्द्रजालसंबन्धी चमत्कारविशेषः

निर्बध्यते तत्त्वविद्या इंद्रजालत्वसंस्मृतौ ॥ प्रारब्धस्याग्रहो भोगे जीवस्य सुखदुःखयोः ॥ १७४ ॥
विद्यारब्धे विरुध्येते न भिन्नविषयत्वतः ॥ जानद्भिरप्यैन्द्रजालविनोदो दृश्यते खलु ॥ १७५ ॥
जगत्सत्यत्वमापाद्य प्रारब्धं भोजयेद्यदि ॥ तदा विरोधि विद्याया भोगमात्रान्न सत्यता ॥ १७६ ॥

जानद्भिरपीन्द्रजालत्वं जानद्भिरप्यवलोक्यते खल्विति प्रसिद्धमित्यर्थः ॥ १७५ ॥ किं च विद्याप्रारब्धकर्मणोर्वि
रोधोऽस्तीति वदन् प्रष्टव्यः ॥ किं प्रारब्धकर्म विद्याविरोधीत्युच्यते उत विद्या प्रारब्धकर्मविरोधिनीति । नाद्य
इत्याह ॥ जगत्सत्यत्वमिति । प्रारब्धकर्म जगतो भोग्यजातस्य सत्यत्वमबाध्यत्वमापाद्य संपाद्य यदि भोजयेत्
जीवस्य सुखदुःखे दद्यात्तदा विद्याविषयस्य मिथ्यात्वस्यापहाराद्विद्याया विरोधि स्यान्न च तथा करोति किं
तु भोगमेव प्रयच्छति । अतो न विद्याविरोधि प्रारब्धमिति भावः ॥ भोगबलादेव भोग्यस्य सत्यत्वमपि स्यादित्यत आह

तान ५

ननु मिथ्यापदार्थे भोगो भवतीत्यत्र दृष्टान्तो नास्तीत्याशंक्याह। अन्यून इति॥७७॥ नापि च्छित्ती यद्यस्याहाय यदीति। विद्या
यदि जगद्भोग्यजातमपह्नुवीत तेनेदं जगन्मिथ्येति निषेधं कृत्वा नवत्प्रतीयमानस्य भोग्यस्य स्वस्वरूपं विलापयेत्तु। तदा प्रार
ब्धकर्मभोग्यस्य सुखदुःखानुभवस्य साधनापहारेण प्रारब्धकर्मविघातिनी स्यात् न च तथा करोति किंतु मिथ्यात्वमे
व बोधयति अतो न प्रारब्धकर्मविरोधिनीति भावः॥ ननु मिथ्यात्वबोधनादेव स्वरूपमपि विलोपयेदित्याशंक्याह॥
न खित्ति इन्द्रजालादेः स्वरूपविलोपनमन्तरेणापि मिथ्यात्वदर्शनादिति भावः॥७८॥ एतदेव प्रपञ्चयति। अनपह्नुत्येति

अन्यूनो जायते भोगः कल्पितैः स्वप्नवस्तुभिः॥ जाग्रद्वस्तुभिरप्येवमसत्यैर्भोग इष्यतां॥७७॥ यदि विद्यापह्नुवीत
जगत्प्रारब्धघातिनी॥ तदा स्यान्न तु मायात्वबोधेन तदपह्नवः॥७८॥ अनपह्नुत्य लोकास्तदिन्द्रजालमिदं त्विति॥
जानन्त्येवानपह्नुत्य भोगं मायात्वधीस्तथा॥७९॥ यत्र त्वस्य जगत्स्वात्मा पश्येत्कस्तत्र केन किं॥ किं जिघ्रेत्किं वदेद्वेति

लोकास्तदिन्द्रजालस्वरूपमनपह्नुत्यानिरस्य इदमिन्द्रजालमिति जानन्ति यथा तथा भोग्यमनपह्नुत्याविलाप्य मायात्वधी
र्जगन्मिथ्यात्वज्ञानं भवतीत्यर्थः॥७९॥ यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतिर्द्वैतदर्शनं द्वैताभावबोध्य
यति अतो विद्योत्पद्यमाना जगद्विलापयेदेव एवं सति विदुषो भोगः कथं स्यादिति शङ्किते श्लोकद्वयेन॥ यत्रेति। यत्र यस्यां
विद्यावस्थायां कृत्स्नं जगत्तस्य विदुषः स्वात्मैवाभूदिदं सर्वं यदयमात्मेति ज्ञानेन स्वरूपमेव भवति तत्र तस्यां दशायां को
द्रष्टा केन साधनेन चक्षुषा किं दृश्यरूपजातं पश्येदेवं घ्राणलक्षणेन केन साधनेन किं कुसुमादिकं जिघ्रेत्किं वा वाच्यं केन वा

श्रुसरभेन।

संप्रदायो

तत्रः किमित्यत आह ॥ तेनेति । स्वाप्ययसंपत्त्योरन्यतरापेक्षया विस्पष्टं हि तस्मिन् सूत्रे यत्तस्योदाहृतायाः ।
श्रुतेः सुषुप्तिमोक्षयोरन्यतरविषयत्वेन व्याख्याततत्वान्न विद्ययानगादपन्हवं इति परिहरति ॥ स्वप्येति ॥ १ ॥ स्वाप्य
यः संपत्तिः सुषुप्तिर्मुक्तिरित्यर्थः ॥ १८२ ॥ अस्याः श्रुतेः सुषुप्त्यादिविषयत्वानंगीकारे बाधकमाह ॥ अन्यथेति । तत्रोप
पत्तिमाह ॥ द्वैतदृष्टाविति । यात्वत्सुख्यादिर्यदि द्वैतपन्हवेनाहितदा द्वैतज्ञानाभावान्नाचार्यो भवेदथ द्वैतेन पन्हूयतेत
र्हि बोध्यशिष्याद्यनुपलंभादाचार्यवाक् शिष्यप्रतिबोधनाय न प्रवर्तेत तो विद्याविच्छेदप्रसंग इति भावः ॥ १८३ ॥

तेनाद्वैतमपन्हुत्य विद्योदेति न चान्यथा ॥ तथाच विदुषो भोगः कथं स्यादिति चेच्छृणु ॥ १८१ ॥ सुषुप्तिविषया
मुक्तिविषया वा श्रुतिस्त्विति ॥ उक्तं स्वाप्ययसंपत्त्योरिति सूत्रे ह्यतिस्फुटं ॥ १८२ ॥ अन्यथा याज्ञवल्क्यादेरा
चार्यत्वं न संभवेत् ॥ द्वैतदृष्टावविद्वत्ता द्वैतादृष्टौ न वाग्वदेत् ॥ १८३ ॥ निर्विकल्पसमाधौ तु द्वैतादर्शनहेतुतः
सैवापरोक्षविद्येति चेत्सुषुप्तिस्तथा न किं ॥ १८४ ॥ आत्मतत्त्वं न जानाति सुप्तौ यदि तदा त्वया ॥ आत्मधीरेव विद्ये
ति वाच्यं न द्वैतविस्मृतिः ॥ १८५ ॥

ननु याज्ञवल्क्यादीनामाचार्यत्वदशायां विद्यमानस्य ज्ञानस्य विद्यात्वमस्त्येव तथापि तस्य नापरोक्षविद्यात्वं द्वैतदर्श
नसद्भावान्निर्विकल्पसमाधौ तु द्वैतदर्शनात् सैवापरोक्षविद्येति शंकते ॥ निर्विकल्पेति । द्वैताप्रतीतेरप्रसंगात्पादकत्वा
न्नैवमिति परिहरति ॥ सुषुप्तिरिति ॥ १८४ ॥ अतिप्रसंगपरिहारं शंकते । आत्मतत्त्वमिति । सुप्तौ द्वैतदर्शनाभावेपि
आत्मागोचरत्वान्नाविद्यात्वं तस्याः इत्यर्थः ॥ तर्हि प्राप्ताप्राप्तविवेकेन ज्ञानस्यैव विद्यात्वं न द्वैतदर्शनाभावस्येत्याह ॥

भावा न ति

तनुद्वैतादर्शनास्य सत्वात योरुभयोर्मिलितयोरेव विद्यात्वे नैकैकस्येति शंकते॥ उभयमिति॥ द्वैतविस्मृतेरपि विद्यात्वं तामंगीका
रेण उस्याप्यर्द्धविद्यावत्त्वप्रसंग इति परिहरति॥ तर्हीति॥ अत्रोपपत्तिमाह॥ सकलेति॥ १८६॥ अस्मिन्नेव पक्षे समाधिव
तां पुरुषाणामर्द्धविद्यावत्त्वमपि न स्यादिति सोपहासमाह॥ मन्नकेति॥ घटादीनां यथा द्वैतविस्मरणं दृढं तथा न तव समाधौ
द्वैतविस्मरणं न संभवति ध्वन्यादीनामनेकेषां विक्षेपाणां सद्भावादित्यर्थः॥ १८७॥ नन्वासन्नानस्यैवं नेद्वैतविस्मृतेरितिशं॰ रिद्यात्वं
कते॥ आलस्यधीरिति॥ तदस्माकमिष्टमेवेत्यभिप्रायेण शुचीर्वादयति॥ तर्हीति॥ नन्वालस्यधीरेव विद्यासादुष्टचित्तेन संभव

उभयं मिलितं विद्या यदि तर्हि घटादयः॥ अर्द्धविद्याभाजिनः स्युः सकलद्वैतविस्मृतेः॥ १८६॥ मन्नकध्वनिमुख्या
नां विक्षेपाणां बहुत्वतः॥ तव विद्या तथा न स्याद्घटादीनां यथा दृढा॥ १८७॥ आलस्यधीरेव विद्येति यदि तर्हि सुखीभव
दुष्टचित्तं निरुध्याथ निरुंधि त्वं यथासुखं॥ १८८॥ तदिष्टमेव व्यमायामयत्नस्य समीक्षणात्॥ इच्छन्नप्यत्तत्व
न्नेच्छ किमिच्छन्निति हि श्रुतं॥ १८९॥

स्यतश्चित्तदोषपरिहाराय चित्तवृत्ति नि रोधः कार्य इति शंकामनुभाषते॥ दुष्टचित्तमिति॥ तदंगीकरोति॥ निरुंधीति॥
तदिष्टमिति॥ अस्माकमिति शेषः॥ कुत इत्यत आह॥ एष्टव्य इति॥ चित्तदोषापगमे सत्यद्वितीयात्मज्ञानायेष्यमाणं
जगन्मायात्वस्य सम्यगीक्ष्यते यतो तदिष्टमित्यर्थः॥ एवं किमिच्छन्निति मंत्रांशेनाभिप्रेतमर्थमुपसंहरति॥ इच्छन्नि
ति॥ इच्छन्नप्ययं नेच्छेदतः किमिच्छन्निति श्रुतमिति योजना॥ १८९॥ ॥ ॥ ॥

पादि२

॥२६॥

एवमभिप्राय वर्णनेकारणमाह ॥ रागो लिंगमिति ॥ रागो लिंगमबोधस्य चित्तव्यापारभूमिषु । कृतस्माद्दुल्लता तस्य पुष्पा ग्निः कोटरे तरोरिति । ननु विद्वेषो रागनिषेधपरशास्त्रे ॥ शास्त्रार्थस्य समाप्तत्वान्मुक्तिस्यात् तावतामिते ः रागादयः सन्तु का मं तैर्न द्वावोऽपराध्यत इति तस्य वरागे ऽगीकारे परशास्त्र एव च सति तत्त्व विरोध इ संगाभावि सति त्वां ... यमा ... मथैव दृश्यति । अविरोधतः ॥ रागनिषेधपरस्य शास्त्रस्य रागाविषयत्वात् तदभ्युपगमपरस्य रागाभाव विषयत्वादिति भावः ॥ एवं किमिच्छन्निति शास्त्राभिप्रायमुपवर्ण्य कस्य कामायेत्यस्या अभिप्रायमाह । जगदिति । यथा जगन्मिथ्यात्वबोधे न वास्त

रागो लिंगमबोधस्य सन्तु रागादयो बुधे । इति श्लोकार्थमेवं सत्य विरोधतः ॥१०॥ जगन्मिथ्यात्ववस्वात्माः संगतस्य समीक्षणात् ॥ कस्य कामायेति वचो भोक्त्रभाव विवक्षया ॥११॥ पतिजायादिकं सर्वं तत्तभोगाय नेच्छति ॥ किं त्वात्मभोगार्थमिति श्रुतावुद्घोषितं बहु ॥१२॥ वस्तुत आत्माभावविवक्षया किमिच्छन्नित्युक्त्वमेवमात्मनोऽसंग

त्वबोधे न वास्तव भोक्त्रभाव विवक्षया कस्य कामायेति श्रुत्योक्तमित्यर्थः ॥१२॥ न त्वात्मनो भोक्तृत्वप्रतिषेधः ... त्वं ... त्वपूर्वको वक्तव्यः सा तु न विद्यते संगहानाद्यमनरस्या श्रुत्यतस्य त्वानुभव सिद्धत्वान्मेवमित्यभिप्रेत्य तदनुवादिकां श्रुतिम र्थतोऽनुक्रामति । पतिजायादिकमिति । न वा अरे पत्युः कामाय पतिः प्रियो भवतीत्यारभ्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्यंतेन वाक्यसंदर्भे ण पतिजायादिवस्तुषु आत्मन एवात्मनो भोग साधनसंपादनापास्य ते तस्मात्मनो भोक्तृत्व

एवमात्मनो भोक्तृत्वं प्रदर्श्य देहेन पर्यवसाय भोक्तारं विविनक्ति किं कूटस्थ इति। [illegible] किं कूटस्थस्य भोक्तृत्वमु
त चिदाभासस्य किं वोभयात्मकस्येति विकल्पार्थः। तत्र प्रथमं प्रत्याह तत्र न कूटस्थ इति॥ असंगत्वमस्तु भोक्तृत्वम
प्यस्तु को दोष इत्याशंक्याह सुखदुःखेति। सुखित्वदुःखित्वाभिमानलक्षणो विकारो भोगः। सोऽसंगकूटस्थस्य न युज्य
ते। कूटस्थत्वविकारित्वयोरेकत्र समावेशायोगादित्यर्थः॥ ननु तर्हि विकारित्वाच्चिदाभासस्य भोक्तृत्वं स्यादित्याशं
क्य विकारित्वेऽपि निरधिष्ठानस्य तस्यैवासिद्धेर्नैवमिति परिहरति॥ विकारीति। चिदाभासस्य विकारिबुद्ध्युपाध्य

किं कूटस्थश्चिदाभासोऽथवा किं वोभयात्मकः॥ भोक्ता तत्र न कूटस्थोऽसंगत्वाद्भोक्ततां व्रजेत्॥ १९३॥ सुखदुः
खाभिमानाख्यो विकारो भोग उच्यते॥ कूटस्थश्च विकारी चेत्येतन्न व्याहतं कथं॥ १९४॥ विकारिबुद्ध्यधी
नत्वादाभासे विकृतावपि॥ निरधिष्ठानविभ्रान्तिः केवला न हि तिष्ठति॥ १९५॥ उभयात्मक एवातो लोके
भोक्ता निगद्यते॥ ५९ ॥ ५९ ॥ ५९ ॥ ५९ ॥ ५९ ॥

धीनत्वात्स्वस्मिन्विकारे संभवत्यपि तस्यारोपितस्वरूपत्वेनाधिष्ठानभूतं कूटस्थं विहाय स्वातन्त्र्येणावस्था
नासंभवात्केवलचिदाभासस्यापि भोक्तृत्वेन संभवतीत्यर्थः॥ १९५॥ तस्मात्तृतीयः पक्षः परिशिष्यत इत्या
ह॥ उभयात्मक इति॥ यत एकैकस्य भोक्तृत्वेन संभवत्यत उभयात्मकः साधिष्ठानश्चिदाभास एव लोके व्यव
हारदशायां भोक्तेत्यभिधीयते॥ परमार्थतस्तूभयात्मकमेव न घटत इति भावः॥ ५९ ॥

॥९०॥
॥१२७॥

नन्वसंगो ह्ययं पुरुष इत्यादावसंगत्वस्यैव योऽयं विज्ञानमयः प्राणेष्वित्यादौ बुद्धिसाक्षित्वस्यापि श्रवणादुभयात्म
कं भोक्तृस्वरूपमपि पारमार्थिकमेव स्यान्न लौकिकव्यवहारमात्रसिद्धमित्याशंक्य श्रुतेस्तत्र तात्पर्याभावान्नैवमि
त्यभिप्रेत्य ॥ तादृगात्मानमिति ॥ तादृगात्मानं बुध्युपाधिकं भोक्तारमनूद्य कूटस्थः बुध्यादिकल्पनाधिष्ठा
नभूतश्चिदात्मा शोधितः ॥ बुध्याद्यनात्मनिरसनेन परिशोधितः श्रुतौ बृहदारण्यकादावित्यर्थः ॥१९६॥ त
त्र बृहदारण्यकवाक्यार्थं संक्षिप्य तावद्दर्शयति ॥ आत्मेति ॥ ज्ञानकेन कतम आत्मेत्येवमात्मनि पृष्टे याज्ञव

मारभ्या

तादृगात्मानमारभ्य कूटस्थः शोधितः श्रुतौ ॥१९६॥ आत्मा कतम इत्युक्ते याज्ञवल्क्यो विबोधयन् ॥
विज्ञानमयमारभ्यासंगं तं पर्यशोषयत् ॥१९७॥ कोऽयमात्मेत्येवमादौ सर्वत्रात्मविचारतः ॥ उभया
त्मकमारभ्य कूटस्थः शोधितः श्रुतौ ॥१९८॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥

ल्क्यस्तं विबोधयन्योऽयं विज्ञानमयः प्राणेष्वित्यादिना विज्ञानमयमुपक्रम्यासंगो ह्ययं पुरुष इत्यसंगं तं कू
टस्थं परिशोधितवानित्यर्थः ॥१९७॥ एवं बृहदारण्यके असंगात्मपरिशोधनप्रकारं प्रदर्श्येतरेयादिश्रुतिष्वित
रेष्वपि तं दर्शयति ॥ कोऽयमिति ॥ कोऽयमात्मेति वयमुपास्महे कतरः स आत्मा इत्येवमादावात्मविचारेणान्तः
करणोपाधिकमात्मानमारभ्य प्रज्ञानमात्मात्मकः कूटस्थः परिशोधितः ॥ एवमन्यत्रापि द्रष्टव्यं ॥ एवं श्रुति
युक्तिपर्यालोचनायामुभयात्मकस्य भोक्तुर्मिथ्यात्वं पारमार्थिकस्यासंगस्य कूटस्थस्याभोक्तृत्वं सिद्धं ॥१९८॥

ग्यस्य कथं प्रतिपाद्यते इत्याशंक्य न

ननूक्तरीत्या भोक्तुर्मिथ्यात्वे प्राणिनां तस्मिन्सत्यत्वबुद्धिः कुतो जायत इत्याशंक्याह ॥ कूटस्थेति ॥ आत्मा लोकप्रसिद्धो भोक्ता अविवेकतः स्वस्य कूटस्थाद्विवेकज्ञानाभावेन कूटस्थनिष्ठसत्यत्वमात्मन्यारोप्य तद्द्वारा स्वनिष्ठस्य भोक्तृत्वस्यापि सत्यतां मत्वा भोगं कदाचिदपि न हातुमिच्छति ॥ १९ ॥ ननु तर्ह्यात्मनस्तु कामाय सर्वं प्रियं भवतीति आत्मशेषत्वं भो... कूटस्थात्मशेषत्वं प्रतिपाद्यते किं तु लोकप्रसिद्धो भयात्मकभोक्तृशेषत्वमेव श्रुत्यानूद्यत इत्याह ॥ भोक्तेति ॥ लोके यो भोक्ता स स्वस्यैव भोगाय पतिजायादिभोगोपकरणमिच्छतीत्ययं लौकिकवृत्तांतः श्रुत्या सम्यगनू

कूटस्थसत्यतां स्वस्मिन्नध्यस्यात्माविवेकतः ॥ तात्त्विकीं भोक्तृतां मत्वा न कदाचिज्जिहासति ॥ १९ ॥
भोक्ता स्वस्यैव भोगाय पतिजायादिमिच्छति ॥ एष लौकिकवृत्तांतः श्रुत्या सम्यगनूदितः ॥ २०० ॥ भोग्यानां भोक्तृशेषत्वान्मा भोगेष्वनुरज्यताम् ॥ भोक्तर्येव प्रधाने तोऽनुरागं तं विधित्सति ॥ २०१ ॥ या प्रीतिरविवेकानां विषयेष्वनपायिनी ॥ त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥ २०२ ॥ इतो-नार्थांतरं प्रतिपाद्यत इ

त्यर्थः ॥ २०० ॥ अनुवादः किमर्थमित्याशंक्य भोक्तर्येव प्रेम्णो विधानायेत्याह ॥ भोग्यानामिति ॥ भोग्यानां पतिजायादीनां भोक्तुः स्वस्य भोगोपकारकत्वाद्भोग्येषु अनुरागो न कर्तव्यः ॥ किं तु प्रधानभूते भोक्तर्येवानुरागः कर्तव्य इति विधानायेत्यर्थः ॥ १ ॥ भोग्येषु प्रेमत्यागपुरस्सरमात्मप्रेम कर्तव्यतायां दृष्टांतत्वेनेश्वरप्रेमप्रार्थनापुरस्सरं पुराणवचनमुदाहरति ॥ या प्रीतिरिति ॥ अविवेकानां माल्यस्रगनुश्रून्यानां विषयेष्वनपायिनी दृढा या प्रीतिरस्ति हे माप लक्ष्मीपते सा प्रीतिस्त्वामनुस्मरतः सांसदाचिंतयतो मे हृदयान्मनसः सर्पतु न गच्छतु मम मनो-

॥२०॥
॥२८॥

भवत्येवं पुराणे श्रुतौ किमायातमित्यत आह ॥३॥ तीति ॥ इत्यनेन पुराणोक्तन्यायेन सर्वस्माद्भोग्यजाता सुत्तिजायादि
कात्विरक्तधीः विरक्ताधीर्यस्य स विरक्तधीः पुरुषस्तां भोग्यगोचरां प्रीतिं भोक्तर्यात्मनि उपसंहरेत् एवमात्मानं बुभुत्स
ते बोद्धुमिच्छति ॥२॥ एवमात्मन्येव प्रेमोपसंहारे फलितं सदृष्टान्तमाह ॥ स्वाङ्कंदनेति ॥ पामरः पृथकूजनः स्वगा
दिविषये यथाऽप्रमत्तः सावधानो भवति एवं मुमुक्षुरप्यात्मनि विषये न प्रमाद्यति अनवधानेन करोति किंतु त

इति न्यायेन सर्वस्माद्भोग्यजाताद्विरक्तधीः ॥ उपसंहृत्य तां प्रीतिं भोक्तर्येवं बुभुत्सते ॥२०२॥ स्वाङ्केदनवधूवस्त्र
सुवर्णादिषु पामरः ॥ अप्रमत्तो यथा तद्वन्न प्रमाद्यति भोक्तरि ॥२०४॥ काव्यनाटकतर्कादिमभ्यस्यति निरं
तरं ॥ विजिगीषुर्यथा तद्वन्मुमुक्षुः स्वं विचारयेत् ॥२०५॥ जपयागोपासनादि कुरुते श्रद्धया यथा ॥ स्वर्गा
दिवांछया तद्वच्छ्रद्धध्यात्स्वं मुमुक्षया ॥२०६॥ चित्तैकाग्र्यं यथा योगी महायासेन साधयेत् ॥ अणिमा
दिप्रेप्सयैवं विविच्यात्स्वं मुमुक्षया ॥२०७॥ चित्तयेव तिष्ठतीत्यर्थः ॥४॥ अनवधानाभावमेव बहुभिर्दृ

ष्टान्तैः स्पष्टयति ॥ यथा विजिगीषुः प्रतिवादिजयकामः इहलोकप्रधानः पुरुषो निरन्तरं काव्यादीनभ्यस्यति
एवं मुमुक्षुरपि स्वात्मानं विचारयेत् ॥५॥ यथा वैदिकः स्वर्गार्थी तत्साधनानि जपादीनि श्रद्धापुरःसरम
नुतिष्ठति तथा मुमुक्षुर्मोक्षेच्छया स्वश्रोत आत्मनि विश्वासं कुर्यात् ॥६॥ योगी योगाभ्यासवान् अणिमा
द्यैश्वर्यभोगेच्छया महायासेन चित्तैकाग्र्यं यथा संपादयेत् तद्वदयमप्यात्मानं सदा विविच्याद्देहादिभ्यो वि

॥१०४॥

ननु एतेषां सदाभ्यासने किं फलमित्यत आह । कौशलानीति ॥ यथा तेषां काव्यादिभ्यासवतामभ्यासपाटवेन तस्मिंस्त
स्मिन्विषये कौशलानि विवर्द्धंते एवमस्यापि मुमुक्षोरभ्यासाद्विवेको देहादिभ्य आत्मनो भेदज्ञानं विशदायते स्पष्टं भ
वति ॥ ८ ॥ विवेकवैशद्यस्य फलमाह ॥ विविच्यते ति ॥ अन्वयव्यतिरेकाभ्यां भोक्तुः पारमार्थिकं स्वरूपं विविच्यते
भोग्येभ्यो जडेभ्यो भेदेन ज्ञानता पुरुषेण जाग्रदादिषु जागरस्वप्नसुषुप्तिष्ववस्थासु साक्षिण्य संगतत्वाद्भव
सीयते निश्चीयते इत्यर्थः ॥ ९ ॥ अन्वयव्यतिरेकौ दर्शयति ॥ यत्रेति ॥ जाग्रदादिषु मध्ये यत्र यस्मिन्स्थाने जागरत्ति

कौशलानि विवर्द्धंते तेषामभ्यासपाटवात् ॥ यथात्र द्विवेकोप्यभ्यासाद्विशदायते ॥ ८ ॥ विविच्यते ता भोक्तृतत्त्वं जा
ग्रदादिष्वसंगता ॥ अन्वयव्यतिरेकाभ्यां साक्षिण्येवावसीयते ॥ ९ ॥ यत्र यद्दृश्यते द्रष्टा जाग्रत्स्वप्नसुषुप्तिषु ॥ तत्रैव
तत्रेतरस्यानुभूतिर्हि संमता ॥ १० ॥ स यत्पश्यति किंचित्तेनानन्वागतो भवेत् ॥ दृष्ट्वैव पुण्यपापं चेत्येवं श्रुतिषु डिंडिमः ॥ ११ ॥

स्वप्ने सुषुप्तौ वा यत्स्थूलं सूक्ष्ममानंदश्चेति त्रिविधं भोग्यं द्रष्टा साक्षिणा दृश्यते । नुभूयते तत्तद्दृश्यं तत्रैव तस्यामेवावस्थायां तिष्ठति तदितर

स्या (margin)

त्र तदितरस्यामवस्थायां नास्ति द्रष्टा तु सर्वत्रानुगततया वर्ततेऽतस्तस्यानुभवः सर्वसंमतः ॥ हि प्रसिद्धमेतदित्यर्थः ॥ १० ॥ न केवलमनुभवः किं
त्वागमोपीत्याह ॥ प्रायेण स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष इत्येष आत्मा स्मिन्संप्रसादे रत्वा चरित्वा
दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नायैवेति बृहदारण्यकश्रुतिमर्थतः पठति ॥ स यत्तत्रेति ॥ स आत्मा तत्र तस्यामवस्थायां यत्किं
चिद्भोग्यमीक्षते पश्यति तेन दृश्येनानन्वागतो भवेदनुसंगतो न भवेत्किं तु स्वयमेवावस्थांतरं गच्छतीत्यर्थः ॥ पुण्यं पुण्यफलं सुखं

[illegible] ॥ ११ ॥

भोक्तृत्वविवेचनपरत्वेन श्रुत्यंतरात्तिरदर्शयति। जाग्रदिति। परसत्यज्ञानानंदलक्षणं ब्रह्मसाक्षिरूपेणावस्थितं तत्तु
जाग्रदादिप्रपंचं प्रकाशते प्रकाशयति तद्ब्रह्माहमस्मि न बुद्धिचिदाभासापन्नोहमस्मीति ज्ञात्वा श्रुत्यनुभवाभ्यां निश्चित्य सर्वप्रतिबं
धैः प्रमातृत्वकर्तृत्वादिभिः प्रमुच्यते प्रकर्षेण सर्वात्मना मुच्यते। जाग्रदादिष्ववस्थास्वेक एवात्मा मंतव्यः। ज्ञातव्यः। एवं विवेकज्ञा
नेनावस्थानत्रयव्यतीतस्य अवस्थात्रयोपाधिविक्तस्यात्मनः पुनर्जन्म न विद्यते। एतच्छरीरपाताऽनंतरं शरीरां[illegible]तरप्राप्तिर्नास्तीत्यर्थः॥ १३

जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते। तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते॥ १२॥ एक एवात्मा मंतव्यो जाग्रत्स्वप्न
सुषुप्तिषु॥ स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते॥ १३॥ त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्॥ तेभ्यो विलक्ष
णः साक्षी चिन्मात्रोहं सदाशिवः॥ १४॥ एवं विवेचिते तत्त्वे विज्ञानमयशब्दितः। चिदाभासो विकारी यो भोक्तृत्वं तत्र [illegible]

त्रिषु धामसु त्रिष्ववस्थासु यद्भोग्यं स्थूलप्रविविक्तानंदरूपं यच्च भोक्ता विश्वतैजसप्राज्ञरूपो यश्च भोगस्तदनुभवरूपश्चेति ये
विद्यंते तेभ्यः स्वरूपादिभ्यो विलक्षणो यश्चिन्मात्ररूपः साक्षी सदाशिवः निरतिशयानंदरूपत्वेन सर्वदा शोभनः परमात्मा
स्ति सोहमस्मीत्यर्थः॥ एवं विवेकेनात्मतत्त्वे संगे निश्चिते सति भोक्तृत्वं कस्येत्यत आह॥ एवं विवेचित इति यो विज्ञानमयश
ब्देनाभिधीयमानश्चिदाभासस्तस्य विकारित्वाद्भोक्तृत्वमित्यर्थः॥ १५॥ ७॥ ७॥ ७॥ ७॥ ७॥

ननु चिदाभासस्य भोक्तृत्वांगीकारे कस्य कामायेति वचो भोक्तृभावविवक्षयेति पूर्वोक्तं व्याहन्येतेत्याशंक्यतत्स्ववचनस्यपा
रमार्थिकभोक्तृभावपरत्वमभिप्रेत्य भोक्तुश्चिदाभासस्य मिथ्यात्वं साधयति ।। मायिकोयमिति ।। अयं चिदाभासो
मायिको मृषात्मकः श्रुतेर्जीवेशावाभासेन करोतीति श्रुतेः अनुभवादपि द्रष्टादिरित्तयमध्यवर्तित्वेनानुभूयमान
त्वादपीत्यर्थः ।। तदेवोपपादयति ।। इंद्रजालमिति ।। इंद्रजालवन्मिथ्याभूतं जगत्यंतर्भूतत्वादस्यापि मिथ्यात्वं तदनु
भूयते विद्वद्भिरिति शेषः ।। यस्माज्जगदंतःपाती ततो मृषेति योजना ।।१६।। अस्य जगतइव विनाशित्वानुभवादपि

।। मायिकोयंचिदाभासः श्रुतेरनुभवादपि ।। इंद्रजालं जगत्प्रोक्तं तदंतःपात्ययं यतः ।।२१६।। विलयोप्य
स्य सुप्त्यादौ साक्षिणा ह्यनुभूयते ।। एतादृशं स्वस्वभावं विविनक्ति पुनः पुनः ।।२१७।। विविच्य नाशं निश्चि
त्य पुनर्भोगं न वांछति ।। मुमूर्षुः शायितो भूमौ विवाहं कोभिवांछति ।।२१८।। जिह्रेति व्यवहर्तुं च भोक्ता
हमिति पूर्ववत् ।। छिन्ननास इव ह्रीतः क्लिश्यन्नारब्धमश्नुते ।।२१९।। त्वमित्याह ।। विलयोपीति ।। मूर्च्छा
दिरादिशब्दार्थः ।। भवतु मृषात्वं ततः किमित्यत आह ।। एतादृशमिति ।। यदा कूटस्थाद्विवेचितश्चिदाभासो मा
यिको जातस्तदा स्वस्वभावं स्वतत्त्वमेतादृशं मृषात्मकं पुनः पुनर्विविनक्ति कूटस्थाद्विविच्य जानाति ।।१७।। त
तोपि किमित्यत आह ।। विविच्येति ।। स्वनाशनिश्चये भोगेच्छाभावे दृष्टांतमाह ।। मुमूर्षुरिति ।।१८।। किंच पू
र्ववदयं भोक्तेति व्यवहर्तुमपि लज्जते इत्याह ।। जिह्रेतीति ।। तर्हि तस्यासत्यत्वं नंतरं प्रारब्धावसानपर्यंतं कथं व्य

भमश्नुते प्रारब्धकर्मफलं भुंक्ते इत्यर्थः ।।२१९।।

॥२२०॥
॥२३०॥

इदानीं स्नानांतरं साक्षिणो भोक्तृत्वाभावः कैमुतिकन्यायसिद्ध इत्याह ॥ यदा स्वस्येति ॥ अयं चिदाभासः यदा स्वस्यापि भोक्तृत्वं मंतुं अहं भोक्तेति ज्ञातुं जिन्हेति विलज्जते यदा तदा एतत्स्वगतं भोक्तृत्वं साक्षिण्यसंगे आरोपयेदिति कृथा कथा अर्थशून्या केवनकापी त्यर्थः ॥२२०॥ उक्तमर्थं श्रुत्यारूढं करोति ॥ इत्यभिप्रेत्येति ॥ कस्य कामायेति श्रुतिरित्यर्थः कूटस्थस्य चिदाभासस्य वा पारमार्थिकभोक्तृत्वाभावमभिप्रेत्य विरुद्धकयाकुकारादित्येन भोक्तारमाक्षिपति

यदा स्वस्यापि भोक्तृत्वमाक्षिपत्यविरुद्धकया ॥ साक्षिण्यारोपयेदेतदिति केवकथावृथा ॥२२०॥ इत्यभिप्रेत्य भोक्तारमाक्षिपत्यविरुद्धकया ॥ कस्य कामायेति ततः शरीरानुज्वरो न हि ॥२२१॥ स्थूलं सूक्ष्मं कारणं च शरीरं त्रिविधं स्मृतं ॥ अवश्यं त्रिविधो स्त्येव तत्र तत्रोचितो ज्वरः ॥२२२॥ वातपित्तश्लेष्मजन्या व्याधयः कोटिशस्तनौ ॥ दुर्गंधत्वकुरूपत्वदाहभंगादयस्तथा ॥२२३॥ कामक्रोधादयः शांतिदांत्याद्या लिंगदेहगाः ॥ ज्वराद्वयेपि बाधंते प्राप्याप्राप्य नरं क्रमात् ॥२२४॥ निराकरोति ॥ भवत्येवं भोक्त्राक्षेपस्ततः किमित्यत आह ॥ ततइति ॥ ज्वरो ज्वरणं संतापः ॥२२१॥ शरीरानुज्वराभावं दर्शयितुं शरीरभेदं तत्र तत्र ज्वरसद्भावं च दर्शयति ॥ स्थूलमिति ॥ २२ ॥ तत्र स्थूलशरीरज्वरांस्तावदाह ॥ वातपित्तेति ॥२२३॥ सूक्ष्मशरीरज्वरानुदर्शयति कामेति ॥ कामादीनां शांत्यादीनां च ज्वरत्वमुपपादयति ॥ द्वयेपीति ॥ द्विविधा अपि क्रमेण प्राप्याप्राप्य तिस्भ्यानं रखा

ध्यंते तौ ज्वरसाम्याज्ज्वरा इत्युच्यंत इत्यर्थः ॥२२४॥

कारणशरीरगतो ज्वरः [illegible] स्पष्टं दोग्ध्य श्रुत्युक्तमित्याह ॥ स्वमिति ॥ नाहं खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति वाक्येन स्वपरज्ञानशून्यत्वं तज्ज्ञानेन नष्टप्रायत्वं परेद्युरागामिदुःखबीजवासनाबाहुल्यं चेत्येतदिंद्रेण त्रिष्वपि गुरोः प्रजापतेः पुरतो निवेदितमित्यर्थः ॥ एवं त्रिष्वपि देहेषु ज्वरानभिधाय तेषामपरिहार्यत्वमाह ॥ एत इति ॥ त्रिष्वपि शरीरेषु प्रतीयमाना एते ज्वराः शरीरैः सहोत्पन्नत्वेन स्वाभाविकाः संमताः ॥ स्वाभाविकत्वं व्यतिरेकमुखेन द्रढयति ॥ वियोगे त्विति ॥

स्वपरेच्छनवेत्सा सा विनष्टेव कारणे ॥ आगामिदुःखबीजं चेत्येतदिंद्रेण दर्शितं ॥२२५॥ एते ज्वराः शरीरेषु त्रिषु स्वाभाविका मताः ॥ वियोगे तु ज्वरैस्तानि शरीराण्येव नासते ॥२२६॥ तंतोर्वियुज्येत पटो बालेभ्यः कंबलो यथा ॥ मृदो घटस्तथा देहो ज्वरेभ्योपीति दृश्यतां ॥२२७॥ चिदाभासे स्वतः कोपि ज्वरो नास्ति यतश्चितः ॥ प्रकाशैकस्वभावत्वमेव दृष्टं न चेतरत् ॥२२८॥ यतः कारणादेभिर्ज्वरैस्तेषां शरीराणि नासत एवं नैव भवंत्यतः स्वाभाविका इत्यर्थः ॥२२६॥ तत्र दृष्टांतमाह ॥ तंतोरिति ॥२२७॥ इदानीं कूटस्थे ज्वराभावं कैमुति-

दि

कन्यायेन दर्शयितुं चिदाभासे तावज्ज्वराभावं दर्शयति ॥ चिदाभास इति ॥ चिदाभासे स्वतः शरीरत्रयगतज्वरसंबंधमंतरेण न कोपि ज्वरो विद्यते ॥ कुत इत्यत आह ॥ यत इति ॥ चितः प्रकाशैकस्वभावस्य विद्वदनुभवसिद्धत्वात् तत्प्रतिबिंबस्यापि चिदाभासस्य तथात्वमेष्टव्यमिति भावः ॥२२८॥

परदृष्टं चिदाभासे ज्वराभावउपपादितस्तदिदानीं दर्शयति। चिदाभासेऽपीति। यदा चिदाभासेऽपि रागत्वेन संभाव्यते तदा
न साक्षिणि संभवतीति किमु वक्तव्यमिति भावः। ननु तर्हि ज्वरानुभवस्य का गतिरित्यत आह। एवमपीति।
एकतामेनेत्यत्र संक्षेपेणोक्तमर्थं प्रपंचयति। साक्षिसत्यत्वमिति। चिदाभासः स्वेन सहिते शरीरत्रये साक्षिगतं
सत्यत्वमध्यस्य तत्सर्वं शरीरत्रयस्य वास्तवरूपमिति मन्यत इत्यर्थः। एवं भ्रांतिज्ञाने सति किं भवतीत्यत आ

चिदाभासेऽप्यसंभाव्या ज्वरः साक्षिणि का कथा। एवमप्येकतामेने चिदाभासोऽस्त्वविद्यया॥ १९॥ साक्षिसत्यत्व
मध्यस्य स्वेनोपेते वपुस्त्रये। तत्सर्वं वास्तवं स्वस्य स्वरूपमिति मन्यते॥ २०॥ एतस्मिन्भ्रांतिकालेऽयं शरीरेषु
ज्वरेष्वथ। स्वयमेव ज्वरामीति मन्यते हि कुटुंबिवत्॥ २१॥ पुत्रदारेषु तप्यत्सु तपामीति यथा वृथा। मन्यते
मुमुक्षुस्तद्वदाभासोऽप्यभिमन्यते॥ २२॥ विविच्य भ्रांतिमुत्सृज्य स्वमप्यगणयन्सदा। चिंतयन्साक्षिणं कस्माच्छरीरम

ह। एतस्मिन्निति अयं चिदाभासोऽस्यां भ्रांतिवेलायां शरीरनिष्ठज्वरं स्वात्मन्यारोपयतीत्यर्थः। तत्र दृष्टांतमाह। कुटुंबिवदिति। दृष्टां
तं विवृणोति। पुत्रेति। एवमविवेकदशायां चिदाभासे भ्रांत्या ज्वरप्रख्यापि विवेकदशायां तदभावं दर्शयति। विविच्येति। चि
दाभासः। कूटस्थं स्वात्मानं शरीरत्रयं च विविच्य भेदेन ज्ञात्वा इदं सर्वं मम वास्तवस्वरूपमिति मन्यत इत्युक्तं भ्रांतिं परित्यज्य
स्वस्याभासरूपत्वज्ञानेन स्वस्मिन्नप्यादरमकुर्वन्स्वस्य निजरूपं ज्वरादिरहितं साक्षिणं सदा चिंतयन्सन् शरीरमनु संज्वरत्स्व

भ्रांतिज्ञानतत्त्वज्ञानयोर्व्यवहारदशायां बंधकारणत्वं दृष्टांतप्रदर्शनेन स्पष्टयति। अपथ्येति। रज्वादौ कल्पितस्य सर्पादेर्ज्ञानं पला
यने कारणं भवति। आदिशब्देन स्थाणौ कल्पितश्चोरो गृह्यते। रज्वादिज्ञानेन सर्पादिबुद्धिनिवृत्तौ तदपि पलायनमनुशो
चति। वृथा कृतमयेत्यनुतप्यत इत्यर्थः। साक्षिणं सदाशितयन्त्रित्वं दृष्टान्तेन स्पष्टयति। मिथ्येति। यथा लोके मिथ्या
भियोगकर्ता तद्दोषस्य प्रायश्चित्तसिद्ध्यर्थं मिथ्याभियुक्तं पुनः पुनः क्षमापयति। एवमयं चिदाभासोऽपि साक्षिणएव संगा

अपथ्या वस्तुसर्पादिज्ञानं हेतुः पलायने। रज्जुज्ञाने हि धीर्यस्तो कृतमप्यनुशोचति ॥२४॥ मिथ्याभियोगदोषस्य प्रा
यश्चित्तस्य सिद्धये ॥ क्षमापयन्निवाभाति साक्षिणं शरणं गतः ॥२५॥ आवृत्तपापनुत्त्यर्थं स्नातो धुवति ते यथा ॥ आ
वर्तयन्निवाभाति सदा साक्षिपरायणः ॥२६॥ कुष्ठी स्वकुष्ठिनीं रूपविलासेषु विलज्जते ॥ यथा तथाभासः
स्वप्रख्यातो विलज्जते ॥२७॥ गृहीतो ब्राह्मणो म्लेच्छैः प्रायश्चित्तं चरन्पुनः। म्लेच्छैः संकीर्यते नैव तथाभासः शरी

त्मनि भोक्तृत्वारोपलक्षणमिथ्याभियोगदोषप्रायश्चित्तार्थं साक्षिणमात्मानं क्षमापयन्निव शरणं गतः ॥२५॥
तत्रैव दृष्टान्तान्तरमाह। आवर्तेति। यथा पापकारिणा पुरुषेण कृतपापनुत्त्यर्थमभ्यस्तपापनोदनाय विहितं स्ना
नादिप्रायश्चित्तमावर्त्यते पुनः पुनरनुष्ठीयते। तथायमपि चिदाभासः साक्षिणि संसारित्वारोपदोषपरिहाराय ध्या
नमावर्तयन्निव सदा साक्षिपरायणो भवति ॥२६॥ एवं साक्षिपरत्वं दृष्टान्तेनोपवर्ण्य स्वगुणप्रख्यापनेन लज्जालुत्वं
सदृष्टान्तमाह ॥ कुष्ठीति ॥२७॥ इदानीं शरीरत्रयाद्विविक्तस्य चिदाभासस्य संगतिः सहसा दोषस्याभावं दृष्टान्ते
ने
पुनः

नकेवलं स्वापराधनिवृत्तये साक्ष्यनुस्मरणं किंतु महत्त्वयोजनसिध्यर्थमपीति सिंहावलोकनन्यायेन सदृष्टांतमाह ॥
यो वराज्ये इति । राजानुकारी भवति राजेव प्रजारंजनादिगुणवान् भवतीत्यर्थः ॥ [illegible] ॥ ननु पूर्वराजपुत्रस्य राजानुस
रणे साम्राज्यफलं दृश्यते नैवं साक्ष्यनुसरणे ऽतस्तदनुसरणे कथं प्रवर्ततइत्याशंक्याह यो ब्रह्मेति । स यो ह वै तत्
परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति तरति शोकं तरति पाप्मानं गुहाग्रंथिभ्यो विमुक्तो ऽमृतो भव
तीति श्रुतौ ब्रह्मभावादिरूपस्य फलस्य श्रूयमाणत्वात्तत्फलवांछया साक्ष्यनुसरणे प्रवर्तनं युक्तमित्यर्थः ॥ [illegible] ॥

यो वराज्ये स्थितो राजपुत्रः साम्राज्यवांछया ॥ राजानुकारी भवति तथा साक्ष्यनुकार्ययं ॥ २४९ ॥ यो ब्रह्म वे
द ब्रह्मैव भवत्येष इति श्रुतिं ॥ श्रुत्वा तदेकचित्तः सन्ब्रह्म वेत्ति न चेतरत् ॥ २५० ॥ देवत्वकामा अग्न्यादौ प्र
विशंति यथा तथा ॥ साक्षित्वेनावशेषाय स्वविनाशं स वांछति ॥ २५१ ॥ यावत्स्वदेहदाहः स्यान्नरत्वं नैव
मुंचति ॥ यावदारब्धदेहः स्यान्नाभासत्वविमोचनं ॥ २५२ ॥ ननु ब्रह्मज्ञानेन ब्रह्मभावात्सो चिदाभासत्वमेव वि

नष्टेदतः स्वनाशाय कथं प्रवर्तत इत्याशंक्याह ॥ देवत्वकामा इति ॥ यथा लोके देवत्वमासिकामा मनुष्यो ऽग्न्य
ग्निप्रयागगंगाप्रवेशादौ प्रवर्तंते एवं साक्षिरूपेणावस्थानलक्षणस्याधिकफलस्य विद्यमानत्वाच्चिदाभास
त्वापगमहेतौ ब्रह्मज्ञानेपि प्रवृत्तिर्घटत एवेत्यर्थः ॥ २५१ ॥ ननु तत्त्वज्ञानेनाभासत्वमपगच्छति चेत्कथं तत्त्वविदां
जीवत्वव्यवहार इत्याशंक्य प्रारब्धक्षयपर्यंतं तदुपपत्तिं सदृष्टांतमाह ॥ यावदिति ॥ यथाग्न्यादौ प्रविष्टः पुरु

ननु भोक्तृत्वादिभ्रमोपादानस्याज्ञानस्य निवृत्तत्वात्पुनः कथं भोगानुवृत्तिः कथं वा मर्त्योहमिति विपरीतप्रतीतिरित्याशं
क्य दृष्टांतप्रदर्शनेन संभावयति। रज्जुज्ञानेपीति॥ ७३॥ दार्ष्टांतिके योजयति। एवमिति॥ ननु पुनर्मर्त्यबुध्युदयेन तत्व
ज्ञानं बाध्येतेत्याशंक्याह। नेति। कदाचिदहं मर्त्य इत्येवंविधाज्ञानोदयमात्रेण जनितं तत्त्वज्ञानं न बाध्यते। कुत इत्यत
आह। जीवन्मुक्तीति। इदं मर्त्यत्वबुद्धिकरणलक्षणं जीवन्मुक्तिव्रतं नियमेनानुष्टेयं न भवति। किंतु सम्यग्ज्ञानेन भ्रांति
ज्ञाननिवृत्तिरित्ययं वस्तुस्वभावः। अतः कदाचिन्मर्त्यत्वबुध्युदयेपि पुनस्तत्वज्ञानांतरेण तस्याएव बाध्यत्वमिति भा

रज्जुज्ञानेपि कंपादिः शनैरेवोपशाम्यति॥ पुनर्मंदांधकारे सा रज्जुः क्षिप्तोरगीभवेत्॥ ७३॥ एवमारब्धभोगोपि
शनैः शाम्यति नो हठात्॥ योगकाले कदाचित्तु मर्त्योहमिति भासते॥ ७४॥ नैतावताऽपराधेन तत्त्वज्ञानं विन
श्यति॥ जीवन्मुक्तिव्रतं नेदं किंतु वस्तुस्थितिः स्वतः॥ ७५॥ दशमोपि शिरस्ताडं रुदन्बुध्वा न रोदिति॥ शि
रोव्रणस्तु मासेन शनैः शाम्यति नो तदा॥ ७६॥ दशमोमृतिलाभेन जातो हर्षो व्रणव्यथां॥ तिरोधत्ते मुक्तिलाभ

वः॥ ७७॥ भवतु रज्जुसर्पादिस्थले विपरीतज्ञाननिवृत्तावपि तत्कार्यकंपाद्यनुवृत्तिः प्रकृते दृष्टांते दशमेदशमस्त्वमसी
ति वाक्यविचारजन्यज्ञानेन भ्रमनिवृत्तावपि तत्कार्यानुवृत्तिर्नोपलभ्यत इत्याशंक्याह। दशमोपीति॥ दशमोस्मी
ति ज्ञानोदये सति शिरस्ताडनपूर्वकं रोदनमात्रं निवर्तते ताडनजन्यव्रणस्त्वनुवर्तत एवेत्यर्थः॥ ७६॥ ननु ज्ञानोत्त
रकालेपि संसारानुवृत्तौ मुक्तेः कुतः पुरुषार्थतेत्याशंक्य मुक्तिजन्यहर्षस्य तद्दुःखाच्छादकस्य सत्वात्पुरुषार्थतेति

॥तृ०॥
॥

जीवन्मुक्तिव्रतेनेदमित्युक्तं तस्य व्रतत्वाभावे किमायातमित्यत आह ॥ व्रताभावादिति ॥ पुनः पुनर्विचारकरणे दृष्टान्तमाह रससेवीति । यथा रससेवी नरः एकस्मिन् दिने क्षुद्बाधापरिहाराय पुनः पुनर्भुङ्क्ते । तद्वदध्यासनिवृत्तये पुनः पुनर्विवेकः क्रियतामित्यर्थः ॥ २४८ ॥ ज्ञानेनानिवर्त्यस्य प्रारब्धकर्मफलस्य केन तर्हि निवृत्तिरित्याशङ्क्य ताडनजन्यव्रणस्यौषधेनेव भोगेनैव निवृत्तिरित्याह ॥ शमयतीति ॥ २४९ ॥ अपरोक्षज्ञानशोकनिवृत्याख्ये उभे इमे ॥ अवस्थे जीवगे ब्रूते आत्मानं चेदिति श्रुतिरित्यनेन श्लोकेन आत्मानं चेद्विजानीयादयमस्मीति पूरुषः । किमिच्छन्कस्य कामाय शरी.

व्रताभावाद्यदाध्यासस्तदा भूयो विविच्यताम् ॥ रससेवी दिने भुङ्क्ते भूयो भूयो यथा तथा ॥ २४८ ॥ शमयत्यौषधेनायं दशमः स्वं व्रणं यथा ॥ भोगेन शमयेत्तद्वत्प्रारब्धं मुच्यते ततः ॥ २४९ ॥ किमिच्छन्निति वाक्योक्तः शोकमोक्ष उदाहृतः ॥ आभासस्य ह्यवस्थेषा षष्ठी तृप्तिस्तु सप्तमी ॥ २५० ॥

अनुसंज्वरेदित्यस्मिन्मन्त्रे अपरोक्षज्ञानशोकनिवृत्याख्ये जीवावस्थे द्वे अभिहिते इत्युक्तम् इदानीं तदभिधानस्योचितां जीवस्य सप्तमीं तृप्तिलक्षणामवस्थां वृत्तानुकीर्तनपूर्वकं वक्तुमारभते ॥ किमिच्छन्निति ॥ किमिच्छन्नित्युत्तरार्धेनाभिहितो यः शोकमोक्षः स एतावता ग्रन्थसंदर्भेण उदाहृतोऽभिहितः ॥ एषा अज्ञानमावृतिस्तद्विक्षेपश्च परोक्षधीः अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरंकुशेत्यनेनाभिहितासु सप्तसु जीवावस्थासु षष्ठीत्याह ॥ आभासस्येति ॥ सप्तमी व्याख्यायत इति शेषः ॥

अपरोक्षज्ञानजन्यायास्तस्ये निरंकुशत्वं प्रतियोगिप्रदर्शनपुरःसरं प्रतिजानीते ॥ सांकुशेति ॥ विषयलाभजन्याया
स्तस्ये विंदि... यो तरकामनया कुंठितत्वात्सांकुशत्वमस्यास्तु तदभावान्निरंकुशत्वं ॥ तदेव दर्शयति ॥ कृतमिति ॥ ५१ ॥
कृतकृत्यत्वमेवोपपादयति ॥ ऐहिकेति ॥ अस्य विदुषस्तत्त्वज्ञानोदयात्पूर्वं इह लोके इष्टप्राप्तये ऽनिष्टनिवृत्तये च कृषिवा
णिज्यादिकं स्वर्गादिसिद्धये यागोपासनादिकं मोक्षसाधनज्ञानसिद्धये श्रवणादिकं चेति बहुविधं कर्तव्यमासीदि

सांकुशा विषयैस्तृप्तिरियं तृप्तिर्निरंकुशा ॥ कृतं कृत्यं प्रापणीयं प्राप्तमित्येव तृप्यति ॥ ५१ ॥ ऐहिकामुष्मिकव्रातसि
द्ध्यै मुक्तेश्च सिद्धये ॥ बहु कृत्यं पुरास्याभूत्तत्सर्वमधुना कृतं ॥ ५२ ॥ तदेतत्कृतकृत्यत्वं प्रतियोगिपुरःसरं ॥ अनुसंदध
देवायमेवं तृप्यति नित्यशः ॥ ५३ ॥ दुःखिनोऽज्ञाः संसरंतु कामं पुत्राद्यपेक्षया ॥ परमानंदपूर्णोऽहं संसरामि किमि
च्छया ॥ ५४ ॥ अनुतिष्ठंतु कर्माणि परलोकयियासवः ॥ सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथं ॥ ५५ ॥

दानीं तु सांसारिकफलेच्छाभावाद्ब्रह्मानंदसाक्षात्कारस्य सिद्धत्वाच्च तत्सर्वं कृषियागश्रवणादिकं कृतं कृतप्रायमभूदित्यर्थः ॥ परमनु
प:॥ ष्ठेयाभावादिरूपं एवं कृतकृत्यत्वमुपपाद्य तत्फलभूतां तृप्तिं दर्शयति ॥ तदेतदिति ॥ प्रतियोगिपुरःसरं प्रतियोग्यनुसंधा
नपूर्वकं यथा भवति तथा एवं वक्ष्यमाणप्रकारेण सर्वदा तृप्यति ॥ तदेवानुसंधानं प्रपंचयति ॥ दुःखिनोऽज्ञा इत्यादिना कृतकृत्यत
पात् तः ज्ञातप्राप्यतया पुनरिच्छाप्राकृतेन मुख्येन ॥ तत्र तावदैहिकसुखार्थिभ्यो वैलक्षण्यं स्वस्य दर्शयति दुःखिन इति स्वर्गाद्य

॥ तृ० ॥
॥१३७॥

॥ ननु स्वार्थप्रवृत्त्यभावेऽपि परार्थी प्रवृत्तिः किं न स्यादित्याशङ्क्याधिकाराभावात्सापि नास्तीत्याह। व्याचक्षतामिति। ननु स्वदेहनि
र्वाहार्थं भिक्षाहरणादिकं परलोकार्थं स्नानादिकं च भवता क्रियमाणमुपलभ्यते। अतः क्रियमाणमसिद्धमित्याशङ्क्य तदपि
स्वदृष्ट्या नैवास्ति किन्त्वन्यैरेव कल्प्यत इत्याह। निद्राभिक्षेति। अन्यकल्पनया बाधोऽस्तीत्याशङ्क्य तदभावे दृष्टान्तमाह। गुञ्जा
पुञ्जादीति। ननु फलान्तरेच्छाभावेन कर्मानुष्ठानं मा भूत् तत्त्वसाक्षात्काराय श्रवणादिकं कर्तव्यमेवेत्याशङ्क्याज्ञानाद्यभावाच्छ्रवणा

व्याचक्षतां ते शास्त्राणि वेदानध्यापयन्तु वा। येऽत्राधिकारिणो मे तु नाधिकारोऽक्रियत्वतः॥९७॥ निद्राभिक्षे स्नानशौचे
नेच्छामि न करोमि च॥ द्रष्टारश्चेत्कल्पयन्तु किं मे स्यादन्यकल्पनात्॥९८॥ गुञ्जापुञ्जादि दह्येत नान्यारोपितवह्नि
ना। नान्यारोपितसंसारधर्मानेवमहं भजे॥९९॥ शृण्वन्त्वज्ञाततत्त्वास्ते जानन्कस्माच्छृणोम्यहम्। मन्यन्तां संशयाप
न्ना न मन्येऽहमसंशयः॥१००॥ विपर्यस्तो निदिध्यासेत्किं ध्यानमविपर्यये॥ देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहम्॥१०१॥

दिकं तस्यापि नास्तीत्याह। शृण्वन्त्विति। अज्ञाततत्त्वा अज्ञातं ब्रह्मात्मैकत्वलक्षणं तत्त्वं यैस्ते तथाभूताः श्रवणं कुर्वन्तु तत्सन्निष्ठ मन्य
न्तामिति संशयवन्तो मननं कुर्वन्तु मम तु तदुभयाभावान्नोभयत्र प्रवृत्तिरित्यर्थः॥ मा भूतां श्रवणमनने विपर्ययनिरासार्थं निदि
ध्यासनं कर्तव्यमित्याशङ्क्य देहात्मबुद्धिलक्षणस्य विपर्ययस्याभावात्तदपि नानुष्ठेयमित्याह॥ विपर्यस्त इति। ननु विप
र्ययाभावेऽहं मनुष्य इति व्यवहारः कथं घटत इत्याशङ्क्य वासनावशाद्भवतीत्याह। अहं मनुष्य इति॥१०१॥ ७॥ ७॥ ७॥

अहं मनुष्य इत्यादिव्यवहारो विनाप्यमुम्॥ विपर्यासं चिराभ्यस्तवासनातोऽवकल्प्यते॥१०२॥

68

नर्थस्य व्यवहारस्य निवृत्तिसिद्धये ध्यानं संपादयिष्यामीत्याशंक्य प्रारब्धक्षयमंतरेणास्य निवृत्तिर्नास्तीत्याह। प्रारब्धकर्मणीति॥६२॥
ननु प्रारब्धनिमित्तकस्यापि व्यवहारस्य विरलतायै ध्यानं कर्तव्यमेवेत्याशंक्य व्यवहारस्याबाधकत्वदर्शनान्न तन्निवृत्तये ध्यान-
मननुष्ठेयमित्याह। विरलत्वमिति॥ ध्यानस्याकर्तव्यत्वेपि विक्षेपपरिहाराय समाधिः कर्तव्य इत्याशंक्य विक्षेपसमाधा-
नयोर्मनोधर्मत्वान्न विक्षेपनिवारकेपि समाधौ ममाधिकार इत्याह। विक्षेप इति॥६४॥ ननु तथापि समाधिफलमनुभ-

प्रारब्धकर्मणि क्षीणे व्यवहारो निवर्तते। कर्माक्षये त्वसौ नैव शाम्येद्ध्यानसहस्रतः॥६२॥ विरलत्वं व्यवहृतेरिष्टं चेद्ध्यान-
मस्तु ते। अबाधिकां व्यवहृतिं पश्यन्ध्यायाम्यहं कुतः॥६३॥ विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम। विक्षेपो
वा समाधिर्वा मनसः स्याद्विकारिणः॥६४॥ नित्यानुभवरूपस्य को मेऽत्रानुभवः पृथक्। कृतं कृत्यं प्रापणीयं प्राप्त-
मित्येव निश्चयः॥६५॥ व्यवहारो लौकिको वा शास्त्रीयो वान्यथापि वा। ममाकर्तुरलेपस्य यथारब्धं प्रवर्तताम्॥६६॥

वः संपादनीय इत्याशंक्य तस्य स्वरूपत्वान्नास्य संपाद्यत्वमित्याह। नित्यानुभवेति॥ उपपादितं कृतकृत्यत्वं निगमयति॥
कृतं कृत्यमिति॥६५॥ एवं सर्वत्र कर्तृत्वानभ्युपगमेऽनियतवृत्तित्वं प्रसज्येतेत्याशंक्य प्रारब्धवशात्सास्यमनिय-
तवृत्तित्वमंगीकरोति॥ व्यवहार इति॥ लौकिको भिक्षाहारादिः शास्त्रीयो जपसमाध्यादिरन्यथापि वा प्रति-
षिद्धहिंसादिर्वा व्यवहारः कर्तृत्वभोक्तृत्वादिरहितस्य मम प्रारब्धकर्मानतिक्रम्य प्रवर्ततामित्यर्थः॥६६॥

69

॥ त० ॥
॥

एवं वस्तुतत्त्वमभिधाय प्रौढवादेनाह। अथवेति। लोकानुग्रहकाम्यया प्राण्यनुग्रहेच्छयेत्यर्थः॥ ६९॥ शास्त्रीय
एव मार्गे प्रवर्तनांगीकारे तर्हि तदभिमानप्रयुक्तो विकारः स्यादेवेत्याशंक्याह। देवार्चनेत्यादिना श्लोकद्वयेन॥
तारं प्रणवं। आम्नायमस्तकं वेदांतशास्त्रं॥ ६९॥ ७०॥ फलितमाह। एवं चेति॥ ७१॥ विभिन्नविषयत्वमेव स्पष्ट

अथवा कृतकृत्योपि लोकानुग्रहकाम्यया॥ शास्त्रीयेणैव मार्गेण वर्तेहं मम का क्षतिः॥ ६८॥ देवार्चनस्नान
शौचभिक्षादौ वर्ततां वपुः॥ तारं जपतु वाक् तद्वत् पठत्वाम्नायमस्तकं॥ ६९॥ विष्णुं ध्यायतु धीर्यद्वा ब्रह्मणि
देविलीयतां॥ साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि कारये॥ ७०॥ एवं च कलहः कुत्र संभवेत्कर्मिणो मम॥
विभिन्नविषयत्वेन पूर्वापरसमुद्रवत्॥ ७१॥ वपुर्वाग्धीषु निर्बंधः कर्मिणो न तु साक्षिणि॥ ज्ञानिनः सा
क्ष्यलेपत्वे निर्बंधो नेतरत्र तु॥ ७२॥ एवं चान्योन्यवृत्तांतानभिज्ञौ बधिराविव॥ विवदेतां बुद्धिमंतो हसेयु
र्वीक्ष्यते॥ ७३॥ यं कर्मी नाभिजानाति साक्षिणं तस्य तत्त्ववित्॥ ब्रह्मत्वं बुध्यतां तत्र कर्मिणः किं विही
यते॥ ७४॥ देहवाग्बुद्धयस्त्यक्ता ज्ञानिनाऽनृतबुद्धितः॥ कर्मी प्रवर्तयं स्ताभिर्ज्ञानिनो हीयते त्र किं॥ ७५॥

यति। वपुरिति॥ ७२॥ अथापि यो ज्ञानी कर्मिणो कलहं कुर्वीत तेनो विद्वद्भिः परिहसनीयो इत्याह। एवं चेति॥ ७३॥ कुतः
परिहास्यत्वमित्याशंक्य निर्विषयकलहकारित्वादित्याह॥ यमिति॥ कर्मी यं साक्षिणं कर्मानुष्ठानोपयोगि देहवा
ग्बुद्धयतिरिक्तं प्रत्यगात्मानं न विजानाति तत्त्वविदां तस्य ब्रह्मत्वबुद्ध्या कर्मिणः कर्मानुष्ठाने किं हीयते॥ ७४॥ ज्ञा

कर्मानुष्ठानं प्रयोजनं शून्यत्वान्नत्वानिनाभ्युपगम्यते इति शङ्कते॥ प्रवृत्तिरिति॥ उपयोगाभावो निवृत्तावपि समान
इति परिहरति॥ निवृत्तिरिति॥ निवृत्तेर्बोधोपयोगित्वान्नोपयोगाभाव इति शङ्कते॥ बोधहेतुरिति॥ तर्हि प्रवृत्ताव
पि बुभुत्साहेतुत्वादुपयोगवती स्यादाह॥ बुभुत्सायामिति॥ ७५॥ ननु बुद्धस्य बुभुत्सापेक्षाभावात्प्रवृत्तेरनुपयोगि
त्वमिति पुनः शङ्कते॥ बुद्धश्चेदिति॥ तर्हि बुद्धस्य पुनर्बोध्याभावात्तद्धेतुर्निवृत्तिरपि बुद्धं प्रत्यनुपयोगिनी स्यादाह॥
नाप्यसाविति॥ न स्थातस्य बोध्यस्य स्थिरत्वाय निवृत्तिरपेक्ष्यते इत्याशङ्क्य स्थिरत्वे बाध्यकाभावमपेक्षते न

प्रवृत्तिर्नोपयुक्ता चेन्निवृत्तिः कोपयुज्यते॥ बोधहेतुर्निवृत्तिश्चेद्बुभुत्सायां तथेतरा॥ ७६॥ बुद्धश्चेन्न बुभु
त्सेत नाप्यसौ बुध्यते पुनः॥ अबाध्यादनुवर्तेत बोधो न त्वन्यसाधनात्॥ ७७॥ नाविद्या नापि तत्कार्यं बो
धं बाधितुमर्हति॥ पूर्वं तत्त्वबोधेन बाधिते ते उभे यतः॥ ७८॥ बाधितं दृश्यतामक्षैस्तेन बाध्यो न शङ्क्यते
जीवन्नाखुर्न मार्जारं हन्ति हन्यात्कथं मृतः॥ ७९॥ साधनान्तरमित्याह॥ अबाध्यादिति॥ वाक्यप्रमाण
जन्यज्ञानस्य बलवत्ता प्रमाणेन बाध्याभावादनुवृत्तिः स्यादेवातो न साधनान्तरं तदर्थमनुष्ठेयमित्यर्थः॥ ७७॥
ननु प्रमाणान्तरेण बाध्याभावेऽप्यविद्यया तत्कार्येण वा तत्साध्यासेन वा बाधः स्यादित्याशङ्क्याह॥ नाविद्येति॥
तत्र हेतुमाह॥ पूर्वमेवेति॥ नन्वविद्यया बाधितत्वेऽपि तत्कार्यस्य प्रतीयमानस्य बाधितत्वसंभवो तेन [illegible] बाधो
भवेदित्याशङ्क्य पादाननिरस्येव तस्य बाधितत्वान्न तेनापि बाधः शङ्कितुं शक्यत इत्याह॥ बाधितमिति॥ तत्र

बोधस्य

॥त्त्र०॥
॥३६॥

२ ने

द्वैतदर्शनेन तत्त्वबोधस्य बाधाभावं कैमुतिकन्यायप्रदर्शनेन द्रढयितुं तदनुकूलं दृष्टान्तमाह। अपितिपः समर्थः। पा
शुपतास्त्रेण विद्धोपि न मर्माविच्छिन्नः सन् निःफलेषु वितन्वानः शल्यरहितेषुणा व्यथितदेहः सन्नस्यति नाशं प्राप्स्य
तीत्यत्र का प्रमा प्रमाणं नास्तीत्यर्थः॥ दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति। आरावेति। आरो विद्याभ्याससमये
चित्तैर्बहुविधैः स्वकार्यैः प्रमातृत्वभोक्तृत्वकर्तृत्वादिभिर्भ्रमाणां पाविद्धमानया विद्यमानस्य बोधापुष्पायुद्धस्या

अपि पाशुपतास्त्रेषु विद्धस्येव ममार यः॥ निःफलेषु वितन्वानो नक्ष्यतीत्यत्र का प्रमा॥ ८०॥ आरावविद्य
या चित्तैः स्वकार्यैर्भ्रमाणया। पुष्पा बोधो न यत्सोऽद्य सहृदो बाध्यतां कथं॥ ८१॥ तिष्ठन्त्वत्तानि तत्कार्यं
वा बोधेन मारितोः। न भीतिर्बोधसंत्राजः कीर्तिः प्रस्तुतेन स्यते॥ ८२॥ य एवमतिभूरिणा बोधेन नवि
पुस्पते। प्रवृत्त्या वा निवृत्त्या वा देहादिगतया स्पृके॥ ८३॥

तामजनयत। स एव ह्यभ्यासपाटवेन सुदृढो घेद्ध्ररीमविद्यानि

ससां

वृत्तौ निर्मूलेन तत्कार्येणाभ्यासेन कथं बाध्यतां न कथमपि बाध्यते इत्यर्थः॥ उपपादितमर्थं श्रोतृबुद्ध्यारोहाय स्वरूपकेणाह। तिष्ठ
न्त्विति। भवत्स्वेवं प्रवृत्ते किं मा पातमिस्यत आह। य एवमिति। यः पुमानेवमुक्तप्रकारेण अतिभूरिणा विद्यातत्कार्यघातकेन
बोधेन ब्रह्मात्मैकत्वज्ञानेन नियुज्यते न कदापि विमुक्तो भवति। अस्य पुंसो देहादिनिष्ठया प्रवृत्त्या वा निवृत्त्या वा किं न किमपी
ष्टमनिष्टं वेत्यर्थः॥ ८३॥

तर्हि ज्ञानिवदज्ञानिनोपि प्रवृत्तावाग्रहो न युक्त इत्याशंक्याह प्रवृत्ता वित्ति ॥ तत्रोपपत्तिमाह स्वर्गायेति ॥८४॥ विदुष आग्र
होन युक्त इत्युक्तं तर्हि कर्मिणां मध्ये वर्तमानेन तेन किं कर्तव्यमित्यत आह ॥ विद्वान्स्वेदिति ॥ विद्वांस्तादृशां कर्मिणां मध्ये ति
ष्ठेच्चेत्तदनुरोधतस्तेषामनुसारेण शरीरादिभिः सर्वाः क्रियाः कुर्वीतैव न तान्कर्मिणो निवारयेदित्यर्थः ॥८५॥ असे

तत्वं

व बुभुत्सूनां मध्ये स्थितस्य कृत्यमाह ॥ एष इति ॥ एष विद्वान्बुभुत्सूनां मध्ये यदा तिष्ठेत्तदा एषां बुभुत्सूनां बोधायतत्

प्रवृत्तावाग्रहो न्याय्यो बोधहीनस्य सर्वथा ॥ स्वर्गाय वापवर्गाय यतितव्यं ततो नृभिः ॥८४॥ विद्वांश्चेत्तादृशां म
ध्ये तिष्ठेत्तदनुरोधतः ॥ कायेन मनसा वाचा करोत्येवाखिलाः क्रियाः ॥८५॥ एष मध्ये बुभुत्सूनां यदा तिष्ठे
त्तदा पुनः ॥ बोधायैषां क्रियाः सर्वा दूषयंस्त्यजतु स्वयं ॥८६॥ अविद्वदनुसारेण वृत्तिर्बुद्धस्य युज्यते ॥ स्तनं
धयानुसारेण वर्तन्ते तत्पितायतः ॥८७॥ अधिक्षिप्तस्ताडितो वा बालेन स्वपिता तदा ॥ न क्लिश्यति न कुप्येच्च
बालं प्रत्युत लालयेत् ॥८८॥ निंदितः स्तूयमानो वा विद्वानज्ञैर्न निंदति ॥ न स्तौति किंतु तेषां स्याद्यथा बोधस्तथा ॥

लत्तानज्ञजननायताः क्रिया दूषयन्स्वयमपि त्यजतु ॥८६॥ कुत एवं कर्तव्यमित्यत आह ॥ अविद्वदिति ॥ अज्ञान्यनु
सारेण ज्ञानिनो वर्तनमुचितं कृपालुत्वात्तेषामनुकंपनीयत्वाच्चेति भावः ॥ एवं कुत इत्यत आह ॥ स्तनंधयेति
स्तनंधयाः स्तनपानकर्तारः शिशव इत्यर्थः ॥८७॥ पितुस्तनंधयानुसारित्वमेव दर्शयति ॥ अधिक्षिप्त इति
८८ ॥ दार्ष्टान्तिकं योजयति ॥ निंदित इति ॥ विद्वानज्ञैर्निंदितः स्तूयमानो वा स्वयं न निंदति ॥ न स्तौति किंतु तेषामज्ञानिनां

॥त्त०॥
॥३७॥

एवमाचरणे निमित्तमाह॥ येनायमिति॥ अयमज्ञानी अत्रास्मिंल्लोके विदुषो येन यादृशेन नटनेन आचरणेन बुध्यते तत्त्वमवगच्छति तेन तदाचरणं कर्तव्यमेव तत्र हि तद्देवकार्यान्तरमपि प्रसज्येतेत्यत आह॥ अज्ञप्रबोधादिति॥ एत त्तद्विदस्तत्त्वविदोऽत्र लोके अज्ञप्रबोधादन्यत्कर्तव्यं नैवास्त्यतस्तदनुसारेण तत्त्वबोधनं कर्तव्यमित्यर्थः॥९०॥ कृतवर्ति ष्यमाणयोस्तात्पर्यमाह॥ कृतकृत्यतयेति॥ असौ विद्वान् पूर्वोक्तप्रकारेण कृतकृत्यतया कृतकृत्यज्ञात येनासौ कृतत

येनायं नटनेनात्र बुध्यते कार्यमेव तत्॥ अज्ञप्रबोधान्नैवान्यत्कार्यमस्त्यत्र तद्विदः॥२९०॥ कृतकृत्यतया तृप्तः
प्राप्तप्राप्यतया पुनः॥ तृप्यन्नेवं स्वमनसा मन्यतेऽसौ निरन्तरं॥२९१॥ धन्योऽहं धन्योऽहं नित्यं स्वात्मानमं
जसा वेद्मि॥ धन्योऽहं धन्योऽहं ब्रह्मानन्दो विभाति मे स्पष्टं॥२९२॥ [illegible] ॥

तकृत्यस्तत्स्वभावस्तज्जाततयात्तृप्तः सन्पुनर्वक्ष्यमाणप्रकारेण प्राप्तप्राप्यतया प्राप्तं प्राप्यं येन स [illegible]
प्राप्तप्राप्यस्तत्स्वभावस्तत्तास्तया तृप्यन्तुष्टो भवन्स्वमनसा निरन्तरमेवं मन्यते॥२९१॥ किं मन्यते इत्यत आह॥
धन्योऽहमित्यादिना॥ धन्यः कृतार्थः आदरार्थं वीप्सा॥ नित्यमनवरतं स्वात्मानं स्वस्य निजस्वरूपं देशाद्यनवच्छि
न्नं प्रत्यगात्मानमञ्जसा साक्षात्सत्वेन विजानामीत्यतो धन्य इत्यर्थः॥ एवमात्मलाभनिमित्तां तुष्टिमभिधाय तत्त
त्त्वलाभनिमित्तां तां दर्शयति॥ धन्योऽहमिति॥ ब्रह्मानन्दो ब्रह्मभूतानन्दः मे स्पष्टं विभाति स्पष्टं यथा भवति तथा

एवमिष्टप्राप्त्या तुष्टिमभिधायानिष्टनिवृत्त्यापि तुष्यतीत्याह ॥ धन्योहमिति ॥ अथेदानीं सांसारिकाः संसारिणः कर्तृत्वा
द्यभिमानवन्तः स्वाङ्गं दुःखं दुःखरूपं संसारं न वीक्ष्ये न पश्यामि यतः कृतार्थ इत्यर्थः ॥ दुःखाप्रतीतौ कारणमाह ॥ ध
न्योहमिति ॥ अनेकवासनाजालमज्ञानं क्वापि पलायितं नष्टमित्यर्थः ॥ १३ ॥ अज्ञाननिवृत्तिफलं कृतकृत्यत्वं प्राप्त
प्राप्तव्यत्वं च दर्शयति ॥ धन्योहमिति ॥ १४ ॥ इदानीं कृतकृत्यत्वमित्यादिना जातायां स्तुतौ निरतिशयत्वमाह ॥ धन्यो

धन्योहं धन्योहं दुःखं सांसारिकं न वीक्ष्ये च ॥ धन्योहं धन्योहं स्वस्याज्ञानं पलायितं क्वापि ॥ १३ ॥ धन्यो
हं धन्योहं कर्तव्यं मे न विद्यते किंचित् ॥ धन्योहं धन्योहं प्राप्तव्यं सर्वमद्य संपन्नं ॥ १४ ॥ धन्योहं धन्योहं
तृप्तेर्मे कोपमा भवेल्लोके ॥ धन्योहं धन्योहं धन्यो धन्यः पुनः पुनर्धन्यः ॥ १५ ॥ अहो पुण्यमहो पुण्यं फलितं
फलितं दृढं ॥ अस्य पुण्यस्य संपत्तेरहो वयमहो वयं ॥ १६ ॥ अहो शास्त्रमहो शास्त्रमहो गुरुरहो गुरुः ॥ अ
हो ज्ञानमहो ज्ञानमहो सुखमहो सुखं ॥ १७ ॥ तत्त्वसिद्धेः परमिमं नित्यं येनुसंदधते बुधाः ॥ ब्रह्मानन्दे निमज्जं

हमिति ॥ अतः परं वक्तव्याभावाद्दर्शनात् तुष्टिरेव स्फुरतीति दर्शयति ॥ धन्योहमिति ॥ १५ ॥ अस्य सर्वस्य कारणभूतं पुण्यपुंज
परिपाकमनुस्मृत्य तुष्यतीत्याह ॥ अहो पुण्यमिति ॥ स्वं पुण्यसंपादकमात्मानमनुस्मृत्य तुष्यतीत्याह ॥ अस्येति ॥ १६ ॥
इदानीं सम्यग्ज्ञानसाधनं शास्त्रं तदुपदेष्टारमाचार्यं चानुस्मृत्य तुष्यति ॥ अहो शास्त्रमिति ॥ पुनश्च शास्त्रजन्यज्ञा
नं तज्जन्यसुखं चानुस्मृत्य तुष्यति ॥ अहो ज्ञानमिति ॥ ग्रंथाभ्यासफलमाह ॥ तत्त्वेति ॥ इति श्रीमत्परमहंसपरिव्राज

॥स्त०॥
॥३८॥

॥श्रीतुखिदीपः समाप्तः॥

पंचमाध्यायप्रतिपाद्यमर्थमाह ॥ अथेति ॥ ननु विषयानंदस्य लौकिकत्वान्मोक्षशास्त्रे निरूपणमनुपपन्नमित्याशंक्य तत्स्य लोकप्रसिद्धत्वेपि ब्रह्मानंदैकदेशत्वेन ब्रह्मज्ञानोपयोगित्वाच्चुक्तमित्याह ॥ द्वारेति ॥ ब्रह्मानंदैकदेशत्वे किं प्रमाणमित्याशंक्याह ॥ तदंशत्वमिति ॥ तामेव श्रुतिमर्थतः पठति ॥ एष इति ॥ इदानीं विषयानंदस्य ब्रह्मानंदलेशत्वप्रदर्शनाय तदुपाधिभूतांतःकरणवृत्तीर्विभजति ॥ शांता इति ॥ शांताः सात्त्विक्यो वृत्तयः घोरा राजस्यः मूढास्तामस्यः ॥ ता एव

॥ अथात्र विषयानंदो ब्रह्मानंदांशरूपभाक् ॥ निरूप्यते द्वारभूतस्तदंशत्वं श्रुतिर्जगौ ॥ १ ॥ एषोस्य परमानंदो योखंडैकरसात्मकः ॥ अन्यानि भूतान्येतस्य मात्रामेवोपभुंजते ॥ २ ॥ शांता घोरास्तथा मूढा मनसो वृत्तयस्त्रिधा ॥ वैराग्यं क्षांतिरौदार्यमित्याद्याः शांतवृत्तयः ॥ ३ ॥ तृष्णा स्नेहो रागलोभावित्याद्या घोरवृत्तयः ॥ संमोहो भयमित्याद्याः कथिता मूढवृत्तयः ॥ ४ ॥ वृत्तिष्वेतासु सर्वासु ब्रह्मणश्चित्स्वभावता ॥ प्रतिबिंबति शांतासु सुखं च प्रतिबिंबति ॥ ५ ॥ रूपं रूपं बभूवासौ प्रतिरूप इति श्रुतिः ॥ उपमा सूर्यकेत्यादि सूत्रयामास सूत्रकृत् ॥ ६ ॥ एक एव तु भूतात्मा भूते भूते व्यवस्थितः ॥ एकधा बहुधा चैव दृश्यते जलचंद्रवत् ॥ ७ ॥ ५७

शांतादिरूपाणि दर्शयति ॥ वैराग्यमित्यादिना ॥ उदाहृतासु त्रिविधास्वपि वृत्तिषु ब्रह्मणश्चिद्रूपत्वं प्रतिभातीत्याह ॥ वृत्तिष्विति ॥ शांतासु विशेषमाह ॥ शांतास्विति ॥ च शब्दः उक्तद्वयसमावेशार्थः ॥ उक्तार्थे श्रुतिवाक्यमर्थतः पठति ॥ रूपमिति ॥ तत्रैव व्याससूत्रैकदेशं पठति ॥ उपमेति ॥ अत एव चेति सूत्रस्य पूर्वभागः ॥ स्वरूपेणैकस्योपाधिसंपर्कान्नानात्वे श्रुतिं पठति ॥ एक एवेति ॥ ७ ॥ ५७ ॥

१वि०नं५
११९११

ननु निरवयवस्य ब्रह्मणः क्वचिच्चिन्मात्रभानमितरत्र तु चिदानंदभानमित्येवं विभागकरणमनुपपन्नमित्याशंक्य चंद्रदृष्टां
तेन क्वचिच्चिदानंदभानमुपपन्नमित्याह॥ जलेप्रविष्टइति॥ तदेवोपपादयति॥ घोरेति॥ ननु चंद्रोपाधेरुदकस्य द्वैविध्याद्द्व
भानमुपपन्नं प्रवृत्तेरुपाधिभूतस्यांतःकरणस्यैकत्वादेकांशभानमनुपपन्नमित्याशंक्य दृष्टांतांतरमाह॥ यद्वापीति॥

जलेप्रविष्टश्चंद्रोयमस्पष्टः कलुषेजले॥ विस्पष्टो निर्मलेतद्वद्द्वेधापिब्रह्मवृत्तिषु॥८॥ घोरमूढासुमालिन्या
सुखांशस्यतिरोहितिः॥ ईषन्नैर्मल्यतस्तत्रचिदंशप्रतिबिंबनं॥९॥ यद्वापिनिर्मलेनीरेवह्नेरौष्ण्यस्यसंक्र
मः॥ नप्रकाशस्यतद्वत्स्याच्चिन्मात्रोद्भूतिरत्रच॥१०॥ काष्ठेत्वौष्ण्यप्रकाशौद्वावुद्भवंगच्छतोयथा॥ शांतासु
सुखचैतन्येतथैवोद्भूतिमाप्नुतः॥११॥ वस्तुस्वभावमाश्रित्यव्यवस्थातूभयोःसमा॥ अनुभूत्यनुसारेणक
ल्प्यतेहिनियामकं॥१२॥ नघोरासुनमूढासुसुखानुभवईक्ष्यते॥ शांतास्वपिक्वचित्कश्चित्सुखातिशय
ईक्ष्यते॥१३॥ गृहक्षेत्रादिविषयेयदाकामोभवेत्तदा॥ राजसस्यास्यकामस्यघोरत्वात्तत्रनोसुखं॥१४॥

इदानीं शांतासु वृत्तिषु चिदानंदयोः प्रतीतौ दृष्टांतांतरमाह॥ काष्ठेत्विति॥ नन्वेवं व्यवस्था कुतः कृतेत्याशंक्याह॥ वस्त्वि
ति॥ तत्र किं नियामकमित्याशंक्याह॥ अनुभूतीति॥ अनुभूतिमेव दर्शयति॥ नघोरास्विति॥ शांतास्वप्यानंदप्रकाशो
स्ति सोपि क्वचित्क्वचित्सुखातिशयो भवतीत्याह॥ शांतेति॥ पूर्वोक्तघोरमूढवृत्तिषु सुखाभावमेवाभिनीय दर्शयति॥ गृ
हक्षेत्रेति॥ शांतास्वप्यानंदप्रकाशोस्ति सोपि क्वचित्कश्चिन्नवेत्तित्तत्रप्रति

सुखासिद्धौदुःखंवर्द्धतेसुखस्यप्रतिबंधेतुक्रोधोभवति।सुखाभावकारणांतरमाह।द्वेषोवेति।प्रतिहारस्याशक्यत्वेविषादो
भवति।तस्यापितामसत्वान्नतत्रसुखमित्याह।अशक्यइति।क्रोधादिष्वित्यादयःस्पष्टार्थाः।एवंसात्यादीनांसिद्धमि

सिद्धेनवेत्यस्यदुःखमसिद्धौतद्विवर्द्धते।।प्रतिबंधेभवेत्क्रोधोद्वेषोवाप्रतिबंधकः॥१५॥अशक्यश्चेत्प्रती
कारोविषादःस्यात्सतामसः॥क्रोधादिषुमहद्दुःखंसुखशंकापिदूरतः॥१६॥काम्यलाभेहर्षवृत्तिःशां
तातत्रमहत्सुखं॥भोगेमहत्तरंलाभप्रसक्तावीषदेवहि॥१७॥महत्तमंविरक्तौतुविद्यानंदेतदीरितं॥ए
वंक्षांतौतथौदार्येक्रोधलोभनिवारणात्॥१८॥यद्यत्सुखंभवेत्तत्तद्ब्रह्मैवप्रतिबिंबनात्॥वृत्तिष्वंतर्मु
खास्वस्यनिर्विघ्नंप्रतिबिंबनं॥१९॥सत्ताचितिःसुखंचेतिस्वभावाब्रह्मणस्त्रयः॥मृच्छिलादिषुस
त्तैवव्यज्यतेनेतरद्द्वयं॥२०॥सत्ताचितीद्वयंव्यक्तंधीवृत्त्योर्घोरमूढयोः॥शांतवृत्तौत्रयंव्यक्तंमिश्रं
ब्रह्मेत्थमीरितं॥२१॥ छ ॥ छ ॥ छ ॥ छ ॥

त्याह।वृत्तिष्विति।इदानींसर्वत्रब्रह्मस्वरूपानुभूतिप्रदर्शनायतत्स्वरूपंस्मारयति।सत्तेति।मृच्छिलादिषुसन्मात्र
मित्यर्थः।घोरमूढयोःसत्ताचितीद्वेशांतवृत्तौतुसच्चिदानंदास्त्रयोपिव्यक्ताएवंसप्रपंचंब्रह्माभिहितमित्याह।

॥वि॰नं॰५
॥२॥

अमिश्रं ब्रह्म कुतो ज्ञायत इत्याशंक्याह। अमिश्रमिति। तौ च ज्ञानयोगौ पूर्वमेवोक्तावित्यर्थः। कुत्रोक्तावित्याशंक्य योगः प्रथमा
ध्याय उक्त इत्याह। आद्य इति। समनंतराध्याययोर्ज्ञानमुक्तमित्याह। ज्ञानमिति। ननु सच्चिदानंदानां ब्रह्मरूपत्वे मायायाः
किं रूपमित्याशंक्याह। असत्तेति। नृशृंगादावसत्त्वं मृच्छिलादिषु जाड्यमिति विवेकः। दुःखं कुत्रेत्याशंक्याह। घोर
मूढेति। एवं सर्वत्र माया प्रतिभासत इत्याह। एवमिति। शांतादिवृत्तिषु ब्रह्मणो मिश्रत्वे किं कारणमित्यत आह। शां

अमिश्रं ज्ञानयोगाभ्यां तौ च पूर्वमुदीरितौ॥ आद्येऽध्याये योगचिंता ज्ञानमध्याययोर्द्वयोः॥२२॥ असत्ता दुःखजाड्ये
द्वे मायारूपं त्रयं त्विदं॥ असत्ता नरशृंगादौ जाड्यं काष्ठशिलादिषु॥२३॥ घोरमूढधियोर्दुःखमेवं माया विजृंभिता॥
शांतासु जडबुद्ध्यैक्यान्मिश्रं ब्रह्मेति कीर्तितं॥२४॥ एवं स्थितेऽत्र यो ब्रह्म ध्यातुमिच्छेत्पुमानसौ॥ नृशृंगादिमुपेक्षे
त शिष्टं ध्यायेद्यथायथं॥२५॥ शिलादौ नामरूपे द्वे त्यक्त्वा सन्मात्रचिंतनं॥ त्यक्त्वा दुःखं घोरमूढधियोः सच्चि
द्विचिंतनं॥२६॥ शांतासु सच्चिदानंदांस्त्रीनप्येवं विचिंतयेत्॥ कनिष्ठमध्यमोत्कृष्टास्तिस्रश्चिंताः क्रमादि
माः॥२७॥ मंदस्य व्यवहारेऽपि मिश्रब्रह्मणि चिंतनं॥ उत्कृष्टं वक्तुमेवात्र विषयानंद ईरितः॥२८॥

तास्विति। एतदभि
धानं किमर्थमित्याशंक्य ब्रह्मध्यानार्थमित्याह। एवमिति। नृशृंगादिमुपेक्ष्यान्यत्र ब्रह्मध्यानं कर्तव्यमित्यर्थः। नृशृंगादि
मिति। अन्यत्रेत्युक्तं कुत्र किं ध्येयमित्यत आह। शिलादाविति। घोरमूढबुद्धिषु दुःखपरित्यज्य सच्चिद्रूपयोश्चिंतनं
कर्तव्यमित्याह त्यक्त्वेति। सात्विकवृत्तिषु सच्चिदानंदास्त्रयोऽपि ध्येया इत्याह। शांतास्विति। एवं ध्यानानां किं सा

एवं सवृत्तिकं ध्यानत्रयमुक्त्वाऽवृत्तिकं ध्यानमाह। औदासीन्ये इति। एभ्यो ध्यानेभ्योऽधिकमित्यर्थः॥ उक्तं निगमयति। ध्या
नमिति। अथ ध्यानावांतरभेदः किं नेत्यत आह। न ध्यानमिति। तर्हि किमेतदित्याशंक्याह। ब्रह्मविद्येति। इयं ब्रह्मविद्या
कथमुत्पन्नेत्याशंक्याह। ध्यानेनेति। अस्या विद्यायै हेतुमाह। विद्यायामिति। भेदकोपाधिवर्जनादित्युक्तं तेनैव भे

औदासीन्ये तु धीवृत्तेः शैथिल्यादुत्तमोत्तमं॥ चित्तं न वासनानंदो ध्यानमुक्तं चतुर्विधं॥२९॥ न ध्यानं ज्ञा
नयोगाभ्यां ब्रह्मविद्यैव सा खलु॥ ध्यानेनैकाग्र्यमापन्ने चित्ते विद्या स्थिरा भवेत्॥३०॥ विद्यायां सच्चिदां
नंदा अखंडैकरसात्मता॥ प्राप्य भांति न भेदं न भेदकोपाधिवर्जनात्॥३१॥ शांता घोराः शिलाद्याश्च भे
दकोपाधयो मताः॥ योगाद्विवेकतो वैषामुपाधीनामपाकृतिः॥३२॥ निरुपाधिब्रह्मतत्त्वे भासमाने स्व
यंप्रभे॥ अद्वैते त्रिपुटी नास्ति भूमानंदोत उच्यते॥३३॥ ब्रह्मानंदाभिधे ग्रंथे पंचमोध्याय ईरितः॥ विष
यानंद एतेन द्वारेणांतः प्रविश्यतां॥३४॥ प्रीयाद्धरिहरोनेन ब्रह्मानंदेन सर्वथा॥ पायाच्च प्राणिनः सर्वान्
स्वाश्रितान् शुद्धमानसान्॥३५॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविद्यारण्यविरचिते ब्रह्मानं

दकोपाधीनाह। शांतेति। एतेषां परिहारः केनोपायेनेत्यत आह। योगादिति। फलितमाह। निरुपाधीति। त्रिपुटीभा
नाभावाद्भूमानंद उच्यते इत्यर्थः॥ ग्रंथमुपसंहरति ब्रह्मानंदेति॥ इति श्रीमत्परमहंसपरिव्राज० श्रीविद्या० रामकृ
ष्णाख्यविदुषा विरचिते ब्रह्मानंदविवरणे विषयानंदः पंचमोध्यायः॥ शाके १७८३ भाद्र० शु० ९ रोज शुक्रवार.

श्लो० कसंख्या १५८०

॥ श्रीगणेशाय नमः ॥ ६

यो

इदानीं वक्ष्यमाणवर्तिष्यमाणग्रंथयोः संबंधमाह। योगेनेति। विद्यानंदस्वरूपमाह। विषयेति। तस्यावांतरभेदमाह। दुःखाभावेति।
चातुर्विध्यमेव दर्शयति दुःखाभावश्चेति। निवर्तनीयं दुःखं विभजते। ऐहिकमिति। ऐहिकस्य निवृत्तिं बृहदारण्यकवाक्येन
व्यत इत्याह। निवृत्तिमिति। तच्छ्रुतिवाक्यं पठति। आत्मानं चेदिति। आत्मनिष्ठत्वसंबंधं दर्शयितुं तद्वदमाह। जीवात्मे

योगेनात्मविवेकेन द्वैतमिथ्यात्वचिंतया। ब्रह्मानंदं पश्यतोऽथ विद्यानंदो निरूप्यते ॥१॥ विषयानंदवद्विद्याने
दो धीवृत्तिरूपकः ॥ दुःखाभावादिरूपेण प्रोक्त एष चतुर्विधः ॥२॥ दुःखाभावश्च कामाप्तिः कृतकृत्योऽहमित्य
सौ ॥ प्राप्तप्राप्योऽहमित्येवं चातुर्विध्यमुदाहृतं ॥३॥ ऐहिकं चामुष्मिकं चेत्येवं दुःखं द्विधेरितं ॥ निवृत्तिमैहिकस्या
ह बृहदारण्यकवचः ॥४॥ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ॥ किमिच्छन्कस्य कामाय शरीरमनुसंज्वरे
त् ॥५॥ जीवात्मा परात्मा चेत्यात्मा द्विविध ईरितः ॥ चित्तादात्म्यात्त्रिभिर्देहैर्जीवः सन्भोक्तृतां व्रजेत् ॥६॥ परा
त्मा सच्चिदानंदस्तादात्म्यं नामरूपयोः ॥ गत्वा भोग्यत्वमापन्नस्तद्विवेके तु नोभयं ॥७॥ भोग्यमिच्छन्भोक्तुरर्थे
शरीरमनुसंज्वरेत् ॥ ज्वरास्त्रिषु शरीरेषु स्थिता न त्वात्मनो ज्वराः ॥८॥

ति भात्मनो जीवत्वे निमित्तमाह। चित्तादा
त्म्येति। चैतन्यस्य स्थूलसूक्ष्मकारणरूपैस्त्रिभिस्तादात्म्यभ्रमे सति भोक्तृत्वं भवति स भोक्ता जीव इत्युच्यते। इदानीं पर
मात्मनः स्वरूपमाह। परात्मेति। तस्य भोग्यरूपतापत्तिप्रकारमाह। तादात्म्यमिति। नामरूपकल्पनाधिष्ठानत्वेन तत्ता
दात्म्यं प्राप्य भोग्यमित्यर्थः। भोक्तृत्वाद्यभावकारणमाह। तद्विवेक इति। ताभ्यां शरीरत्रयजगद्भ्यां विवेके भेदे ज्ञाते सति

नोभयं भोक्तृभोग्यरूपं नास्तीत्यर्थः ॥ उक्तमर्थं विवृणोति।

भोग्यमिति। कस्य तर्हि ज्वराभिसंबंधस्तत्राह ज्वर इति ॥८॥

सुच्यतइ

विवेका०२
११॥

कस्मिन्शरीरे को ज्वर इत्याशंक्य स्थूलदेहे विद्यमानान्ज्वरान्दर्शयति। व्याधय इति। लिंगदेहगतान्ज्वरानाह। कामेति। इदानीमुदाहृतश्रुतितात्पर्यं कथनव्याजेन पूर्वोक्तमेवार्थं विशदयति। अद्वैतेति। तृतीयाध्यायोक्तप्रकारेण मायाकार्येनामरूपाभ्यां सच्चिदानंदपरमात्मनि विविक्ते चित्ते भेदेन ज्ञाते सति सर्वे प्रपंचं मिथ्येति ज्ञानवान्किं नाम भोग्यमिच्छतीति ततः पूर्वाध्यायोक्तरीत्या जीवात्मस्वरूपे ऽसंगकूटस्थचैतन्यरूपे निश्चिते सति कामयितुरभावाज्ज्वरादिसंबंधो नास्तीत्याह। आत्मानंदेति। इदानीमा

व्याधयो धातुवैषम्ये स्थूलदेहे स्थिता ज्वराः॥ कामक्रोधादयः सूक्ष्मे द्वयोर्बीजं तु कारणे॥९॥ अद्वैतानंदमार्गेण परात्मनि विवेचिते॥ अपश्यन्वास्तवं भोग्यं किन्नामेच्छेसरात्मवित्॥१०॥ आत्मानंदोक्तरीत्यास्मिन्जीवात्मन्यवधारिते॥ भोक्तानैवास्ति कोप्यत्र शरीरे तु ज्वरः कुतः॥११॥ पुण्यपापद्वये चिंता दुःखमामुष्मिकं भवेत्॥ प्रथमाध्याय एवोक्तं चिंता नैनं तपेदिति॥१२॥ यथा पुष्करपर्णेस्मिन्नपामश्लेषणं तथा॥ वेदनादूर्ध्वमागामिकर्मणोऽश्लेषणं बुधे॥१३॥ इषीकातूणतूलस्य वह्निदाहः क्षणाद्यथा॥ तथा संचितकर्मास्य दग्धं भवति वेदनात्॥१४॥ आ

मुष्मिकं ज्वरं दर्शयति। पुण्यपापेति। तस्याभावः प्रथमाध्याये निरूपित इत्याह। प्रथमेति। ननु ज्ञानिन आरब्धकर्मविषयाचिंता मा भूदागामिकर्मविषया चिंता भवत्येवेत्याशंक्य तत्र यथा पुष्करपर्ण इत्यादिश्रुत्या ज्ञानिन आगामिकर्मसंबंध निराकरणात्तद्विषयापि चिंता नास्तीत्याह। यथेति। तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंत इति श्रुत्यवष्टंभेन संचितकर्मविषयापि चिंता ज्ञानिनो नास्तीत्याह। इषीकेति॥१५॥ ७ ॥

84

मपि

उक्तार्थे भगवद्वाक्यं प्रमाणयति। यथेति॥ अस्मिन्नेवार्थे न मातृवधेन न पितृवधेन न स्तेयेन न भ्रूणहत्यया नास्य पापं चन न मुखो मुखान्नीलं वेतीति च्छांदोगश्रुतिवाक्यमर्थतः पठति। मातापित्रोरिति। चनेत्येकं पदं नीलमिति कांतिरित्यर्थः॥ उक्तं चातुर्विध्यमध्ये द्वितीयप्रकारमाह। दुःखेति॥ ईरितेत्यश्रुत्येति शेषः॥ अस्मिन्नेवार्थे ऐतरेयश्रुतिवाक्यं पठति। सर्वानिति। जक्षन्क्रीडन्रममाणः स्त्रीभिर्यानैर्वा ज्ञातिभिर्वा वयस्यैर्वा नायं जनं स्मरन्निदं शरीरमिति च्छांदोगश्रुतिवाक्यमर्थतः पठति। ज

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥ १५॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते॥ हत्वापि स इमांल्लोकान्न हंति न निबध्यते॥ १६॥ मातापित्रोर्वधः स्तेयं भ्रूणहत्यान्यदीदृशं॥ न मुक्तिं नाशयेत्पापं मुखकांतिर्न नश्यति॥ १७॥ दुःखाभाववदेवास्य सर्वकामाप्तिरीरिता॥ सर्वान्कामानवाप्त्वाथ ह्यमृतोऽभवदित्यतः॥ १८॥ सर्वान्कामानवाप्नोति नान्यवज्जन्मकर्मभिः॥ वर्तंते श्रोत्रिये भोगा युगपत्क्रमवर्जिताः॥ १९॥ युवा रूपी च विद्यावान्नीरोगो दृढचित्तवान्॥ सैन्योपेतः सर्वपृथ्वीं वित्तपूर्णां प्रपालयन्॥ २०॥ सर्वैर्मानुष्यकैर्भोगैः संपन्नस्तृप्तभूमिपः॥ यमानंदमवाप्नोति ब्रह्मविच्च तमश्नुते॥ २१॥

क्षदित्यत्रैवते त्तिरीयश्रुतिवाक्यं पठति। सर्वानिति॥ ननु कर्मफलभोगांगीकारे जन्मापि प्रसज्येतेत्याशंक्याह। नान्यवदिति। ज्ञानेन संचितकर्मणां दग्धत्वादस्य जन्म नास्तीत्यर्थः॥ इदानीं तैत्तिरीयबृहदारण्यकवाक्यं संक्षिप्यार्थतः पठति। युवेति। ननु सार्वभौमादिहिरण्यगर्भांतानां जीवनिष्ठानामानंदानां कथं ज्ञानिनि संभवइत्याशंक्य सर्वेषामानंदानां ज्ञानिना वगततत्त्वज्ञाताभवेदित्याह। यमा

जक्षन्क्रीडन्रतिं प्राप्तः स्त्रीभिर्यानैस्तथेतरैः॥ शरीरं न स्मरेत्प्राणः कर्मणा जीवयेदमुं॥ १९॥

85

विद्या॰
११२॥

ननु सार्वभौमश्रोत्रिययोर्विषयप्राप्तिसाम्याभावात्कथमानंदसाम्यमित्याशंक्य नैरपेक्ष्यसाम्यात्तृप्तिसाम्यमित्याह मर्त्येति।
तृप्तिसाम्ये हेतुमाह। भोगादिति। विवेकत इत्युक्तमर्थं विवृणोति। श्रोत्रियत्वादिति। विषयदोषाः कस्यां शाखायां केन निरू
पिता इत्याशंक्य बृहद्रथेन मैत्रायणीयाख्यशाखायां गाथाभिरुक्ता इत्याह। राजेति। विवेकिनः कामानुदये दृष्टांतमाह॥

मर्त्यभोगे द्वयोर्नास्ति कामस्तृप्तिरतः समा॥ भोगान्निष्कामतैकस्य परस्यापि विवेकतः॥२३॥ श्रोत्रियत्वाद्वेद
शास्त्रैर्भोगदोषानवेक्षते॥ राजा बृहद्रथो दोषांस्तान्गाथाभिरुदाहरत्॥२४॥ देहदोषाश्चित्तदोषा भोग्यदोषा
अनेकशः॥ शुना वांते पायसे नो कामस्तद्वद्विवेकिनः॥२५॥ निष्कामत्वे समेऽप्यत्र राज्ञः साधनसंचये। दुःखमासी
द्भाविनाशादितिभीरनुवर्तते॥२६॥ नो भयं श्रोत्रियस्यातस्तदानंदोऽधिकोऽन्यतः॥ गंधर्वानंद आशास्ति राज्ञो ना
स्ति विवेकिनः॥२७॥ अस्मिन्कल्पे मनुष्यः सन्पुण्यपाकविशेषतः॥ गंधर्वत्वं समापन्नो मर्त्यगंधर्व उच्यते॥२८॥ पूर्व
कल्पे कृतात्पुण्यात्कल्पादावेव चेद्भवेत्॥ गंधर्वत्वं तादृशोऽत्र देवगंधर्व उच्यते॥२९॥ अग्निष्वात्तादयो लोके पितरश्चिरवा
सिनः॥ कल्पादावेव देवत्वं गता आजानदेवताः॥३०॥ अस्मिन्कल्पेऽश्वमेधादिकर्म कृत्वा महत्पदं॥ अवाप्याजानदेवैर्याः

शुनेति। सार्वभौमाच्छ्रोत्रियस्याधिक्यमाह। निष्कामत्वेति। सार्वभौमत्वसाधनसाध्यं पश्चाच्च तन्नाशः भीतिश्चेति दोषद्वया
घातत्वाच्छ्रोत्रिये तु तदुभयाभावादाधिक्यमित्यर्थः। श्रोत्रियस्याधिक्यांतरमाह। गंधर्वेति। इदानीं गंधर्वानंदद्वैविध्यं दर्श
यितुं श्लोकद्वयेन गंधर्वभेदमाह। अस्मिन्निति। चिरलोकपित्रानंदमदर्शनाय चिरलोकपितॄनाह। अग्निष्वात्तादय इति। देवानं
दद्वैविध्यत्तानायं देवभेदमाह। कल्पादावेवेति॥३१॥

इंद्रबृहस्पतीप्रसिद्धाविस्यर्थः। सार्वभौमादिसूत्रोक्तानां श्रोत्रियान्यूनत्वद्योतनायाह। सार्वभौमादीति। एभ्यः सर्वेभ्योधिकमा
नंदमाह। अवाङ्मनसेति। अयमात्मानंदो वाङ्मनसागम्यत्वात् एभ्यः सर्वेभ्योधिक इत्यर्थः। इदानीमेषां सर्वेषामानंदाः श्रोत्रियेवि
द्यंते तस्य तेषु निस्पृहत्वादित्याह। तैस्तैरिति। उपपादितमर्थमुपसंहरति। सर्वेति। इदानीं पक्षांतरमाह। यद्वेति। यथा स्वदेहे आ

यमाग्निमुख्या देवाः स्युर्ज्ञाता विंद्रबृहस्पती॥ प्रजापतिर्विराट् प्रोक्तो ब्रह्मा सूत्रात्मनामकः॥ २२॥ सार्वभौमादिसत्त्वां
ता उत्तरोत्तरकामिनः॥ अवाङ्मनसगम्योयमात्मानंदस्ततः परः॥ २३॥ तैस्तैः काम्येषु सर्वेषु सुखेषु श्रोत्रियो यतः॥
निस्पृहस्तेन सर्वेषामानंदाः संति तस्य ते॥ २४॥ सर्वकामाप्तिरेषोक्ता यद्वा साक्षिचिदात्मना॥ स्वदेहवत्सर्वदेहेष
पि भोगानवेक्षते॥ २५॥ अज्ञस्याप्येतदस्त्येव न तु तृप्तिरबोधतः॥ यो वेद सोश्नुते सर्वान्कामानित्यब्रवीच्छ्रुतिः॥
यद्वा सर्वात्मता स्वस्य साम्ना गायति सर्वदा॥ अहमन्नं तथान्नाद इति साम्नात्वधीयते॥ २७॥ दुःखाभावश्च का
माप्तिरुभे ह्येवं निरूपिते॥ कृतं कृत्यं तथा प्राप्तं प्राप्यत्वमीक्ष्यतां॥ २८॥ उभयं तत्सिद्धं पहि सम्यगस्माभिरीरि
तं॥ तत्र वात्रानुसंधेयाः श्लोका बुद्धिविशुद्धये॥ २९॥ ऐहिका॰ ।३०। तदेतत्कृ॰ ।३१। दुःखिनोज्ञाः सं॰ ।३२। अनुनिं

नंदाकारबुद्धिसाक्षित्वेनानंदित्वमितरेष्वपि देहेषु तद्दृष्टित्यर्थः॥ ननु तत्प्रकारेणाज्ञस्यापि सर्वानंदप्राप्तिरस्तीत्याशंक्य
सर्वेषु सर्वेबुद्धिसाक्ष्यहमितित्वानाभावान्नैवमित्याह। अज्ञस्यापीति। उक्तार्थे तैत्तिरीयकश्रुतिं प्रमाणयति। यो वेदेति।
गुहायां निहितं ब्रह्म यो वेद सोश्नुत इति योजना। इदानीं तृतीयप्रकारमाह यद्वेति। इमांल्लोकान्कामान्नीकामरूप्यनु
संचरन्नित्यादिनेत्यर्थः। अतीतग्रंथेन सिद्धमर्थं संक्षिप्याह। दुःखाभावश्चेति। अवशिष्टं कृतकृत्यत्वं प्राप्तप्राप्यत्वमित्यु

87

इदानीमध्यायार्थमुपसंहरन्ति ब्रह्मानंदाभिधइति॥६५॥इति ब्रह्मानंदे विद्यानंदोनामध्ये चतुर्थोध्यायस्य व्याख्या समाप्ता
निद्राभि०॥४५॥गुंजापुं०॥४६॥स्वप्नवत्तत्ता०॥४७॥विपर्यस्तो नि०॥४८॥अहं मनुष्य इ०॥४९॥आरब्धकं०॥५०॥वि
रलं०॥५१॥विक्षेपो ना०॥५२॥निरुध्यानुभवे०॥५३॥व्यवहारो लौ०॥५४॥अथवा कृ०॥५५॥देवार्चनस्ना०॥५६॥विष्णुं
ध्या०॥५७॥कृतकृत्यतया तृ०॥५८॥धन्योहं धन्योहं नित्यं स्वात्मानमंजसा वेद्मि॥धन्योहं धन्योहं ब्रह्मानंदो वि
भाति मे स्पष्टं॥५९॥धन्योहं धन्योहं दुःखं सांसारिकं न वीक्षेद्य॥धन्योहं धन्योहं स्वस्याज्ञानं पलायितं क्वा
पि॥६०॥धन्योहं धन्योहं कर्तव्यं मे न विद्यते किंचित्॥धन्योहं धन्योहं प्राप्तव्यं सर्वमद्य संपन्नं॥६१॥धन्योहं
धन्योहं तृप्तेर्मे कोपमा भवेल्लोके॥धन्योहं धन्योहं धन्योधन्यः पुनः पुनर्धन्यः॥६२॥अहो पुण्यमहो पुण्यं
फलितं फलितं दृढं॥अस्य पुण्यस्य संपत्तेरहो वयमहो वयं॥६३॥अहो शास्त्रमहो शास्त्रमहो गुरुरहो
गुरुः॥अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखं॥६४॥ब्रह्मानंदाभिधे ग्रंथे चतुर्थोध्याय ईरितः॥
विद्यानंदस्तदुत्पत्तिपर्यंतोभ्यास इष्यतां॥६५॥इति श्रीपरमहंसपरिव्राजकाचार्य श्रीविद्यारण्यमु
निविरचिते ब्रह्मानंदे विद्यानंदो नाम चतुर्थोध्यायः॥ ५ ॥ ५ ॥ ५ ॥

+ खः प्रोप्यतया पुनः॥तृप्यन्नेव स्वमनसा मन्यतेसौ निरंतरं॥+
लप्रा
ते हि केश्चारभ्या विष्णुमितस्ताः श्लोकास्तु लिखिता पे३७

नन्वानंदस्त्रिविधो ब्रह्मानंदो विद्यासुखं तथा विषयानंद इति प्रथमाध्याये आनंदत्रयमेव प्रतिज्ञाय द्वितीयाध्याये तदतिरिक्तात्मानं
दनिरूपणात्त्रिविधो ज्ञायत इत्याशंक्याह। योगानंद इति। यथा प्रतिज्ञातस्यैव ब्रह्मानंदस्य योगजन्यसाक्षात्कारविषयत्वेन यो
गानंदत्वनिरूपणाद्धिकल्पत्वेन निजानंदत्वेन व्यवहृतत्वात्तस्यैव गौणमिथ्यामुख्यात्मविवेचनेनावगम्यत्वविवक्षयात्मानंद
त्वमभिहितमिति भावः॥ ननु सजातीयाद्भेदो णात्मनः पुत्रभार्यादेः मिथ्यात्मनो देहादेः विजातीयादाकाशादेश्च विभिन्नस्य
सद्वयस्यात्मानंदस्य प्रथमाध्यायोक्ताद्वितीयब्रह्मयोगानंदरूपता न संभवतीति शंकते। कथमिति। सजातीयत्वेनाभिमतस्य गो

योगानंदः पुरोक्तो यः स आत्मानंद इष्यताम्॥ कथं ब्रह्मत्वमेतस्य सद्वयस्येति चेच्छृणु॥१॥ आकाशादिस्वदेहांतं तैत्तिरी
यश्रुतीरितम्॥ जगन्नास्त्यन्यदानंदादद्वैतब्रह्मता ततः॥२॥ आनंदादेव तज्जातं तिष्ठत्यानंद एव तत्॥ आनंद एव ली
नं चेत्युक्तानंदात्कथं पृथक्॥३॥ ५९॥

णात्मनः पुत्रादेर्मिथ्यात्मनो देहादेश्च तैत्तिरीयश्रुत्यभिहितजगदंतःपातित्वादा
काशादेश्च जगत आनंदातिरेकेण सत्त्वाभावाद्द्वितीयब्रह्मरूपता घटत इति सदृष्टान्तमुत्तरमाह। आकाशेति॥१॥ तस्माद्वा
एतस्मादात्मन आकाशः संभूत इत्यादिकया तैत्तिरीयश्रुत्याभिहितं जगत् स्वकारणभूतादात्मानंदाद्व्यतिरेकेण नास्ति
अतः कारणात्तस्यात्मानंदस्याद्वितीयब्रह्मत्वमित्यभिप्रायः॥२॥ ननु ब्रह्मात्मश्रुतिवाक्ये आत्मनः कारणत्वं श्रूयते ना
नंदस्येत्याशंक्य तत्प्रतिपादकं तदीयमेवानंदाद्ध्येव खल्विमानि भूतानि जायंत इत्यादिवाक्यमर्थतः पठति। आनंदादि
ति॥ व्याख्यातोपफलितमाह इत्युक्तेति। अत्रेदमनुमानं सूचितं विमतं जगदानंदान्न भिद्यते तत्कार्यत्वाद्यद्यत्कार्यं तत्त
तो न भिद्यते यथा मृत्कार्यं घटादि मृदो न भिद्यत इति॥३॥ ५८

89

अ०न०
॥१॥

कुलालादुत्पन्नस्य घटस्य ततो भेददर्शनाद्दैकान्तिकता हेतोरित्याशङ्क्य कुलालस्य निमित्तकारणत्वादित्याह नन्दस्योपादानत्व
समर्थनान्नैवमित्याह। कुलालादिति। एष आनन्दो मृद्वत्। मृद्घटस्येवोपादानकारणं कुलालवत्कुलालइव निमित्तकारणं
न भवति॥४॥ ननु कुतो नोपादानत्वं कुलालस्यापीत्याशङ्क्य स्थितिलयाधाररूपोपादानलक्षणाभावादित्याह। स्थितिरि
ति। हि यस्मात्कारणाद्घटस्य स्थितिलयौ कुलाले आधारे न भवतो ततो नोपादानत्वमिति शेषः। कुत्र तर्हि ताविस्यत आह।
दृष्टाविति। ततो घटस्य स्थितिलयौ तदुपादानभूतायां मृद्येव दृष्टे प्रत्यक्षेणोपलब्धौ। भवत्स्वेवं प्रकृते किमायातमित्यत आ

कुलालाद्घट उत्पन्नोऽभिन्नश्चेति न शक्यते॥ मृद्वदेष उपादानं न निमित्तं कुलालवत्॥४॥ स्थितिर्लयश्च कुम्भस्य कुला
ले स्तो न हि कुचित्॥ दृष्टौ मृदि हि तद्वत्स्यादुपादानं तयोः श्रुतेः॥५॥ उपादानं त्रिधा भिन्नं विवर्तिपरिणामि च॥
आरम्भकं च तत्रासौ निरंशो नवकाशिनौ॥६॥ आरम्भवादिनोऽन्यस्मादन्यस्योत्पत्तिमूचिरे॥ ॥

तत्रेति

हा तद्वदिति। यद्वद्घटस्य मृदुपादानं तद्वज्जगतोऽप्यानन्द उपादानं स्यात्। तत्र हेतुः तयोरिति। तयोर्जगत्स्थितिलययोः श्रु
तेरानन्दाद्ध्येवेति वाक्ये आनन्दहेतुकत्वश्रवणादित्यर्थः॥५॥ आनन्दस्य स्वाभिमतं जगदुपादानत्वं वक्तुं तदवान्तरभेदमा
ह। उपादानमिति। तत्र विवर्तिपरिणामिनौ तु मितरोपपक्षो दूषयिष्यति। अथ यो आरम्भपरिणामपक्षौ निरंशो निरवयवेऽव
स्तुनि नावकाशिनौ अवकाशवन्तौ न भवतः॥६॥ तयोरनवकाशित्वमेव दर्शयितुं तावदारम्भवादिनां मतमनुवदति।
आरम्भेति। आरम्भवादिनो वैशेषिकादयोऽन्यस्मात्कार्यापेक्षयाऽन्यस्मात्कारणापेक्षयाऽन्यस्य कार्यस्योत्पत्तिमूचिरे।

कुत एवं वदंतीत्यत आह। तंतोरिति। निष्पन्ने स्वस्वत्तेर्दर्शनादिति शेषः। एतावता कथं कार्यकारणभेदसिद्धिरित्यत आह। भिन्नाविव
त्ता। विरुद्धपरिणामादिरुद्धार्थक्रियावत्त्वाच्चेत्यर्थः॥७॥ इदानीं परिणामस्वरूपमाह। अवस्थेति। एकस्यैव वस्तुनः पूर्वावस्था
त्यागपुरस्सरमवस्थांतरप्राप्तिः परिणाम इत्यर्थः। तमुदाहरति। स्यादिति। यथा क्षीरमृत्सुवर्णादीनां क्षीरादिव्यवहारयो
ग्यतां परित्यज्य दध्यादिव्यवहारयोग्यतापत्तिः॥८॥ विवर्तलक्षणमाह। अवस्थेति। तुशब्दोऽस्य पूर्वस्मात्सद्दृयाद्वैलक्ष
ण्यद्योतनार्थः। पूर्वावस्थामपरित्यज्यैवावस्थांतरभानं विवर्तः। उदाहरति। रज्विति। यथा रज्ज्वात्मनावस्थितस्यैव द्र

तंतोः पटस्य निष्पत्तौ भिन्नौ तंतुपटौ खलु॥७॥ अवस्थांतरतापत्तिरेकस्य परिणामिता॥ स्यात्क्षीरं दधि मृत्कुंभः
सुवर्णं कुंडलं यथा॥८॥ अवस्थांतरभानं तु विवर्तो रज्जुसर्पवत्॥ निरंशेऽप्यस्य सो व्योम्नि तलमालिन्यकल्पना॥९
ततो निरंश आनंदे विवर्तो जगदिष्यतां॥ मायाशक्तिः कल्पिका स्यादैंद्रजालिकशक्तिवत्॥१०॥ ७॥

व्यस्य सर्पात्मनावभासनं॥ ननु विवर्तस्य रज्ज्वादेः सांशत्वदर्शनान्निरंशे सोऽपि न घटत इत्याशंक्य निरवयवे गगना
दावपि तद्दर्शनान्मैवमित्याह। निरंशेऽपीति। असौ विवर्तः। व्योम्नि तलत्वमधोमुखेंद्रनीलकटाहतुल्यत्वं मालिन्यं नी
लवर्णत्वं तयोः कल्पनादाकाशे स्वरूपानभिन्ने आरोप्यमाणत्वादित्यर्थः। फलितमाह। तत इति। ततो निरंशेऽपि विवर्तसं
भवाज्जगन्निरंशे आनंदे विवर्तः कल्पितमित्यर्थः। न च अद्वितीयआनंदे जगत्कल्पनमनुपपन्नं कल्पनाहेतोरभावादि
त्याशंक्याह। मायेति। शक्तेः कल्पकत्वं क्व दृष्टमित्यत आह। ऐंद्रजालिकेति। यथेंद्रजालिकनिष्ठायां मणिमंत्रादिरूपाया

मायायाः शक्तिः कल्पकस्य इंद्रजालिकस्य इत्यर्थः॥

अ॰ नं॰
॥२॥

नन्वानंदातिरिक्तायामायायामभ्युगमे द्वैतापत्तिरित्याशंक्य तस्या अनिर्वचनीयत्वेनानृतत्वं वक्तुमुत्तरत्र वक्ष्यमाणया लौकिक्याऽग्न्यादिशक्ते स्तावद्भेदेन वाभेदेन वा निर्वक्तुमशक्यत्वं दर्शयति। शक्तिरिति। शक्तिरग्न्यादिनिष्ठा स्फोटादिजनिका शक्तात् अग्न्यादिरूपात् पृथग्भेदेन नास्ति कुत इत्यत आह। तदिति। तद्दन्तथात्वस्य भेदेनासत्वस्य दृष्टेर्दर्शनाद् अग्न्यादिस्वरूपातिरेकेणानुपलभ्यमानत्वादित्यर्थः। नाप्यग्न्यादिस्वरूपमेव शक्तिरित्याह। नचेति। अभिदा अभेदोपि नचनैवात्रापि हेतुमाह। प्रतिबंधस्येति। मणिमन्त्रादिभिः शक्तिकार्यस्य स्फोटादेः प्रतिबंधदर्शनात् स्वरूपातिरिक्ता

शक्तिः शक्तात् पृथङ्नास्ति तद् दृष्टेर्न सा भिदा॥ प्रतिबंधस्य दृष्टत्वाच्छत्तयभावे तु कस्यसः॥११॥ शक्तेः कार्यानुमेयत्वा दकार्ये प्रतिबंधनं॥ ज्वलतोग्नेरदाहे स्यान्मंत्रादिप्रतिबंधता॥१२॥

शक्तिर्दृष्टव्येत्यभिप्रायः। भवतु प्रतिबंधनदर्शनं शक्तेर्भेदो को दोषस्तत्राह। शक्त्यभाव इति। प्रत्यक्षसिद्धस्याग्न्यादिस्वरूपस्य प्रतिबंधासंभवात्तद्व्यतिरिक्तशक्त्यनभ्युगमे प्रतिबंधो निर्विषयः स्यादित्यभिप्रायः॥११॥ नन्वतीन्द्रियायाः शक्तेः कथं प्रतिबंधोवगंतुं शक्यत इत्याशंक्याह। शक्तेरिति। अतीन्द्रियापि शक्तिर्यतः कार्यगम्यातः अकार्ये सत्यपि कारणे कार्यानुत्पत्तौ सत्यां प्रतिबंधनं प्रतिबंधः अवगम्यत इति शेषः। उक्तमर्थं दृष्टांतप्रदर्शनेन स्पष्टयति। ज्वलत इति। लोके स्वरूपेण ज्वलतोग्नेः सकाशात् ज्वलतोग्नेः सकाशाद्दाहादिलक्षणकार्येनुत्पद्यमाने सति मंत्रादिप्रतिबंधत्ता मंत्रादीनां शक्तिप्रतिबंधकत्वं स्यादित्यर्थः॥१२॥ ५ ॥

पिमामं

॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥

इत्थं लौकिकशक्तिं स्वरूपतः प्रमाणतश्चोपन्यस्येदानीं मायाशक्तिसद्भावे ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्नि
गूढामिति श्वेताश्वतरोपनिषद्वाक्यमर्थतः पठति। देवात्मेति। मुनयः कालस्वभावादिकारणवादेषु दोषदर्शनवंतः जगत्कारण
ज्ञासया ध्यानयोगमास्थिता अधिकारिणः देवात्मशक्तिं देवस्य द्योतमानस्य स्वप्रकाशचिद्रूपस्यात्मनः प्रत्यगभिन्नस्य ब्रह्म
णः शक्तिं मायारूपां स्वगुणैः स्वकार्यभूतैः स्थूलसूक्ष्मशरीरैर्निगूढां नितरां गूढां आवृतामविदन् साक्षात्कृतवंत इत्यर्थः। त
स्यामेवोपनिषदि स्थितं परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति वाक्यांतरमर्थतः पठति। परास्येति। अ

देवात्मशक्तिं स्वगुणैर्निगूढां मुनयो विदन्॥ परास्य शक्तिर्विविधा क्रियाज्ञानबलात्मिका॥ १२॥ इति वेदवचः प्राह व
सिष्ठश्च तथाब्रवीत्॥ सर्वशक्ति परं ब्रह्म नित्यमापूर्णमद्वयं॥ १३॥ ययोल्लसति शक्त्यासौ प्रकाशमधिगच्छति॥ १४॥

~~[illegible]~~ स्य ब्रह्मणः परा उत्कृष्टा जगत्कारणभूता शक्तिर्विविधा श्रूयत इति वाक्यशे
षः। विविधत्वमेवाह। क्रियेति। क्रियाज्ञाने प्रसिद्धे बलमिच्छाशक्तिः ज्ञानक्रियाशक्तिसाहचर्यात्। क्रियादिशक्तेरात्मा
स्वरूपं यस्याः सा क्रियाज्ञानबलात्मिका॥ १२॥ इदं वाक्यद्वयं कुत्रस्थमित्यत आह। इतीति। न केवलं मायाशक्तिः श्रुति
सिद्धा किंतु स्मृतिसिद्धापीत्याह। वसिष्ठ इति। यथा श्रुतिर्विचित्रां मायाशक्तिमुक्तवती वसिष्ठोपि तां तथोक्तवान्वसि
ष्ठाभिधेयग्रंथ इति शेषः। मायामूर्तिपारकान्वो वसिष्ठश्लोकानेवाह। सर्वेति। नित्यमापूर्णमद्वयमिति ब्रह्मणः पारमा
र्थिकरूपमुक्तं। सर्वशक्तीति तस्यैवोपाधिकं रूपं॥ १३॥ तत् सर्वं ब्रह्म यदा यदा यया यया शक्त्योल्लसति विकसति वि

वर्त्तत इत्यर्थः। तदा तदा सो शक्तिः प्रकाशमधिगच्छति अ
भिव्यक्तिं प्राप्नोति ५

रूपाणां साम्येवाभिव्यक्तिं प्रपंचयति। चिच्छक्तिरिति। शरीरेषु देवतिर्यङ्मनुष्यादिषु लक्षणेषु चिच्छक्तिश्चेतनत्वव्यवहारहेतुभूतोपलभ्यते दृश्यते स्पंदशक्तिश्चलनहेतुभूता प्रकाशमप्यगच्छती। तु तस्या नभिव्यक्तिः शक्त्यामपि ब्रह्मणि जगत्सत्ता दर्शिता। अनभिव्यक्तस्यापि सत्वे दृष्टांतमाह। यथांड इति। विचित्रस्यापि तस्य सत्वे दृष्टांतमाह फल इति। ननु सर्वासामपि शक्तीनां युगपदेवाभिव्यक्तिः किं न स्यादित्याशंक्याह क्वचिदिति। क्वचिद्देशविशेषे कदाचित्कालविशेषे काश्चि

चिच्छक्तिर्ब्रह्मणो राम शरीरेषूपलभ्यते ॥१५॥ स्पंदशक्तिश्च वातेषु दार्ढ्यशक्तिस्तथोपले ॥ द्रवशक्तिस्तथांभःसु दाहशक्तिस्तथानले ॥१६॥ शून्यशक्तिस्तथाकाशे नाशशक्तिर्विनाशिनि। यथांडेंतर्महासर्पो जगदस्ति तथात्मनि ॥१७॥ फलपत्रलतापुष्पशाखाविटपमूलवान्॥ वृक्षबीजे यथा वृक्षस्तथेदं ब्रह्मणि स्थितं ॥१८॥ क्वचित्काश्चित्कदाचिच्च तस्मादुद्यंति शक्तयः॥ देशकालविचित्रत्वात्क्ष्मातलादिव शालयः ॥१९॥ स आत्मा सर्वगो राम नित्योदितमहावपुः॥ यन्मनाङ्मननीं शक्तिं धत्ते तन्मन उच्यते ॥२०॥

च्छक्त्यादयः। तासां युगपदभिव्यक्तौ दृष्टांतमाह क्ष्मातलादिवेति। यथा भूमिगतानां मध्ये देशविशेषे कालविशेषे च केषांचिदेव बीजानामंकुरोत्पत्तिर्नान्येषां तद्वदित्यर्थः। इदानीं जगतः कल्पनामात्ररूपतां दर्शयितुं तत्कल्पकस्य मनसो रूपतां वदर्शयति स इति। नित्योदितमहावपुः नित्यं सदा उदितं प्रकाशमानं महत् देशकालादिपरिच्छेदरहितं वपुः स्वरूपं यस्य सः तथा। यद्यस्मिन्काले मनाक् ईषन्मननीं स्वव्यापारावबोधनरूपां शक्तिं मायापरिणामरूपां धत्ते धारयति तत्तदा मन इत्युच्यते ॥२०॥ ५५ ग

इदानीं रचनाप्रकारमाह। आदाविति। आदौ प्रथमं मननशक्त्युल्लासेन मनो भवति तदनु तदनन्तरं बन्धविमोक्षदृष्टी बन्धमोक्षकल्पने भवतः। पश्चात्तदनन्तरं बन्धदृष्ट्यैव भुवनाभिधाना भुवनमित्यभिधानं यस्याः सा भुवनाभिधाना प्रपञ्चरचना प्रवर्त्तते इत्यर्थः। गिरिनदीसरित्समुद्रादेः रचनाकल्पनं भवतीत्यादिका एवंप्रकारा जगतः स्थितिः प्रतिष्ठा स्थैर्यं गता प्राप्ता। कल्पितस्यापि वास्तवप्रतीतौ दृष्टान्तमाह। आख्यायिकेति। बालजनायोदिता उक्ता आख्यायिका कथा यथा वास्तवबुद्धिं गता तथेदं जगदपीत्यर्थः॥ २०॥

आदौ मनस्तदनु बन्धविमोक्षदृष्टी पश्चात्प्रपञ्चरचना भुवनाभिधाना। इत्यादिका स्थितिरियं हि गता प्रतिष्ठामाख्यायिकास्सुभग बालजनोदितेव॥ २१॥ बालस्य हि विनोदाय धात्री वक्ति शुभां कथाम्। क्वचित्सन्ति महाबाहो राजपुत्रास्त्रयः शुभाः॥ २२॥ द्वौ न जातौ तथैकस्तु गर्भ एव हि न स्थितः। वसन्ति ते धर्मयुक्ता अत्यन्तासति पत्तने॥ २३॥ स्वकीयाच्छून्यनगरान्निर्गत्य विमलाशयाः। गच्छन्तो गगने वृक्षान्ददृशुः फलशालिनः॥ २४॥ भविष्यन्नगरे तत्र राजपुत्रास्त्रयोऽपि ते। सुखमद्य स्थितास्ताः पुत्र मृगयाव्यवहारिणः॥ २५॥ धात्र्येति कथिता राम बालकाख्यायिका शुभा। निश्चयं स पयौ बालो निर्विचारणया धिया॥ २६॥ इयं संसाररचना विचारोज्झितचेतसाम्। बालकाख्यायिकेवेत्थमवस्थितिमुपागता॥ २७॥ इत्यादिभिरुपाख्यानैर्मायाशक्तेस्तु विस्तरः। वशिष्ठः कथयामास सैवेति निरूप्यते॥ २८॥ कार्यादाश्रयतश्चैषा भवेच्छक्तिर्विलक्षणा। स्फोटाङ्गारे दृश्यमाने शक्तिस्तत्रानुमीयते॥ २९॥

तामेव कथां कथयति। बालस्येत्यादिना। दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति। इयमिति। वशिष्ठेति। मुपसंहरति। इत्यादिभिरिति। एवं मायासद्भावे प्रमाणमुपन्यस्य तस्या अनिर्वचनीयत्वं वक्तुं प्रतिजानीते। सैवेति। एषा मायाशक्तिः कार्यात्सकाशात्सम्भूतात् जगतः आश्रयतः स्वाश्रयाद्ब्रह्मणश्च विलक्षणा विपरीतस्वभावा भवेत्। मायाशक्तेः कार्यादाश्रयतो वैलक्षण्यं दृष्टान्तेन स्पष्टयति। स्फोटेति। व

उत्पन्यायं मृच्छक्तावपि योजयति। पृथुबुध्नेति। यः पृथुबुध्नोदराकारः पृथुस्थूलं बुध्नं वर्तुलं उदरं यस्य स पृथुबुध्नोदरस्तथाविध आ
कारो यस्य स पृथुबुध्नोदराकारः तादृग्घटः कार्यं शब्दस्पर्शरूपरसगंधात्मकपंचगुणोपेता मृत्तिका आश्रयः शक्तिस्त्वत्र द्विधाप्य
पि विलक्षणेत्यर्थः ॥३०॥ वैलक्षण्यमाह। नपृथ्वादिरिति। शक्तेः पृथुत्वादिः कार्यधर्मोऽपि नास्ति शब्दादिकआश्रयधर्मोऽपि न विद्य
ते तो विलक्षणेत्यर्थः। तर्हि सा कीदृशीत्यत आह। अचिंत्येति। यथात्तथेत्युक्तमेवार्थं स्पष्टयति। अत एवेति। यतः कार्याश्रयत
श्च विलक्षणा अत एवैषा अचिंत्या चिंतयितुमशक्या। ननु तर्हि अचिंत्यत्वमेव तत्स्वरूपं स्यादित्याशंक्याह। न निर्वचनमि

नैः पृथ्वादिर्न शब्दादिः शक्तावस्तु यथा तथा। अत एव ह्यचिंत्यैषा न निर्वचनमर्हति ॥३१॥ पृथुबुध्नोदराकारो घटः का
र्यं च मृत्तिका। शब्दादिभिः पंचगुणैर्युक्ता शक्तिस्तु तद्द्विधा ॥३०॥ कार्योत्पत्तेः पुरा शक्तिर्निगूढा मृद्यवस्थिता ॥ कुलाला
दिसहायेन विकाराकारतां व्रजेत् ॥३२॥ पृथुत्वादिविकारांतं स्पर्शादिं चापि मृत्तिकां ॥ एकीकृत्य घटं प्राहुर्विचारविकला जनाः

ति। भेदेनाभेदेनाचिंत्यादिना वा केनापि रूपेण निर्वचनं नार्हति ॥३१॥ ननु कार्योत्स्वरूपातिरिक्ता शक्तिर्यद्यस्ति तर्हि कारणस्वरू
पमिव सा कुतो नावभासत इत्याशंक्याह। कार्योत्पत्तेरिति। मृच्छक्तिर्घटादिकार्योत्पत्तेः पूर्वं मृदि निगूढावतिष्ठते तो नावभासत
इत्यर्थः। निगूढत्वे उपरिष्टादपि न तस्या अभिव्यक्तिः स्यादित्याशंक्यानभिव्यक्तस्यापि नवनीतादेर्मंथनादिनेव कुलालादिव्या
पारेण तस्या अभिव्यक्तिः स्यादित्याह। कुलालादीति। आदिना दंडचक्रादयो गृह्यंते ॥३२॥ ननु कारणातिरिक्तस्य शक्तिकार्यस्य
सत्वे कार्यकारणयोर्भेदो न कुतो वभासत इत्याशंक्य भेदप्रतीतिर्हेतोर्विचारस्याभावादित्याह। पृथुत्वादीति। अविवेकिनो जना
पृथुबुध्नत्वादिके रूपं कार्यं स्पर्शादिगुणरूपां कारणभूतां मृत्तिकां चाविचार्य तएकीकृत्य घटमित्याचक्षते ॥३३॥ ९७ ॥

उक्तस्य घटस्येति व्यवहारस्याविचारमूलकत्वं कुत इत्याशंक्याह। कुलालेति। कुलालव्यापारात्पूर्वं भाविनो मृद्रूपस्य घटस्य घटत्वेन व्यवहार
स्य विचारमूलत्वं तत्स्येति भावः। कस्य तर्हि घटत्वमित्यत आह। पाश्चात्येति। कुलालादिव्यापारानंतरभाविनः पृथुबुध्नोदराकारस्यैव
घटशब्दवाच्यत्वमुचितं तदुत्पत्त्यनंतरमेव घटशब्दप्रयोगदर्शनादिति भावः॥२४॥ ननु पारमार्थिकस्य घटस्यानिर्वचनीयशक्ति
कार्यत्वमयुक्तमित्याशंक्य घटस्यापि पारमार्थिकत्वमसिद्धमित्याह। स घट इति। घटो मृदः पृथक्कृत्य द्रष्टुमशक्यत्वान्न मृदो भिन्नः
तेनापि मृद्वत् पिंडावस्थायामनुपलभ्यमानत्वात् ततः शक्तिवदनिर्वचनीय एव घटः। फलितमाह। तेनेति। ननु शक्तिकार्ययोरुभ

कुलालव्यापृतेः पूर्वं यावानंशः स नो घटः॥ पाश्चात्यपृथुबुध्नादिमत्त्वयुक्तो हि कुंभता॥२४॥ स घटो नो मृदो भिन्नो वियो
गे सत्त्वनीक्षणात्॥ नाप्यभिन्नः पुरा पिंडदशायामनवेक्षणात्॥२५॥ अतोऽनिर्वचनीयोऽयं शक्तिवत्तेन शक्तितः॥ अव्यक्तत्वे
शक्तिरुक्ता व्यक्तित्वं घटनामभृत्॥२६॥ ऐंद्रजालिकनिष्ठापि माया न व्यज्यते पुरा॥ पश्चाद्गंधर्वसेनादिरूपेण व्यक्तिमाप्नु
यात्॥२७॥ एवं मायामयत्वेन विकारस्यानृतात्मता॥ विकाराधारमृद्वस्तुसत्यत्वं चाब्रवीच्छ्रुतिः॥२८॥ छ ॥

योरप्यनिर्वचनीयत्वे शक्तिः कार्यं चेति व्यवहारः कुत इत्याशंक्याह। अव्यक्तत्व इति। पूर्वमनभिव्यक्ता माया शक्तिः पश्चादभिव्यज्य
त इत्येतत्प्रसिद्धमायायामुपलभ्यत इत्याशंक्याह। ऐंद्रजालिकेति। पुरा मणिमंत्रादिप्रयोगात्सर्वं॥२७॥ शक्तिकार्यस्य घटादेरन
प्य
तत्वं तदाधारस्य मृदादेः सत्यत्वमित्येतं छांदोग्यश्रुतावभिहितमित्याह। एवमिति। मायामयत्वेन मायाकार्यत्वेन विकारस्य का
र्यरूपस्य घटादेरनृतात्मता मिथ्यात्वं विकाराणां घटादीनामाधारभूताया मृदः सत्यत्वं वाचारंभणं विकारो नामधेयं मृत्तिके
त्येव सत्यमित्यादिश्रुतिरुक्तवती इत्यर्थः॥२८॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

॥अ० नं०
११५॥

एवं वाचारंभणमित्युदाहृतं वाक्यमर्थतः पठति। वाङ्निष्पाद्यमिति। विकारो मृत्कार्यो घटादिः वाङ्निष्पाद्यं वागिन्द्रियेणोच्चार्यं
नाममात्रं नामैवास्य घटादेर्न सत्यता नामातिरेकेण न पारमार्थिकं रूपमस्ति किं तु तदाधारभूता मृदेव सत्येत्यर्थः। ग्राकृति तत्कार्य
योरनृतत्वे तदाधारस्य च सत्यत्वे कारणमाह। व्यक्ताव्यक्तेति। व्यक्तो घटादिलक्षणः कार्यभूत व्यक्ता तत्कारणभूता ग्राकृतिस्ते व्यक्ता
व्यक्ते तदाधारस्तयोराधारभूता मृत्तिका। त्वेतेषु त्रिषु मध्ये आद्ययोः प्रथमोद्दिष्टयोर्द्वयोः कार्यशतयोः संबंधिनो यो कालोत
योर्भेदेन भेदस्य विद्यमानत्वात् पर्यायः क्रमेण भवनं। तृतीयस्तु तदुभयाधारस्तु मृदादिरनुगच्छति उभयत्रानुवर्तते। अयं भावः। मृ

वाङ्निष्पाद्यं नाममात्रं विकारो नास्य सत्यता॥ स्पर्शादिगुणयुक्ता सत्या केवलमृत्तिका॥ ४९॥ व्यक्ताव्यक्ते तदाधार इति त्रि
षाद्ययोर्द्वयोः॥ पर्यायः कालभेदेन तृतीयस्त्वनुगच्छति॥ ५०॥ निसत्त्वभासमाने च व्यक्ते सत्यतिनाशभाक्॥ तदसत्तोत्तस्य
नाम वाचा निष्पाद्यते नृभिः॥ ५१॥ व्यक्ते नष्टेपि नामैतन्नृवक्त्रेष्वनुवर्तते॥ तेन नाम्ना निरूप्यत्वाद्व्यक्तं तद्रूपमुच्यते॥ ५२॥

व्यक्तिकार्ययोः कादाचित्कत्वादनृतत्वमाधारस्य तु कालत्रयानुगामित्वात्सत्यत्वमिति॥ ५०॥ इदानीं विकारस्य वासत्यत्वे हेतुमाह
निसत्त्वमिति। व्यक्तशब्दवाच्यं घटादिकं कार्यं स्वरूपेणासदेवावभासते। तथो सत्तिनाशवद्रूपलभ्यते। सत्यनंतरं वागिन्द्रियजन्यना
मात्मकत्वेन व्यवह्रियते च॥ ५१॥ किं च व्यक्ते कार्ये स्वरूपेन नष्टेपि एतत्कार्यादभिन्नं नाम नृवक्त्रेषु नृणां शब्दप्रयोक्तॄणां वदनेष्वनुव
र्तते। ततः किमित्यत आह। तेन नाम्नेति। व्यक्तं कार्यं तेन वाचा व्यवह्रियमाणेन नाम्ना शब्देन निरूप्यत्वाद्व्यवह्रियमाणत्वात्तद्रूपं
तस्य नाम्नो रूपमेव रूपं यस्य तत्तथा। नाममात्रकमुच्यते इत्यर्थः। अयं भावः। विमतो घटो घटशब्दात्मको भवितुमर्हति। घट
शब्देन व्यवह्रियमाणत्वाद्घटशब्दवदिति॥ ५२॥ ५ ॥ ५ ॥ ५ ॥

एवं हेतुत्रयं प्रसाध्येदानीमनुमानरचनाप्रकारं सूत्रयति। निस्तत्वादिति। व्यक्तस्य घटादिरूपस्य कार्यस्य यत्पृथुबुध्नोदराकारं रूपमस्ति त त्किंचित्किमपि सत्यं न भवति। निस्तत्वान्निर्गतं तत्वं वास्तवं रूपं यस्मात्तन्निस्तत्वं तस्य भावो निस्तत्वत्वं तस्मात्। तथा विनाशित्वा त्प्रतियोगित्वाद्वाचारंभणनामतः। योगिक्रियाजन्यत्वान्नामात्मकत्वाद्वा त्रिष्वपि हेतुषु मृदादिति वैधर्म्ये दृष्टांतः। अत्रैवं प्रयोगः। घटादिरूपः कार्यांशः असत्यो भवितुमर्हति निस्तत्वत्वाद्यदसत्यं न भवति तन्न निस्तत्वं यथा घटाद्युपादानं मृदिति केवलव्यतिरेकी। एवमितरहेतुद्वयेपि योज्यं॥ ७२॥ एवं विकारस्यासत्यत्वमुपपाद्य तदधिष्ठानभूताया मृदः सत्यत्वमुप

निस्तत्वत्वाद्विनाशित्वाद्वाचारंभणनामतः॥ व्यक्तस्य न तु तद्रूपं सत्यं किंचिन्मृदादिवत्॥ ७३॥ व्यक्तकाले ततः पूर्वमूर्ध्वमप्येकरूपभाक्॥ सतत्वमविनाशं च सत्यं मृद्वस्तु कथ्यते॥ ७४॥ व्यक्तं घटो विकारश्चेत्येतैर्नामभिरीरितः॥ अर्थश्चेदनृतः कस्मान्न मृद्बोधे निवर्तते॥ ७५॥ निवृत्त एव यस्मात्तेन सत्यत्वमतिर्गता॥ दृढद्विवृत्तिरेवात्र बोधज्ञानत्वभासनं॥ ७६॥

पादयति। व्यक्तेति। व्यक्तकाले स्थितिकाले ततः पूर्वं व्यक्तेरुत्पत्तेः पूर्वस्मिन्काले ऊर्ध्वमपि व्यक्तविनाशोत्तरकालेपि एकरूपभाक् एकाकारं सत त्वं तत्वेन वास्तवरूपेण सह वर्तत इति सतत्वमविनाशं विकारेण सह नाशरहितं च यन्मृद्वस्तु तत्सत्यमिति कथ्यते। विमतं मृद्वस्तु सत्यं भवितुमर्हति सतत्वादात्मवदित्यादि योज्यं॥ ७४॥ ननु घटादेः कार्यजातस्यासत्यत्वे तस्यारोपितरज्ज्वादेरिवाधिष्ठानज्ञानान्निवर्त्य तास्यादिति शंकते। व्यक्तमिति। व्यक्तमित्यादिभिस्त्रिभिः शब्दैरभिधीयमानो योर्थः कार्यरूपस्तस्य कारणातिरेकेणासत्यत्वेंगी क्रियमाणे मृल्लक्षणकारणस्य ज्ञाने किं न तन्निवृत्तिः स्यादित्यर्थः॥ ७५॥ इष्टापत्तिरिति परिहरति। निवृत्त इति। तत्रोपपत्तिमाह। यस्मादिति। यस्मात्कारणात्तव घटादिविषयासत्यत्वबुद्धिर्नष्टा ततः स निवृत्त एवेत्यर्थः। नन्वारोपितरजतादिस्वरूपस्येवाप्रतीति रूपत्वस्य तेन सत्यत्वबुध्यपगम इत्याशंक्य तस्य निरुपाधिकभ्रमत्वादस्तु तथात्वमिह तु सोपाधिकभ्रमे सत्यत्वबुध्यपगम एव निवृत्तिः स्यादित्यभिप्रायेणाह। इदमिति। अत्र सोपाधिकभ्रमस्थले इदमेव सत्यत्वबुध्यपगमरूपैव बोधजाधिष्ठानयाथात्म्यज्ञानेनान्या निवृत्तिरभ्युपेया न तु भासनं न स्वरूपाप्रतीतिरूपेत्यर्थः॥ ७६॥

॥अ॰नै॰॥
॥६॥

एवं क्व दृष्टमित्यत आह। पुमानिति। जले ऽधोमुखत्वेन प्रतिभासमानोऽपि पुमान्परमार्थतो नास्ति। तत्रोपपत्तिमाह। तटस्थेति। कस्य चिद्वि
वेकिनो विवेकिनो वा तस्मिन्नधोमुखे पुरुषे तीरस्थपुरुषस्वसत्त्वाभिमानः क्वचिदेकोऽकाले नैवास्तीति। नन्वारोपितस्यासत्य
त्वज्ञानमात्रान्न पुरुषार्थसिद्धिरित्याशंक्याह। ईदृग्बोध इति। अद्वैतवादे आनंदातिरिक्तस्य सर्वस्य मिथ्यात्वे निश्चये सत्यद्वैता
नंदाभिव्यक्तिलक्षणः पुरुषार्थः सिध्यतीत्यभिप्रायः। ननु घटस्य मृद्विवर्तत्वेऽसिद्धे तज्ज्ञानाद्घटसत्यत्वबुद्धिर्निवर्तेत न चेत्तदि
दानीं सिद्धमित्याशंक्याह। मृद्रूपस्येति। घटे मृद्रूपपरित्यागाभावेऽपि मृत्परिणामता किं न स्यादित्याशंक्याह। परिणाम इति॥
यत्र क्षीरादेः परिणामोऽभ्युपगम्यते। तत्र क्षीरादिभावस्य पूर्वरूपस्य त्यागोऽपलभ्यत इत्यर्थः। ननु विवर्ते पूर्वरूपापरित्यागः क्व दृष्ट

पुमानधोमुखो नीरे भातोऽप्यस्ति न वस्तुतः॥ तटस्थमर्त्यवत्तस्मिन्नैवास्था कस्यचित्क्वचित्॥४७॥ ईदृग्बोधे पुमर्थत्वं मतमद्वै
तवादिनां॥ मृद्रूपस्यापरित्यागाद्विवर्तत्वं घटे स्थितं॥४८॥ परिणामे पूर्वरूपं त्यजेत्तत्क्षीररूपवत्॥ मृत्सुवर्णे निवर्तेते घटकु
ण्डलयोर्न हि॥४९॥ घटे भग्ने न मृद्भावः कपालानामवेक्षणात्॥ मैवं चूर्णेऽस्ति मृद्रूपं स्वर्णरूपं त्वतिस्फुटं॥५०॥ क्षीरादेः परिणा
मोऽस्तु पुनस्तद्भाववर्जनात्॥ एतावता मृदादीनां दृष्टान्तत्वं न हीयते॥५१॥

इत्याशंक्य मृत्सुवर्णयोर्दृश्यत इत्याह। मृत्सुवर्णेति। मृ
त्सुवर्णविवर्तयोर्घटकुण्डलयोर्निष्पन्नयोरपि तत्कारणभूतमृत्सुवर्णरूपेण निवर्तेते हि प्रसिद्धमित्यर्थः। ननु घटस्य मृद्विवर्तत्वमस्तु प
न्नं घटनाशे पुनर्मृद्भावादर्शनादिति शंकते। घट इति। मृद्भावाभावे कारणमाह। कपालानामिति। कपालानामपि नाशे मृद्भावो
पलब्धिः स्यादिति परिहरति। मैवमिति। सुवर्णत्वे त्वन्योऽयमेवानवकाश इत्याह। स्वर्णेति। ननु परिणामे दृष्टान्तत्वेनाभिहितानां
क्षीरमृत्सुवर्णानां मध्ये यदि मृत्सुवर्णयोर्विवर्तदृष्टान्तत्वमंगीक्रियते तर्हि तद्वदेव क्षीरस्यापि तथात्वं स्यादित्याशंक्याह। क्षीरा
देरिति। न हि क्षीरवदेवावस्थान्तरमापद्यमानयोस्तयोर्विवर्तदृष्टान्तता न भवेदित्याशंक्याह। एतावतेति। एतावता क्षीरादेः परिणा

ननु मृत्सुवर्णयोः परिणामविवर्तविवारंभकत्वमपि किं नांगीक्रियत इत्याशंक्याह । आरंभेति । आरंभवादिनो मते कार्ये घटादिरूपे श
दो मृत्तिकादेर्द्रव्यस्य द्वैगुण्यं कार्याकारेण कारणाकारेण च द्विगुणत्वमापद्येत तथा च सति गुरुत्वादिद्वैगुण्यमप्यापद्येतेति भा
वः । कुत एतदित्याशंक्याह । रूपेति । रूपादीनां गुणानां कार्यकारणयोर्भेदस्यांगीकृतत्वादिति भावः । ननु मृत्सुवर्णयोः
किं द्वयोरेव विवर्ते दृष्टांतत्वं नेहाम्रृदिति । अरुणस्य पुत्र उद्दालक आरुणिः कश्चिदृषिः यथा सोम्यैकेन मृत्पिंडेनेत्यारभ्य कार्ष्णा
यसमित्येव सत्यमित्यंतेन वाक्यसंदर्भेण कार्यस्यानृतत्वे मृत्सुवर्णायो रूपं दृष्टांतत्रयमुक्तवानित्यर्थः । किमर्थमेवं दृष्टांतत्र

आरंभवादिनः कार्ये मृदो द्वैगुण्यमापतेत् ॥ रूपस्पर्शादयः प्रोक्ताः कार्यकारणयोः पृथक् ॥४८॥ मृत्सुवर्णमयश्चेति दृ
ष्टांतत्रयमारुणिः ॥ प्राहातो वासयेत्कार्यानृतत्वं सर्ववस्तुषु ॥४९॥ कारणज्ञानतः कार्यविज्ञानं चापि सोऽवदत् ॥ स
त्यज्ञानेनानृतज्ञानं कथमत्रोपपद्यते ॥५०॥ समृत्कस्य विकारस्य कार्यता लोकदृष्टितः ॥

यमुक्तवानित्याशंक्याह । अत इति । यत एवं बहुषु मृदादिषु कार्यानृतत्वमुपलब्धमतो भूतभौतिकरूपेषु सर्वेषु वस्तुषु कार्या
नृतत्वं वासितं कुर्यादित्यर्थः । ननु कार्यानृतत्वानुसंधानमपि किमर्थमुक्तमित्याशंक्य कारणज्ञानात्कार्यज्ञानसिद्धये इत्यभि
प्रायेणाह । कारणेति । कारणस्य मृदादेर्ज्ञानात्कार्यजातस्य घटादेर्ज्ञानमपि यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं स्यादिति
वाक्यजातेनोक्तवानित्यर्थः । ननु मृत्सुवर्णादिरूपस्य पारमार्थिकस्य कारणस्य विज्ञानान्न द्विलक्षणस्य घटरुचकादेर्विज्ञा
नमनुपपन्नमिति शंकते । सत्यज्ञानेनेति । कार्यस्य सत्यानृतांशद्वयरूपत्वात्कार्यगतसत्यांशज्ञानं भवतीत्यभिप्रायेणाह ।
समृत्कस्येति । समृत्कस्याधिष्ठानभूतमृत्सहितस्य विकारस्यारोपितस्य घटादिरूपस्य कार्यता कार्यशब्दार्थत्वं लोकप्रसि

विज्ञातं

अ०नं०
॥७॥

भवत्येवमेतावता कारणज्ञानात्कार्यज्ञानं न संभवतीति चोद्यस्य कः परिहारो जातः इत्याशंक्य कार्यगतानंतताज्ञानाभावे पि तद्गतस
त्त्वांशज्ञानं भवत्येवेति परिहरति । वास्तव इति । अत्र कार्ये यो वास्तवो मृदंशोस्ति अस्य वास्तवांशस्य बोधो ज्ञानं कारणबोधतः
कारणज्ञानाद्भवतीत्यर्थः ॥ ननु कार्यगतस्यानंतस्यानंतांशोपि बोद्धव्य इत्याशंक्य प्रयोजनाभावान्नैवमित्याह । अनंतांशा
इति । प्रयोजनाभावमेव प्रकटयति । तत्त्वज्ञानमिति । तत्त्वस्याबाध्यवस्तुनो ज्ञानं पुमर्थः पुंसो ज्ञातुः पुरुषस्यार्थः प्रयोजनं
यस्मिन्तत्पुमर्थमिति बहुव्रीहिः ॥ अनंतांशस्य विकारांशस्यावबोधनं प्रयोजनवन्न भवतीत्यर्थः ॥ ननु कारणज्ञानात्कार्य

वास्तवो त्र मृदंशोस्य बोधः कारणबोधतः ॥५५॥ अनंतांशो न बोद्धव्यस्तद्बोधानुपयोगतः ॥ तत्त्वज्ञानं पुमर्थं स्या
न्नानंतार्थावबोधनं ॥५६॥ तर्हि कारणविज्ञानात्कार्यज्ञानमितीरितं ॥ मृद्बोधान्मृत्तिकाबुद्धिरुक्तं स्यात्को त्र विस्मयः
॥५७॥ सत्यं कार्येषु वस्त्वंशः कारणात्मेति जानतः ॥ विस्मयो मास्त्विहान्यस्य विस्मयः केन वार्यते ॥५८॥ :०: ॥

ज्ञानं भवतीत्येतच्छ्रोतृबुद्धेश्चमत्कारहेतुर्भविष्यतीत्यभिप्रायेणोक्तं तच्च न संभवतीति शंकते । तर्हीति । कारणस्य मृदादेर्ज्ञा
नात्कार्यगतमृदादिसत्त्वांशज्ञानं भवतीत्युक्ते मृज्ज्ञानान्मृदो ज्ञानमित्युक्तं भवति एवं च सति शंकित एव चमत्कारो नार्थन
इत्यर्थः ॥ ईदृग्विवेकवतो विस्मयाभावे पि तद्रहितानां विस्मयः स्यादेवेति परिहरति । सत्यमिति । कार्येषु घटादिषु विद्य
मानो वास्तवांशः कारणस्वरूपमेवेति ये जानंति तेषामाश्चर्यं माभूदितरेषां तद्ज्ञानशून्यानां जायमानो विस्मयो न नि
वारयितुं शक्यत इत्यर्थः ॥५८॥ ॥ ॥ ॥ ॥:०:॥

अज्ञस्य विस्मयो भवेदित्युक्तमेवार्थं प्रपंचयति। आरंभीति। आरंभो नाम समवाय्यसमवायिनिमित्तकारणेभ्यो भिन्नस्य कार्यस्यो
त्पत्तिस्तां यो वक्ति सोयमारंभीत्युच्यते। पूर्वरूपपरित्यागेन रूपांतरप्राप्तिलक्षणं परिणामं यो वक्ति स परिणामीत्युच्यते। प्रकृ
त्याद्युपमज्ञानं न लोकव्यवहारमात्रपरो लौकिक इत्युच्यते। एषां त्रयाणामपि कारणस्यैकैकस्य ज्ञानादनेकेषां कार्याणां वि
ज्ञानं भवतीति वाक्यश्रवणाद्विस्मयो भवेदेवेत्यर्थः। ननु यथाश्रुतमर्थं परित्यज्येशं व्याख्याने किं कारणमित्याशंक्य श्रुते
स्तत्र तात्पर्याभावादित्याह। अद्वैतइति। अद्वैतविज्ञाने शिष्यमभिमुखीकर्तुमेव छंदोगश्रुतावेकस्य कारणस्य विज्ञाना

आरंभी परिणामी च लौकिकश्चैककारणे॥ ज्ञाते सर्वमिति श्रुत्वा प्राप्नुवंत्येव विस्मयं॥५९॥ अद्वैतेभिमुखीकर्तुमे
वात्रैकस्य बोधतः॥ सर्वबोधः श्रुतो नैव नानात्वस्य विवक्षया॥६०॥ एकमृत्पिंडविज्ञानात्सर्वं मृन्मयधीर्यथा॥
तथैकब्रह्मबोधेन जडबुद्धिर्विभाव्यतां॥६१॥

त्सर्वेषां कार्याणां विज्ञानमुक्तं॥ न तु कार्याणामनेकेषां विज्ञानसिध्यर्थ
मित्यभिप्रायः। इदानीमेकविज्ञानेन सर्वविज्ञाने दृष्टांतप्रदर्शनपरस्य यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं
स्यादिति वाक्यस्यार्थनिरूपणपुरःसरं दार्ष्टांतिकप्रदर्शनपरस्य उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतम
विज्ञातं विज्ञातमिति वाक्यस्यार्थं प्रदर्शयन् प्रकृते फलितमाह। एकमृत्पिंडेति। यथा घटशरावाद्युपादानस्यैक
स्य मृत्पिंडस्यावबोधनात्तद्विकाराणां सर्वेषां घटादीनां बोधो भवति एवं सर्वोपादानस्यैकस्य ब्रह्मणो बोधात्तत्
कार्यस्य कृत्स्नस्य जगतो बोधो भवतीत्यवगंतव्यमित्यर्थः॥ ५९। ६० ॥ ६१ ॥

अ० नं०
॥८॥

ननु ब्रह्मजगतोः स्वरूपापरिज्ञाने ब्रह्मज्ञानाज्जगतो ज्ञानं भवतीत्येवं नावगंतुं शक्यते इत्याशंक्य तदुरगमायत्तदुपाय स्वरूपं दर्शयति ॥ सच्चिदिति ॥ ब्रह्मणः सच्चिदानंदरूपत्वे किं प्रमाणमित्याशंक्य तापनीयादिश्रुतयः प्रमाणमित्यभिप्रायेणाह तापनीय इति । उत्तरस्मिंस्तापनीये आथर्वणिके स्तावद्ब्रह्मैवेदं सर्वं सच्चिदानंदमात्रमित्यादिश्रुतेर्ब्रह्मणः सच्चिदानंदत्वमुक्तमित्यर्थः । आदिशब्देन विवक्षिता निश्रुतीरुदाहरति सद्रूपमिति । अरुणपुत्रेणोद्दालकेन छांदोग्यश्रुतौ सदेव सोम्येदमग्र आसीदित्यादिना सद्रूपं ब्रह्म निरूपितं । तथा बह्वृचाः ऋग्शाखिनः ऐतरेयोपनिषदि प्रज्ञानं प्रतिष्ठा प्रज्ञा

सच्चित्सुखात्मकं ब्रह्म नामरूपात्मकं जगत् । तापनीये श्रुतं ब्रह्म सच्चिदानंदलक्षणं ॥ ८२ ॥ सद्रूपमारुणिः प्राह प्रज्ञानं ब्रह्म बह्वृचाः । सनत्कुमार आनंदमेवमन्यत्र गम्यतां ॥ ८३ ॥ विचिंत्य सर्वरूपाणि कृत्वा नामानि तिष्ठति ॥ अहं व्याकरवाणीमे नामरूपे इति श्रुतेः ॥ ८४ ॥ [struck out]

नब्रह्मेति ज्ञानरूपत्वं ब्रह्मणो दर्शयति । एवं पूर्वोदाहृतायां छांदोग्यश्रुतावेव सनत्कुमाराख्यो गुरुर्नारदाख्याय शिष्याय भूमात्वेव जिज्ञासितव्य इत्युपक्रम्य यो वै भूमा तत्सुखमिति भूमशब्दाभिधेयस्य ब्रह्मण आनंदरूपत्वमुक्तवानित्यर्थः । उक्तन्यायमन्यत्राप्यतिदिशति एवमिति । अन्यत्र तैत्तिरीयकादिश्रुतिषु आनंदो ब्रह्मेति व्यजानादित्यादिवाक्ये आनंदरूपता द्विकसुक्तमिति द्रष्टव्यमिति भावः । सच्चिदानंदेष्विव नामरूपयोरपि श्रुतिं दर्शयति । विचिंत्येति । सर्वाणि रूपाणि विचिंत्य धीरः नामानि कृत्वाभिवदन्यदास्ते इति अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति च स्रष्टव्यजगन्निष्ठे नामरूपे श्रुत्या दर्शिते इत्यर्थः ॥

तत्रैव श्रुत्यंतरमुदाहरति। अव्याकृतमिति। बृहदारण्यकश्रुतौ तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतासौनामायं
मिदं रूपमिति सृष्टस्य जगतो नामरूपात्मकत्वं दर्शितमित्यर्थः। सृष्टेः पूर्वमिदं जगदव्याकृतम व्यक्तनामरूपात्मकमभूदूर्ध्वं सृ
ष्टेवसरे द्विधा वाच्यवाचकभेदेन व्याक्रियते व्यक्तीकृतमित्यर्थः। इदानीं तद्धेदं तर्ह्यव्याकृतमासीदित्यत्राव्याकृतशब्दस्या
र्थमाह। अचिंत्येति। येयं ब्रह्मणि अचिंत्यशक्तिर्माया अस्ति एषा अव्याकृताभिधा। अस्मिन्वाक्येऽव्याकृतशब्देनाभिधीय
त इत्यर्थः। तन्नामरूपाभ्यामेव व्याक्रियत इत्यस्यार्थमाह। अविक्रियेति। अविकारिणि ब्रह्मणि वर्तमाना सा अनेकधा भू

अव्याकृतं पुरा सृष्टेरूर्ध्वं व्याक्रियताधुना॥ अचिंत्यशक्तिर्मायैषा ब्रह्मण्यव्याकृताभिधा॥८५॥ अविक्रियब्रह्मनि
ष्ठा विकारं यात्यनेकधा॥ मायातु प्रकृतिं विद्यान्मायिनं तु महेश्वरं॥८६॥ आद्यो विकार आकाशः सोस्ति भास्यपि च
प्रियः॥ अवकाशस्तस्य रूपं तन्मिथ्या न तु तत्त्रयं॥८७॥ नव्यक्तेः पूर्वमस्त्येवं न पश्चाच्च विनाशतेः॥ आदावंते च यन्ना
स्ति वर्तमानेपि तत्तथा॥८८॥

तभोतिकप्रपंचरूपेण बहुधा विकारं परिणामं प्राप्नोति। मायाब्रह्मणि वर्तत इत्यत्र प्र
माणमाह। मायां त्विति। मायां प्रोक्तां प्रकृतिं प्रक्रियतेनयेति उपादानकारणं विद्याज्जानीयात्। मायिनं तस्या आश्रयत्वे
नतद्वंतं महेश्वरं मायानियामकं विद्यादित्यनुवर्तते। उभयत्र तु शब्दः परस्परवैलक्षण्यद्योतनार्थः। इदानीं मायोपहित
स्य ब्रह्मणः प्रथमं कार्यमाह। आद्य इति। तस्य कारणादागतं रूपत्रयमाह। सोस्तीति। सच्चिदानंदरूप इत्यर्थः। तस्य प्रा
तिस्विकं रूपमाह। अवकाश इति। तस्य पूर्वस्माद्रूपत्रयाद्वैलक्षण्यमाह। तन्मिथ्येति। सदादिरूपत्रयं वास्तवमित्यर्थः॥
तस्य चतुर्थरूपस्य मिथ्यात्वे हेतुमाह। नव्यक्तेरिति। ननु सतिविनाशयोर्मध्ये प्रतीयमानस्यावकाशस्य कथमसत्त्वमित्या

॥अ०नै०७ ।
॥१९॥

उक्तार्थे श्रीकृष्णवाक्यं प्रमाणयति। अव्यक्तादीनीति। सदादिरूपत्रयस्याकाशे सत्वे किं प्रमाणमित्याशंक्यानुभूतिरेव प्रमाणमि
यथा त्याह। मद्वत इति। मृद्वदिति दृष्टांतप्रदर्शनार्थः। घटादिषु कालत्रयेपि मृदनुवर्तते तथा सदादिरूपत्रयं सर्वदानुगतमित्यर्थः। न
न्ववकाशं विहाय सदादिरूपत्रयं कथमनुभूतमित्याशंक्याह। निराकाश इति। तदेवोपपादयति। अवकाश इति। पूर्ववादि
नश्चोद्यमनुवदति। शून्यमिति। अंगीकृत्य परिहारमाह। अस्त्विति। यद्वत्तः शून्यमस्तु अर्थं तत्स्त्ववकाशाभावविशेषणस्य
विशेष्यत्वेन प्रतीयमानं किंचिदस्तीत्यभ्युपगंतव्यमित्याह। तादृगिति। हि शब्दो लोकप्रसिद्धिद्योतनार्थः। अवस्यैवं प्रवृत्तेकि

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत॥ अव्यक्तनिधनान्येवेत्याह कृष्णोऽर्जुनं प्रति॥६९॥ मृद्वत्सच्चिदानंदा अ
नुगच्छंति सर्वदा॥ निराकाशे सदादीनामनुभूतिर्निजात्मनि॥७०॥ अवकाशे विस्मृतेथ तत्र किं भाति तद्वद॥ शून्यमे
वेति चेदस्तु नाम तादृग्विभाति हि॥७१॥ तादृक्त्वादेव तत्सत्वमौदासीन्येन तत्सुखं॥ आनुकूल्यप्रातिकूल्यहीनं यत्त
न्निजं सुखं॥७२॥ आनुकूल्ये हर्षधीः स्यात्प्रातिकूल्ये तु दुःखधीः॥ द्वयाभावे निजानंदो निजदुःखं तु न क्वचित्॥७३॥
निजानंदे स्थिरे हर्षशोकयोर्व्यत्ययः क्षणात्॥ मनसः क्षणिकत्वेन तयोर्मानसतेष्यतां॥७४॥ मायात्तमित्याशंक्य

विशेष्यत्वेन प्रतीयमानस्य स्वरूपमभ्युपेयमित्याह। तादृक्त्वादिति। तस्य सुखरूपत्वमाह। औदासीन्येनेति। औदासीन्य
विषयत्वात्तस्य सुखरूपत्वमित्यर्थः। ननु अनुकूलत्वरहितस्य कथं सुखत्वमित्याशंक्याह। आनुकूल्येति। तदेवोपपादयति
आनुकूल्य इति। ननु निजानंदवन्निजदुःखमपि किं न स्यादित्याशंक्य दुःखे निजरूपासिद्ध्यभावान्नैवमित्याह। निजदुः
खमिति। ननु निजानंदस्य सदानंदत्वात्सर्वदा हर्ष एव स्यान्न तु शोक इत्याशंक्य तस्य नित्यत्वेपि तद्ग्राहिणो मनसः क्षणिके

दृष्टांते सिद्धमर्थं दार्ष्टांतिके योजयति। आकाशेऽपीति। एवं निजात्मन्युक्तप्रकारेणेत्यर्थः। सत्ताभाने तु भवताप्यभ्युपगम्येते अतो नोपपा
दनीयेइत्यर्थः॥ आकाशे प्रतिपादितमर्थं वाय्वादिशरीरांतेष्वभ्युपगंतव्यमित्याह। वाय्वादीति। तत्र वाय्वादीनामसाधारणधर्मा
न्दर्शयति। गतिस्पर्शाविति। फलितमाह। अनेकधेति। तर्हि प्रतीयमानयोर्नामरूपयोः का गतिरित्याशंक्य कल्पितत्वमेव गति

आकाशेऽप्येवमानंदः सत्ताभाने तु संमते॥ वाय्वादिदेहपर्यंतं वस्तुष्वेवं विभाव्यतां॥७५॥ गतिस्पर्शौ वायुरूपं वह्नेर्दाह
प्रकाशने॥ जलस्य द्रवता भूमेः काठिन्यं चेति निर्णयः॥७६॥ असाधारण आकार औषध्यन्नवपुष्यपि॥ एवं विभाव्य
मनसा तत्तद्रूपं यथोचितं॥७७॥ अनेकधा विभिन्नेषु नामरूपेण चैकधा॥ तिष्ठंति सच्चिदानंदा विसंवादो न कस्यचि
त्॥७८॥ निस्तत्वे नामरूपे द्वे जन्मनाशयुते च ते॥ बुध्या ब्रह्मणि वीक्षस्व समुद्रे बुद्बुदादिवत्॥७९॥ सच्चिदानंदरूपेऽस्मि
न्पूर्णब्रह्मणि वीक्षिते॥ स्वयमेवावजानाति नामरूपे शनैः शनैः॥८०॥ यावद्यावदवज्ञा स्यात्तावत्तावत्तदीक्षणं।
यावद्यावद्वीक्षते तत्तावत्तावदुभे त्यजेत्॥८१॥ तदभ्यासेन विद्यायां सुस्थितायामयं पुमान्॥ जीवन्नेव भवेन्मुक्तो
वपुरस्तु यथा तथा॥८२॥ तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं॥ एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः॥८३॥

रित्याह निस्तत्वे इति॥ कल्पितत्वे हेतुर्जन्मेति। ततः किमित्यत आह। सच्चिदानंदेति। ब्रह्मतत्वज्ञानदार्ढ्यस्य द्वैतावज्ञापूर्वकत्वा
च्छ्रवणादिवद्द्वैतावज्ञापि कर्तव्येत्याह। यावदिति। उभयाभ्यासस्य फलमाह। तदभ्यासेनेति। इदानीं ब्रह्माभ्यासस्वरूप
माह। तच्चिंतनमिति॥८३॥

अ०नं०
॥१०॥

नन्वनादिकालमारभ्य प्रतिभासमानस्य द्वैतस्य कदाचिदेकेन ज्ञानाभ्यासेन कथं निवृत्तिरित्याशंक्य दीर्घकालनैरंतर्यसत्कारसेविते
नाभ्यासेन निवर्तत एवेत्याह। वासनेति। ननु ब्रह्मण एकस्यानेकाकारजगद्धेतुत्वमनुपपन्नमित्याशंक्य मायासहितस्योपपद्य
त इत्याह। मृच्छक्तिवदिति। अनंतान्कार्याणीत्यर्थः। ननु मृच्छक्तेः सत्यत्वादनेकहेतुत्वाद्विषमो दृष्टांत इत्याशंक्य पक्षांतरमाह।
यद्वेति। दृष्टांतं विशदयति। निद्रेति। दार्ष्टांतिकमाह। ब्रह्मणीति। दुर्घटकारित्वमेव स्पष्टयति। स्वप्नेति। स्वप्नस्य दुर्घटत्वे हेतु

वासनानेककालीना दीर्घकालं निरंतरं। सादरं चाभ्यस्यमाने सर्वथैव निवर्तते॥८४॥ मृच्छक्तिवद्ब्रह्मशक्तिरनेका
ननंतान्सृजेत्॥ यद्वा जीवगता निद्रा स्वप्नश्चात्र निदर्शनं॥८५॥ निद्राशक्तिर्यथा जीवे दुर्घटस्वप्नकारिणी॥ ब्रह्मण्ये
षा तथा माया सृष्टिस्थित्यंतकारिणी॥८६॥ स्वप्ने वियद्गतिं पश्येत्स्वमूर्धच्छेदनं तथा। मुहूर्ते वत्सरौघं च मृतपुत्रादि
कं पुनः॥८७॥ इदं युक्तमिदं नेति व्यवस्था तत्र दुर्लभा॥ यथा यथेक्ष्यते यद्यत्तत्तद्युक्तं तथा तथा॥८८॥ ईदृशो महिमा दृष्टो
निद्राशक्तेर्यदा तदा॥ मायाशक्तेरचिंत्योऽयं महिमेति किमद्भुतं॥८९॥ शयाने पुरुषे निद्रा स्वप्नं बहुविधं सृजेत्॥ ब्रह्मण्ये
वं निर्विकारे विकारान्कल्पयत्यसौ॥९०॥ खानिलाग्निजलोर्व्यंडलोकप्राणिशिलादिकाः॥ विकाराः प्राणिधीष्वंतः
श्चिच्छायाप्रतिबिंबिता॥९१॥ चेतनाचेतनेष्वेषु सच्चिदानंदलक्षणं॥ समानं ब्रह्म भिद्येते नामरूपे पृथक्पृथक्॥९२॥

माह। इदं युक्तमिति। उक्तमर्थं कैमुतिकन्यायेन स्पष्टयति। ईदृश इति। अप्रयतमानब्रह्मनिष्ठाया मायाया आश्चर्यहेतुत्वे दृष्टांतमाह
शयान इति। मायया सृष्टान्पदार्थान्दर्शयति। खानिलेति। ननु पंचभौतिकत्वेन साम्येऽपि केषांचिच्चेतनत्वं केषांचिज्जडत्वं कुत इ
त्याशंक्याह। प्राणिधीष्विति। प्राणिधीष्वंतःकरणेषु चैतन्यप्रतिबिंबनाच्चेतनत्वमितरत्र तदभावाज्जडत्वमित्यर्थः। ननु चेतना

ब्रह्मणश्चिज्जडसाधारणत्वे हेतुमाह॥ ब्रह्मणीति॥ ब्रह्मणः सर्वकल्पनाधारत्वात्सर्वगतत्वमित्यर्थः॥ तत्कथमवगम्यत इत्याशंकायां कल्पितनामरूपत्यागे धिष्ठानं ब्रह्मावगम्यत इत्याह॥ उपेक्ष्येति॥ उक्तार्थे दृष्टांतमाह॥ जलस्थ इति॥ नीरे धोमुखे देहे दृश्यमानेपि तत्रादरपरित्यज्यतीरस्थे स्वदेहेत द्विपरीतेममबुद्धिर्यथेत्यर्थः॥ इदानीं सर्वजनप्रसिद्धं दृष्टांतांतरमाह॥ सहस्रश इति॥ उपेक्षाक

ब्रह्मण्येते नामरूपे पटे चित्रमिव स्थिते॥ उपेक्ष्य नामरूपे द्वे सच्चिदानंदधीर्भवेत्॥१३॥ जलस्थे धोमुखे स्वस्य देहे दृष्ट्वाप्युपेक्ष्यते॥ तीरस्थ एव देहे स्वतात्पर्यं स्याद्यथा तथा॥१४॥ सहस्रशो मनोराज्ये वर्तमाने सदैव तत्॥ सर्वै रुपेक्ष्यते यद्वदुपेक्षा नामरूपयोः॥१५॥ क्षणे क्षणे मनोराज्यं भवत्येवान्यथान्यथा॥ गतं गतं पुनर्नास्ति व्यवहारो बहिस्तथा॥१६॥ न बाल्यं यौवने बाल्ये यौवनं स्थाविरे तथा॥ मृतः पिता पुनर्नास्ति नायात्येव गतं दिनं॥१७॥ मनोराज्याद्विशेषः कः क्षणध्वंसिनि लौकिके॥ अतोस्मिन्भासमानेपि तत्सत्यत्वधियं त्यजेत्॥१८॥ उपेक्षिते लौकिके धीर्निर्विघ्ना ब्रह्मचिंतने॥ नटवत्कृत्रिमास्थायां निर्वहत्येव लौकिकं॥१९॥

र्व्येति शेषः॥ प्रपंचवैचित्र्ये दृष्टांतमाह॥ क्षणे क्षण इति॥ दार्ष्टांतिकमाह॥ व्यवहार इति॥ तदेव विवृणोति॥ न बाल्यमिति॥ द्वैतक्षणिकत्वमुपसंहरति॥ मनोराज्यादिति॥ क्षणिकत्वसाधनेप्रयोजनमाह॥ अतोस्मिन्निति॥ ननु लौकिकोपेक्षाया कोलाभ इत्याशंक्य ब्रह्मणि धीः स्थिरा भवतीत्याह॥ उपेक्षित इति॥ तर्हि तानिनो व्यवहारः कथमित्याशंक्याह॥ नटवदिति॥१९॥

कः

ननु ज्ञानिनो व्यवहाराभ्युपगमे विकारित्वप्रसङ्ग्येते त्याशंक्य बुद्धेर्व्यवहारवत्त्वामपि तत्साक्ष्यात्मा निर्विकार इति सदृष्टांतमाह॥ प्रवहतीति॥ उदके उपरि प्रवहत्यपि अधःस्थिता प्रौढा शिला यथा न चलति तथा बुद्धौ संसरंत्यामपि न ज्ञानी संसरतीत्यर्थः॥
नन्वखंडब्रह्मणि तद्विलक्षणस्य जगतः कथमवभानमित्याशंक्य निश्छिद्रे दर्पणे सावकाशवस्तुनो यथा भानं तद्वदित्याह॥
निश्छिद्र इति॥ नन्वद्वये ब्रह्मणि कथं जगत्प्रतीतिरित्याशंक्य सच्चिदानंदप्रतीतिपुरःसरमेव जगत्प्रतीतिरिति सदृष्टां

प्रवहत्यपि नीरेऽधः स्थिरा प्रौढशिला यथा॥ नामरूपान्यथात्वेपि कूटस्थं ब्रह्म नान्यथा॥१००॥ निश्छिद्रे दर्पणे भाति वस्तुगर्भं बृहद्वियत्॥ सच्चिद्घने तथा नाना [illegible] जगद्गर्भं [illegible] वियज्जगत्॥१०१॥ अदृष्ट्वा दर्पणं नैव तदंतस्थेक्षणं यथा॥ अमत्वा सच्चिदानंदं नामरूपमतिः कुतः॥१०२॥ प्रथमं सच्चिदानंदे भासमानेऽथ तावता॥ बुद्धिं नियम्य नैवोर्ध्वं धारयेन्नामरूपयोः॥१०३॥ एवं च निर्जगद्ब्रह्म सच्चिदानंदलक्षणम्॥ अद्वैतानंद एतस्मिन्विश्राम्यंतु जनाश्चिरं॥१०४॥ ब्रह्मानंदाभिधे ग्रंथे चतुर्थोऽध्याय ईरितः॥ अद्वैतानंद एव स्याज्जगन्मिथ्यात्वचिंतया॥१०५॥ इति ब्रह्मानंदे द्वैतानंदस्तृतीयोऽध्यायः॥ शके १७८३ भाद्रव० ३ रोज शनिवार ॥

तमाह॥ अदृष्ट्वेति॥ ननु नामरूपयोरतिभासमानत्वात्कथं निर्विषयब्रह्मप्रतीतिरित्याशंक्य तद्धृत्युपायमाह॥ प्रथममिति॥ सच्चिदानंदे ब्रह्मणि कल्पितनामरूपात्मके प्रपंचे सच्चिदानंदमात्रं बुध्या गृहीत्वा नामरूपयोर्बुद्धिं न धारयेत्॥ एवं च सति निर्जगद्ब्रह्म सच्चिदानंदलक्षणं भवतीत्यर्थः॥ इदानीमध्यायार्थमुपसंहरति॥ ब्रह्मानंदाभिधइति॥ इति अद्वैतानंदव्याख्या॥

॥श्रीगणेशाय नमः॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ कुर्वे कूटस्थदीपस्य व्याख्यां तात्पर्यदीपिकां॥१॥ मुमुक्षो
र्मोक्षसाधनस्य ब्रह्मात्मैकत्वज्ञानस्य त्वंपदार्थशोधनपूर्वकत्वात् त्वंपदार्थशोधनपरे कूटस्थदीपाख्ये ग्रंथमारभ
माण आचार्यो ऽस्य ग्रंथस्य वेदांतप्रकरणत्वेन तदीयैरेव विषयादिभिस्तद्वत्तासिद्धिमभिप्रेत्य त्वंपदलक्ष्यवाच्यौ कू
टस्थजीवौ सदृष्टांतं भेदेन निर्दिशति॥ स्वादित्येति॥ स्वादित्यदीपिते स्वे आदित्यः स्वादित्यः प्रसिद्धः सूर्य इत्यर्थः
तेन च तत्संबध्यालोकोपलक्ष्यते॥ तेन दीपिते प्रकाशिते कुड्ये दर्पणादित्यदीप्तिवद्दर्पणेषु निपत्य पर्यावृत्तैः कुड्यसं

॥श्री॥ स्वादित्यदीपिते कुड्ये दर्पणादित्यदीप्तिवत्॥ कूटस्थभासितो देहो धीस्थजीवेन भास्यते॥१॥
॥अनेकदर्पणादित्यदीप्तीनां बहुसंधिषु॥ इतरा व्यज्यते तासामभावेपि प्रकाशते॥२॥ ७ ॥

बंधैरादित्यरश्मिभिस्तत्प्रकाशनमिव कूटस्थभासितः कूटस्थेनाविकारिचैतन्येन भासितः प्रकाशितो देहो धीस्थजी
वेन बुद्धिस्थचिदाभासेन भास्यते प्रकाश्यते॥ अनेन सामान्यतो विशेषतश्च कुड्यावभासकादित्यप्रकाशद्वयमिव देहा
वभासकं चैतन्यद्वयमस्तीति प्रतिज्ञातं भवति॥१॥ ननु दर्पणादित्यदीप्तिव्यतिरेकेण स्वादित्यदीप्तिर्नोपलभ्यत इ
त्याशंक्य ताभ्यस्तां विभज्य दर्शयति॥ अनेकेति॥ या अनेका बहुदर्पणजन्याः कुड्ये तत्रतत्र मंडलाकारा विशेषप्र
भा दृश्यंते तासां मध्ये मध्ये इतरा सामान्यप्रकाशरूपा स्वादित्यप्रभा व्यज्यते। अभिव्यक्तोपलक्ष्यते तासां दर्पणज
न्यप्रभाणामभावे दर्पणापगमादिना सत्त्वे च स्वयं सर्वत्र प्रकाशते॥२॥ ७ ॥ ७ ॥ ७ ॥

॥कू०॥
॥१॥

दृष्टांतसिद्धमर्थं दार्ष्टांतिके योजयति ॥ चिदाभासेति ॥ तथा तेनैव प्रकारेण चिदाभासविशिष्टानां चित्प्रतिबिंबयुक्ता
नामनेकधियामनेकासां बुद्धिवृत्तीनां घटज्ञानादिरूपाद्ध्वा व्याप्तानां संधिमंतरालं जाग्रदादौ धियां तासामभावं बुद्धिवृत्ती
नामभावं च सुषुप्त्यादौ भासयन् प्रकाशयन्नसौ कूटस्थः प्रविविच्यतां ताभ्यो भेदेन ज्ञायतामित्यर्थः ॥४॥ इदानीं
देहांतः कूटस्थचिदाभासयोर्भेदं प्रदर्शनाय देहाद्बहिरपि चिदाभासब्रह्मणी विभज्य दर्शयति ॥ घटैकाकारेति ॥ घ
टैकाकारधीस्था चित् । घटस्यैकस्य आकार इव आकारो यस्याः सा घटैकाकारा तथाविधायां बुद्धौ वर्तमानश्चिदा

॥ चिदाभासविशिष्टानां तथानेकधियामसौ ॥ संधिं धियामभावं च भासयन्प्रविविच्यताम् ॥४॥ घटैका
कारधीस्था चिद्घटमेवावभासयेत् ॥ घटस्य ज्ञातता ब्रह्मचैतन्येनावभास्यते ॥५॥ अज्ञातत्वेन ज्ञातो
ऽयं घटो बुद्ध्युदयात्पुरा ॥ ब्रह्मणैवोपरिष्टात्तु ज्ञातत्वेनेत्यसौ भिदा ॥६॥

भासो घटमेवावभासयेत् ॥ तस्य घटस्य ज्ञातताख्यो धर्मः घटो ज्ञात इति व्यवहारहेतुर्धर्मः स घटकल्पनाधिष्ठानेन ब्र
ह्मचैतन्येन साक्षिभूतेनावभास्यते प्रकाश्यते इत्यर्थः ॥५॥ ननु ज्ञाततावभासकचैतन्येनैव घटप्रतीतिसंभवाद्बु
द्धिः किमर्थं स्यात्कुत्र घटस्य ज्ञाततादिभेदसिद्ध्यर्थं स्यादित्याह ॥ अज्ञातत्वेनेति ॥ बुद्ध्युदयात्पुरा अयं घटो ब्रह्मणै
वाज्ञातत्वेन प्रकाशितो बुद्ध्युत्पत्तौ सत्यां ज्ञातत्वेन ब्रह्मणैव प्रकाश्यते इतीयानेव भेदो नान्य इत्यर्थः ॥६॥

नन्वेकस्यैव घटस्य ज्ञातत्वाज्ञातत्वलक्षणं द्वैरूप्यं कथं संभवती त्याशंक्य तत्त्वबोधनाय ज्ञातताऽज्ञातत्वानिमित्तयोर्ज्ञाना

ज्ञानयोः स्वरूपं तावद्दर्शयति॥ चिदाभासेति॥ चिदाभासान्तधीवृत्तिः चिदाभासश्चिद्व्याप्तिर्बिंबः सोंऽते पुराभागे यस्याः सा धीवृत्तिर्ज्ञानमित्युच्यते॥ बोधेत्याबुद्धिरित्यावार्थैरभिधानात्॥ तत्र दृष्टांतः लोहांतकुंतवदिति॥ जाड्यस्य

तः स्फूर्तिरहितमज्ञानमित्युच्यते॥ एताभ्यां पर्यायेण व्याप्तः संबद्धः कुंभो ज्ञात इत्यज्ञात इति चोच्यत इत्यर्थः॥५॥

नन्वज्ञातस्य कुंभस्याज्ञानव्याप्तत्वाद्भवतु ब्रह्मावभासत्वं ज्ञानव्याप्तत्वेस्य तु ज्ञातस्य कुंभस्य कुतो ब्रह्मचैतन्यावभा

चिदाभासान्तधीवृत्तिर्ज्ञानं लोहांतकुंतवत्॥ जाड्यमज्ञानमेताभ्यां व्याप्तः कुंभो द्विधोच्यते॥६॥ अज्ञातो

ब्रह्मणाभास्यो ज्ञातः कुंभस्तथा न किं॥ ज्ञातत्वजननेनैव चिदाभासपरिक्षयः॥७॥ आभासहीनया बुद्ध्या ज्ञातत्वं नैव जन्यते॥ तादृग्बुद्धेर्विशेषः को मृदादेः स्याद्विकारिणः॥८॥ ज्ञात इत्युच्यते कुंभो मृदालिप्तः

स्यत्वमित्याशंक्याज्ञातस्याज्ञानजननं इव ज्ञानस्यापि ज्ञातताजननमात्रोपक्षीणत्वाद् ज्ञातकुंभवदज्ञातस्यापि

ब्रह्मावभास्यत्वं भवतीत्याह॥ अज्ञात इति॥ यथाज्ञातकुंभो ब्रह्मणावभास्यस्तथा ज्ञातः कुंभो न किं ब्रह्मावभास्यो

ज्ञातेत्वेने
ति॥७॥

न भवति किंतु भवत्येवेत्यर्थः॥ कुत इत्यत आह॥ नन्वज्ञातताजननाया ज्ञानमिव ज्ञातताजननाया पि बुध्यैवाले

किमनेन चिदाभासेनेत्याशंक्य चिदाभासरहिताया बुद्धेर्घटादिवदप्रकाशरूपत्वेन ज्ञातताजननेन संभवतीत्या

ह॥ आभासेति॥८॥ चिदाभासरहितबुद्धिव्याप्तस्य घटस्य ज्ञातत्वाभावं दृष्टांतप्रदर्शनेन स्पष्टयति॥ ज्ञात इति॥ लो

113

॥७०॥

॥३॥

तथा चिदाभासरहितबुद्धिव्याप्तस्यापि कुंभस्य ज्ञातत्वेनाभ्युपगम्यत इति भावः ॥१०॥ फलितमाह ॥ ज्ञातत्वमिति ॥ यतः केवलाया बुद्धेर्ज्ञातत्वजननासमर्थत्वमतः कुंभे चिदाभासलक्षणस्य फलस्योत्पत्तिरेव ज्ञातत्वं नोमप्रसिद्धमित्यर्थः ॥ ननु तथापि चिदाभासोनकल्पनीयो ब्रह्मचैतन्यस्यैव फलस्य सद्भावादित्याशंक्याह ॥ नफलमिति ॥ ब्रह्मचैतन्यं फलं वक्तुं न शक्यते प्रमाणप्रवृत्तेः पूर्वमपि विद्यमानत्वात्फलस्य तु तदुत्तरकालीनत्व नियमादिति भावः ॥ ननु चिदपरागर्थप्रमेयेष्वित्यादि सुरेश्वरवार्त्तिकविरुद्धमित्याशंक्य तद्विवक्षानभिस्फुरणं न भवतीति ॥ कुत इत्यत आह ॥ मानात्प्रागिति ॥ मानात्प्रागपि प्रमाणप्रवृत्तेः पूर्वमपि विद्यमानत्वात्फलस्य तु तदुत्तरकालीनत्वनियमादिति भावः ॥ ...

धीमात्रव्याप्तकुंभस्य ज्ञातत्वं नेष्यते तथा ॥ ज्ञातत्वं नाम कुंभे ऽत्र चिदाभासफलोदयः ॥ नफलं ब्रह्मचैतन्यं मानात्प्रागपि सत्वतः ॥१०॥ परागर्थप्रमेयेषु या फलत्वेन संमता ॥ संवित्सैवेह मेयोऽर्थो वेदांतोक्तिप्रमाणतः ॥११॥ इति वार्त्तिककारेण चित्सादृश्यं विवक्षितं ॥ ब्रह्मचित्फलयोर्भेदः सोहस्र्यां विश्रुतो यतः

अस्य चायमर्थः ॥ परागर्था बाह्या घटादयः परार्थास्तेषु प्रमेयेषु प्रमाणविषयेषु सत्सु या प्रमाणफलत्वेनाभ्युपेता संविदस्ति सैवेहास्मिन्नात्मवेदांतोक्तिप्रमाणतः वेदांतवाक्यलक्षणप्रमाणेन मेयो ज्ञातव्योऽर्थः ॥११॥ इत्यनेन वार्त्तिककारेण ब्रह्मचैतन्यसदृशश्चिदाभासः प्रमाणफलत्वेन विवक्षितो न ब्रह्मचैतन्यमिति भावः ॥ वार्त्तिककाराणामीदृशी विवक्षेति कुतोऽवगम्यत इत्याशंक्य तद्गुरुभिः श्रीमदाचार्यैरुपदेशसाहस्र्यां ब्रह्मचैतन्यचिदाभासयोर्भेदस्य प्रतिपादितत्वादित्याह ॥ ब्रह्मचित्फलयोरिति ॥ स्पष्टार्थः ॥ पर इत्यस्य विवरणं ॥ प्रसंगार्थेति ॥ ... स्तस्येदंचोद्यमितिपरिहरति ॥

ब्रह्मविदिति ॥

तत्पुनर्ब्रह्मणाभास्यमज्ञातत्ववदेव हि ॥१३॥ धीवृत्त्याभासकुम्भानां समूहो भास्यते चिता ॥

एवं सति प्रकृते किमायातमित्यत आह ॥ आभास इति ॥ यस्माद्ब्रह्मचिदाभासयोर्भेदः सिद्धस्तस्माद्घटे उदित उत्पन्न आ
भासश्चिदाभासस्तत्र घटे ज्ञातत्वं जनयेदुत्पन्नं करोति ज्ञातत्वं पुनरज्ञातत्ववद्ब्रह्मणैव भास्यं भवति हि प्रसिद्धमित्यर्थः
॥१३॥ एवं ब्रह्मचिदाभासयोर्भेदमुपपादितं विषयभेदप्रदर्शनेन स्पष्टयति ॥ धीवृत्त्याभासकुम्भानामिति ॥ चिता
ब्रह्मचैतन्येनेत्यर्थः ॥ चिदाभासस्य कुम्भमात्रफलनिष्ठफलरूपत्वात्तेनाभासेन स घट एक एव स्फुरेद्भास्यत इत्यर्थः ॥१४॥

आभासउदितस्तस्माज्ज्ञातत्वं जनयेद्घटे ॥ कुम्भमात्रफलत्वात्स एकाभासः स्फुरेत्तु ॥१४॥ चैतन्यं
द्विगुणं कुम्भे ज्ञातत्वेन स्फुरेत्ततः ॥ अन्ये तु व्यवसायास्यमाहुरेतद्यथोदितं ॥१५॥ घटोयमित्यसावु
क्तिराभासस्य प्रसादतः ॥ विज्ञातो घट इत्युक्तिर्ब्रह्मानुग्रहतो भवेत् ॥१६॥ आभासब्रह्मणी देहा
द्बहिर्यद्वद्विवेचिते ॥ तद्वदाभासकूटस्थौ विविच्येतां वपुष्यपि ॥१७॥ कुंभस्य चिदाभासब्रह्मोभयभा

स्यत्वे लिंगमाह ॥ चैतन्यमिति ॥ अतो घटस्य ब्रह्मचिदाभासोभयभास्यत्वात्कुम्भे ज्ञातत्वेन द्विगुणं चैतन्यभा
ति ॥ इदमेव घटज्ञातताऽवभासकं चैतन्यं तार्किकैर्नामान्तरेण व्यवह्रियत इत्याह ॥ अन्ये त्विति ॥ यथोदितं य
थोऽयमेतदेव ब्रह्मचैतन्यमन्ये तार्किका अनुव्यवसायाख्यज्ञानान्तरमाहुरिति यावत् ॥१५॥ अयं घट इति
ज्ञातो घट इति व्यवहारभेदादपि चिदाभासब्रह्मणोर्भेदोऽवगन्तव्य इत्याह ॥ घटोयमिति ॥१६॥ देहाद्बहि उ
श्चिदाभासब्रह्मणी विविच्येते यथा तथा देहान्तश्चिदाभासकूटस्थौ विवेचनीयावित्याह ॥ आभासब्रह्मणी

॥कू०॥
॥कू॥

ननु देहाद्बहिश्चिदाभासव्याप्यघटाकारवृत्तिवदांतरविषयगोचरवृत्त्यभावात्कथं तद्व्यापकश्चिदाभासोऽभ्युपगम्यत इत्याशंक्य विषयगोचरवृत्त्यभावेऽपि अहमादिवृत्तिसद्भावात्तद्व्यापकश्चिदाभासोऽभ्युगंतव्य इत्याशंक्य तद्वृत्तिसदृष्टांतमाह॥ अहंवृत्ताविति॥ अहमादिवृत्तीनामेव चिदाभासव्याप्यत्वं दृष्टांतप्रपंचनेन स्पष्टयति॥ स्वमात्रमिति॥ एवं चिदाभासं व्युत्पाद्य कूटस्थरूपं व्युत्पादयितुं तदुपयोगिनं वृत्त्यभावावसरं दर्शयति॥ क्रमादिति

अहंवृत्तौ चिदाभासः कामक्रोधादिकासु च॥ संव्याप्य वर्त्तते तप्ते लोहे वह्निर्यथा तथा॥१८॥ स्वमात्रं भासते तप्तलोहे हिंदाचन॥ एवमाभाससहिता वृत्तयः स्वस्वभासिकाः॥१९॥ क्रमाद्विच्छिद्य जायंते वृत्तयोऽखिलाः॥ सर्वा अपि विलीयंते सुप्तिमूर्छासमाधिषु॥२०॥ संधयोऽखिलवृत्तीनामभावाश्चावभासिताः॥ निर्विकारेण येनासौ कूटस्थ इति चोच्यते॥२१॥ घटे द्विगुणचैतन्यं यथा बाह्ये तथांतरे॥ वृत्तिष्वपि ततस्तत्र वैगुण्यं संधितो धियं॥२२॥

नान्य

भवत्वेवं समाध्यादौ वृत्तिविलयेन न कथं कूटस्थोऽवगम्यते इत्याशंक्य वृत्त्यभावसाक्षित्वेनासाववगम्यत इत्याह॥ संधय इति॥ वृत्तिसंधयो वृत्त्यभावाश्च येन चैतन्येनावभास्यंते स कूटस्थोऽवगंतव्य इत्यर्थः॥२१॥ एवं च किं फलितमित्यत आह॥ घट इति॥ बाह्ये घटे यथा घटमात्रावभासकश्चिदाभासोऽघटस्य सत्ताऽवभासकं ब्रह्मचैतन्यं चेति चैतन्यद्वैगुण्यं तथांतरेऽहंकारादिवृत्तिष्वपि कूटस्थचैतन्यं तत्त्वावभासकश्चिदाभासश्चेति द्विगुणं चैतन्यमस्ति॥ तत्रोपपत्तिमाह॥

नन्वज्ञा। पिघटादिष्विव ज्ञातताऽज्ञातताव भासकत्वेन कूटस्थः किं नेष्यत इत्याशंक्यत अज्ञातत्वाद्यभावादेवेत्याह ॥ ज्ञा
ततेति ॥ तत्रोपपत्तिमाह ॥ स्वस्येति ॥ ज्ञानाज्ञानयोः सिध्या ज्ञातताज्ञातते भवतः । इती नातु स्वप्रकाशत्वेन ज्ञानव्या
प्तिर्नास्ति । ताभिर्वृत्तिभिः स्वोत्पत्तिमात्रेण स्वगोचराज्ञानस्य निवर्तितत्वादज्ञानस्याव्याप्तिरपि नास्तीति भावः ॥२२॥
ननु कूटस्थचिदाभासयोरुभयोरपि चित्वे समाने एकस्य कूटस्थत्वमपरस्य त्वकूटस्थत्वमित्येतत्कुत इत्याशंक्य चिदा
भासनिष्ठयोर्जन्मनाशयोरनुभूयमानत्वादस्याकूटस्थत्वमितरस्य विकारित्वे प्रमाणाभावात्कूटस्थत्वमित्याह ॥

ज्ञातताज्ञातते न स्तो घटवद्वृत्तिषु क्वचित् ॥ स्वस्य स्वेनागृहीतत्वात्ताभिश्चाज्ञाननाशनात् ॥२३॥ द्वि
गुणीकृतचैतन्ये जन्मनाशानुभूतितः ॥ अकूटस्थत्वमन्यत्तु कूटस्थमविकारितः ॥२४॥ अंतःकर
णतद्वृत्तिसाक्षीत्यादावनेकधा ॥ कूटस्थ एव सर्वत्र पूर्वाचार्यैर्विनिश्चितः ॥२५॥ आत्माभासाश्र
याश्चैवं मुखाभासाश्रया यथा ॥ गम्यन्ते शास्त्रयुक्तिभ्यामित्याभासश्च वर्णितः ॥२६॥ ७५

द्विगुणीकृति ॥ चिदाभासातिरिक्तकूटस्थाभ्युपगमः स्वकपोलकल्पित इत्याशंक्याचार्यैः कूटस्थस्योपपादितत्वान्नैव
मित्याह अंतःकरणेति ॥ अंतःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः आनंदरूपः सत्यः सन्किं नात्मानं प्रपद्यसे इत्यादा
विश्रब्धः ॥२५॥ कूटस्थातिरिक्तश्चिदाभासोऽपि तैर्वर्णित इत्याह ॥ आत्माभासेति ॥ आत्मा चाभासश्चाश्रयश्चा
त्माभासाश्रयाश्चेति द्वंद्वसमासः ॥ मुखाभासाश्रयाश्चेत्यत्रापि तथा ॥ मुखं प्रसिद्धमाभासो मुखप्रतिबिंबमाश्र

॥कू०॥
॥५९॥

यो दर्पणादिश्चेति त्रयं यथा प्रत्यक्षेणावगम्यते। एवमासा कूटस्थ आभासश्चिदाभासश्चाश्रयोंतःकरणादिरिति त्र
योपि शास्त्रयुक्तिभ्यामवगम्यंते इत्यर्थः॥ अत्र चाभासराहित्येन कूटस्थातिरिक्तश्चिदाभासो वर्णितः [illegible]तिभावः॥ म
नसः साक्षी बुद्धेः साक्षीति बुद्धिसाक्षिणः प्रतिपादकत्वात् रूपं रूपं प्रतिरूपो बभूवेति चिदाभासप्रतिपादकत्वा
त्वा विकारित्वाविकारित्वरूपा युक्तिः पूर्वमेवोक्तेति भावः॥२६॥ तत्र चिदाभासमाक्षिपति॥ बुध्यवच्छिन्नेति॥ स्वस्मि
न्कल्प्यमानया बुध्यावच्छिन्नः कूटस्थ एव घटद्वारा घटाकाशवद्बुद्धिद्वारा लोकांतरगमनागमने कर्तुं शक्त इति भत

बुध्यवच्छिन्नकूटस्थो लोकांतरगमागमौ॥ कर्तुं शक्तो घटाकाशाभासेन किं वद॥२७॥ शृणु असंगः
परिच्छेदमात्राज्जीवो भवेन्न हि॥ अन्यथा घटकुड्यादेरवच्छिन्नस्य जीवता॥२८॥ न कुड्यसदृ
शी बुद्धिः स्वच्छत्वादिति चेत्तथा॥ अस्तु नाम परिच्छेदे किं स्वाच्छ्येन भवेत्तव॥२९॥ प्रस्थेन दारुजन्ये
न कांस्यजन्येन वा न हि॥ विक्रेतुस्तंदुलादीनां परिमाणं विशिष्यते॥ कू०॥ चिदाभासकल्पनायां गौ

रवमिति भावः॥२७॥ असंगस्य कूटस्थस्य बुध्यवच्छेदमात्रेण जीवत्वं न घटते ऽन्यथातिप्रसंगादिति परिहरति
शृण्विति॥२८॥ बुद्धिकुड्ययोः स्वाच्छ्यास्वाच्छ्याभ्यां वैषम्यं शंकते न कुड्येति॥ उक्तं स्वच्छत्वं परिच्छेदके प्रयोजकं
न भवतीत्याह॥ तथास्त्विति॥२९॥ उक्तमर्थं दृष्टांतेन स्पष्टयति॥ प्रस्थेनेति॥ दारुकांस्यजन्ययोः प्रस्थयोः स्थि
ते स्वच्छत्वास्वच्छत्वे तंदुलपरिमाणे न्यूनाधिकभावहेतू न भवत इ॥ कू०॥ ५९ ॥ ५९ ॥ ५९ ॥
त्यर्थः॥

कांस्यप्रस्थेनं तु तुल्यपरिमाणाधिक्याभावेपि प्रतिबिंबलक्षणमाधिक्यमस्तीत्याह्। क्यत्तर्हि बुद्धावपि चिदाभासो भवन्नैवांगीकृतः
स्यादित्याह परिमाणेति ॥ २५ ॥ प्रतिबिंबांगीकारे चिदाभासः कथमंगीकृतः स्यादित्याशंक्य प्रतिबिंबाभासशब्दाभ्यामभिधे
यस्यार्थस्यैक्यादित्याह ॥ ६ ॥ यदित्ति ॥ प्रतिबिंबस्याभासत्वं कथमित्याशंक्याभासलक्षणयोगादित्याह ॥ बिंबेति ॥ हियस्मा
त्कारणात्प्रतिबिंबो बिंबलक्षणरहितो बिंबवदवभासते ऽतो बिंबाभास इति भावः ॥ २७ ॥ आभासलक्षणयोगित्वं
मेवस्पष्टयति ॥ ससंगत्वेति ॥ एतस्य चिदाभासस्य ससंगत्वविकारित्वाभ्यां बिंबभूतासंगाविकारिचैतन्यलक्षणहीनत्वात्

परिमाणाविशेषेपि प्रतिबिंबो विशिष्यते ॥ कांस्येयदित्तदा बुद्धावप्याभासो भवेद्धलात् ॥ २५ ॥ ईषद्भासनमा
भासः प्रतिबिंबस्तथाविधः ॥ बिंबलक्षणहीनः सन् बिंबवद्भासते सहि ॥ २६ ॥ ससंगत्वविकाराभ्यां बिंब
लक्षणहीनता ॥ स्फूर्तिरूपत्वमेतस्य बिंबवद्भासनं विदुः ॥ २८ ॥ न हि धीभावभावित्वादाभासोस्ति धियः
पृथक् ॥ इति चेदल्पमेवोक्तं धीरप्येवं स्वदेहतः ॥ २९ ॥ देहे मृतेपि बुद्धिश्चेच्छास्त्रादस्ति तथा सति ॥ बुद्धेरन्यश्चि

मत्वं स्फुरणरूपत्वं बिंबवदवभासनमित्यर्थः ॥ हेतुलक्षणरहिता हेतुवदवभासमाना हेत्वाभासा इतिवदित्यर्थः ॥ २८ ॥
इत्थं चिदाभासस्याप्रयोजकत्वं निराकृत्येदानीं तस्य बुद्धेः पृथक्सत्वे साधयितुं पूर्वपक्षमाह ॥ नहीति ॥ यथा मृदि सत्या
मेव भवन्घटो न मृदो भिद्यते तद्वदित्यर्थः ॥ नन्वेवं तर्हि देहातिरिक्ता धीरपि न सिध्येदिति प्रतिबंद्या परिहरति
अल्पमेवेति ॥ २९ ॥ प्रतिबंदीमोचनं शंकते ॥ देहइति ॥ देहव्यतिरिक्ता या बुद्धिः स विज्ञानो भवती हि श्रुतिसिद्ध
त्वान्नासत्वमिति भावः ॥ ननु श्रुतिबलाद्देहातिरिक्ता बुद्धिरभ्युपगम्यते चेत्तर्हि प्रवेशश्रुतिबलाद्बुद्ध्यतिरिक्तश्चिदाभा

पंचदशीटीका ॥ ६ ॥ पृ० ॥ २७ ॥

॥ कू० ॥
॥ ५ ॥

ननु बुद्ध्युपाधिकस्यैव प्रवेशोऽप्युच्यते नेतरस्येति शंकते ॥ धीयुक्तस्येति ॥ ऐतरेयश्रुतौ बुद्ध्यतिरिक्तस्यैव प्रवेशश्रवणान्मैव
मिति परिहरति ॥ नेति ॥ २६ ॥ तां श्रुतिमर्थतः पठति ॥ कथंन्विति ॥ अयं परमात्मा साक्षी देहमक्षाणि च देहाक्षदेहा
त्मा सहवर्तत इति साक्षी देहमिदं जडजातं मदृते चेतनं मां विज्ञाय कथं तु स्यात् कथमपि निर्वहेदिति विचार्य मूर्धसीमा
नं कपालत्रयमध्ये वर्तमानं विदार्य स्वसन्निधिमात्रेण भित्त्वा प्रविष्टः सन् संसरति ॥ जाग्रदादिकमनुभवतीत्यर्थः ॥ २७ ॥ त्य
ननु असंगस्यात्मनः प्रवेशोऽप्ययुक्त इति शंकते ॥ कथमिति ॥ इदं चोद्यं समानमित्याह ॥ सृष्टिर्वेति ॥ सृष्टिकर्तुर्मायिकत्वान्न दो स्रष्टा

धीयुक्तस्य प्रवेशश्चेन्नैतरेये धियः पृथक् ॥ आत्मा प्रवेशसंकल्पप्रविष्ट इति गीयते ॥ २६ ॥ कथं न्विदं साक्षि
देहं मदृते स्यादितीरणात् ॥ विदार्य मूर्धसीमानं प्रविष्टः संसरत्ययं ॥ २७ ॥ कथं प्रविष्टोऽसंगश्चेत्सृष्टिर्वास्य
कथं वद ॥ मायिकत्वं तयोस्तुल्यं विनाशश्च तयोः समः ॥ २८ ॥ समुत्थायैष भूतेभ्यस्तान्येवानु विनश्य
ति ॥ विस्पष्टमिति मैत्रेय्यै याज्ञवल्क्य उवाच ह ॥ २९ ॥ पृष्टत्वाच्छंक्यायं परिहारः प्रवेशेऽपि समान इत्याह ॥ मा

यिकत्वमिति ॥ अनयोर्मायिकत्वे हेतुश्च समान इत्याह ॥ विनाशश्चेति ॥ २८ ॥ प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय
तान्येवानु विनश्यति न प्रेत्य संज्ञास्तीत्यौपाधिकरूपस्य विनाशप्रतिपादिकां श्रुतिं दर्शयति ॥ समुत्थायेति ॥ एष प्रज्ञा
नघन एवात्मा एतेभ्यो देहेन्द्रियादिरूपेभ्यः पंचभूतकार्येभ्यो निमित्तभूतेभ्य उपाधिभ्यः समुत्थाय जीवत्वाभिधानं प्रा
प्य तान्येव देहादीनि विनश्यंत्यनु विनश्यति ॥ तेषु विनश्यत्सु तत्कृतं जीवत्वाभिधानं जहाति ॥ एवं प्रकारेण सोपाधि
करूपस्य विनाशं याज्ञवल्क्यो मैत्रेय्यै उक्तवानित्यर्थः ॥ २९ ॥ ५ ॥ ५ ॥ ५ ॥

अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मेति श्रुत्या कूटस्थस्ततो विभिन्नः प्रदर्शित इत्याह॥ अविनाशीति॥ मात्रासंसर्गीस्त्वस्य
भवतीति श्रुत्याऽविनाशित्वे हेतुमसंगत्वं चोक्तवानित्याह॥ मात्रेति॥ मीयन्त इति मात्रा देहादयस्ताभिरस्यात्मनोऽसंसर्गो
भवतीत्यर्थः॥७०॥ ननु जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति श्रुत्या स्योपाधिकस्याप्यविनाशित्वं प्रतिपाद्यत
इत्याशंक्य तस्याः श्रुतेर्देहान्तरप्राप्तिविषयतया नात्यन्तिकनाशाभावपरत्वमित्याह॥ जीवापेतमिति॥ जीवापेतं जीवरहि
तं शरीरं जीवेन त्यक्तमिति यावत्॥ वाव एव स जीवो न म्रियत इत्यर्थः॥७१॥ ननु जीवस्याविनाशित्वेऽहं ब्रह्मास्मीत्यविनाशि

अविनाश्ययमात्मेति कूटस्थः प्रविवेचितः॥ मात्रासंसर्ग इत्येवमसंगत्वस्य कीर्तनात्॥७०॥ जीवापेतं
वाव किल शरीरं म्रियते न सः॥ इत्यनेन विमोक्षार्थः किं तु लोकान्तरे गतिः॥७१॥ नाहं ब्रह्मेति बुध्येत स
विनाशीति चेन्मतम्॥ सामानाधिकरण्यस्य बाधायामपि संभवात्॥७२॥ योऽयं स्थाणुः पुमानेष पुंधि
या स्थाणुधीरिव॥ ब्रह्मास्मीति धियाऽशेषा ह्यहंबुद्धिर्निवर्त्यते॥७३॥ ब्रह्मतादात्म्यज्ञानेन घटत इति कू

कत्वे॥ नाहमिति॥ विनाशी स जीवोऽहं ब्रह्मेति ब्रह्मरूपेणात्मानं न बुध्येत न जानीयाद्विनाशस्याविनाशिनो रेकत्ववि
रोधादिति चेन्मुख्यसामानाधिकरण्याभावेऽपि बाधायां सामानाधिकरण्यसंभवाज्जीवबाधेन ब्रह्मभावोऽवगन्तुं श
क्यत इत्याह॥ न तदिति॥७२॥ बाधासामानाधिकरण्येन वाक्यार्थप्रतिपत्तिप्रकारो वार्तिककारैः सदृष्टान्तोऽभि
हित इति तं समर्थनं वाक्यादाहरणपूर्वकं दर्शयति॥ योऽयमिति॥ स्थाणुरेष पुमानित्यस्मिन्वाक्ये पुरुषत्वबोधेन स्थाणु

॥कू०॥
॥६॥

एवमुक्तप्रकारेणाचार्यैर्वार्त्तिककारैर्नैष्कर्म्यसिद्धौ सामानाधिकरण्यस्य बाधार्थत्वं स्पष्टमीरितमिति ॥ फलितमाह ॥ भ्रो
तोस्थितिः अतः कारणाद्ब्रह्माहमस्मीतिवाक्ये सामानाधिकरण्यस्य बाधार्थत्वमस्ति इत्यर्थः ॥ ७७ ॥ नन्वेवमपि श्रु
तिषु बाधायां सामानाधिकरण्यं नुक्तापि दृष्टमित्याशंक्य सर्वं खल्विदं ब्रह्मेत्यत्र बाधायां सामानाधिकरण्यं दृष्टमतो त्रापि
तद्वद्भविष्यतीत्याह ॥ सर्वमिति ॥ ननु तर्हि विवरणाचार्यैर्बाधासामानाधिकरण्यं कुतो निराकृतमित्याशंक्य तैरहं
ब्रह्मेन कूटस्थस्य विवक्षितत्वादित्याह ॥ सामानाधिकरण्यस्येति ॥ ७८ ॥ कूटस्थत्वविवक्षयेत्युक्तमर्थं विवृणोति ॥ भ्रोधितर

नैष्कर्म्यसिद्धावप्येवमाचार्यैः स्पष्टमीरितं ॥ सामानाधिकरण्यस्य बाधार्थत्वमतोस्तु तत् ॥ ७७ ॥ सर्वं ब्रह्मेति जं
गता सामानाधिकरण्यवत्तु ॥ अहं ब्रह्मेति जीवेन सामानाधिकृतिर्भवेत् ॥ ७५ ॥ सामानाधिकरण्यस्य बा
धार्थत्वं निराकृतं ॥ प्रयत्नतो विवरणे कूटस्थत्वविवक्षया ॥ ७६ ॥ भ्रोधितस्त्वंपदार्थाय कूटस्थो ब्रह्मरूप
तां ॥ तस्य वक्तुं विवरणे तथोक्तमितरत्र च ॥ ७७ ॥ देहेन्द्रियादियुक्तस्य जीवाभासभ्रमस्य यो ॥ अधिष्ठाने चि

तिः ॥ भ्रोधित इति बुध्यादिभ्यो विवेचितस्त्वंपदलक्ष्यो यः कूटस्थो वक्ष्यमाणलक्षणस्तस्य ब्रह्मरूपतां सत्यज्ञानादिलक्ष
णब्रह्मरूपतां वक्तुं विवरणादिषु बाधासामानाधिकरण्यनिराकरणपूर्वकं मुख्यसामानाधिकरण्यमुक्तमित्यर्थः ॥ ७७ ॥
इदानीं कूटस्थस्य ब्रह्मणैक्यसंभावयितुं कूटस्थशब्देन विवक्षितमर्थमाह ॥ देहेन्द्रियादीति ॥ आदिशब्देन मनआदयो
गृह्यंते ॥ एवं च देहेन्द्रियादियुक्तस्य शरीरद्वयसहितस्य जीवाभासभ्रमस्य चिदाभासभ्रमस्य योधिष्ठानचितिर्यद
धिष्ठानचैतन्यमस्ति तदत्र वेदांतेषु कूटस्थशब्देन विवक्षितमित्यर्थः ॥ ७८ ॥ ७९ ॥ ७९ ॥ ७९ ॥

रूप

ब्रह्मशब्दस्यार्थमाह।। जगद्भ्रमस्येति।। कृत्स्नजगद्रूपस्याधिष्ठानं यच्चैतन्यं वेदांतेषु निरूपितं तदत्र ब्रह्मशब्देन विवक्षितमित्यर्थः।।४९
ननु जीवभ्रमाधिष्ठानं चैतन्यं कूटस्थ इत्युक्तं ननु पश्चाज्जीवस्यारोपितत्वासिद्धेरसाधकत्वात् स्यारोपितत्वे कैमुतिकन्यायेन सा
धयति।। एतस्मिन्निति।। जगदेकदेशत्वेनानेन जीवेनात्मनानुप्रविश्येत्यादिश्रुतिसिद्धं।।५०।। ननु जगदधिष्ठानचैतन्यस्यै
कत्वात्तत्त्वंपदार्थभेदाभावेन तत्त्वंपदार्थयोः पौनरुक्त्यमित्याशंक्य तयोरारोपाधिकोऽभेदो वास्तवमैक्यमित्याह।। जगदिति।।
जगदिति तदेकदेशाख्य इति चाख्यायस्य समारोप्यस्य तत्तथा।। जातावेकवचनं।।५१।। ननु चिदाभासस्य शुक्तिरजतादिवद्धि

जगद्भ्रमस्य सर्वस्य यदधिष्ठानमीरितं।। त्रय्यंतेषु तदत्रस्याद्ब्रह्मतत्त्वं विवक्षितं।।४९।। एतस्मिन्नेव चैतन्ये ज
गदारोप्यते यदा।। तदा तदेकदेशस्य जीवाभासस्य कथा।।५०।। जगत्तदेकदेशाख्यसमारोप्यस्य भेदतः।।
तत्त्वंपदार्थौ भिन्नौ स्तो वस्तुतस्त्वेकता चितः।।५१।। कर्तृत्वादीन्बुद्धिधर्मान्स्फूर्त्याख्यां चात्मरूपतां।। दध
द्भाति पुरत आभासोतो भ्रमो भवेत्।।५२।। का बुद्धिः कोयमाभासः को वात्मात्र जगत्कथं।। इत्यनिर्णयतो
मोहः सोयं संसार उच्यते।।५३।।

का

स्वानारोप्योभयधर्मवत्त्वानुपलंभात्कथमारोपितत्वमित्याशंक्याह।। कर्तृत्वादीनि
ति।। बुद्ध्युपाधिद्वारा समारोप्यमाणकर्तृत्वभोक्तृत्वप्रमातृत्वादीन् स्फुरणलक्षणमात्मरूपत्वं च दधत्पुरतो भाति स्पष्टं
प्रतिभासते अत आभासः कल्पित इत्यर्थः।।५२।। अस्य भ्रमस्य किं कारणमित्याकांक्षायां बुद्ध्यादिस्वरूपापरिज्ञान गर
मेवेत्याह।। का बुद्धिरिति।। तस्य निवर्तनीयत्वायानर्थहेतुतामाह।। सोयमिति।।५३।। ६९ ।। ६९ ।।

123

॥ कू० ॥
॥ ७ ॥

अस्य किं निवर्तकमित्याकाङ्क्षायां बुध्यादीनां स्वरूपविवेक एव निवर्तक इत्यभिप्रेत्य तत्त्वज्ञानेनैव तानीतत एव चानर्थ निवृत्तिरित्याह ॥ बुध्यादीनामिति ॥ ५४ ॥ एवं बंधमोक्षयोरविवेकमूलत्वे सत्यद्वैतवादे कस्य बंधः कस्य वा मोक्ष इत्येवमादिरूपास्तार्किकैः क्रियमाणाः कुतर्कमूलाः परिहासविशेषाः खंडनोक्तयुक्तिभिस्तेषां निरुत्तरत्वापादनेन परिहरणीया

बुध्यादीनां स्वरूपं यो विविनक्ति स तत्त्ववित् ॥ स एव मुक्त इत्येवं वेदांतेषु विनिश्चयः ॥ ५४ ॥
एवं च सति बंधः स्यात्कस्येत्यादिकुतर्कजाः ॥ विडंबना दृढं खंड्याः खंडनोक्तिप्रकारतः ॥ ५५ ॥ वृत्तेः साक्षितया वृत्तिप्रागभावस्य च स्थितः ॥ बुभुत्सायां तथाज्ञोस्मी त्याभासाज्ञानवस्तुनः ॥ ५६ ॥ ५ ॥ ५ ॥

॥ ५५ ॥
इत्याह ॥ एवमिति ॥ एवं श्रुतियुक्तिभ्यां कूटस्थं बुध्यादिभ्यो विविच्य दर्शयित्वा पुराणोपपादितद्विवेकः कृत इत्याह ॥ वृत्तेरित्यादिश्लोकत्रयेण ॥ कामादिवृत्त्युत्पत्तेः सत्वात्तस्याः साक्षित्वेन वृत्त्युदयात्पूर्वं तत्प्रागभावसाक्षित्वेन स जिज्ञासायां सत्यां तत्साक्षित्वेन ततः पूर्वमज्ञोस्मीत्यनुभूयमानाज्ञानसाक्षित्वेन च चिद्रिव एव तिष्ठति ॥ ५६ ॥

ले ५

सचासत्वस्य जगत आलंबनत्वेनाधिष्ठानसत्यः जडस्य सर्वस्य साधकत्वेनावभासकत्वाच्चिद्रूपः सर्वदा प्रेमविषयत्वादा
नंदरूपः सर्वार्थावभासकत्वेन सर्वसंबंधित्वात्संपूर्णः इत्युच्यते॥ अत्रेदमभिमतं। विमतः शिवो वृत्त्यादिभ्यो भिद्यते
वृत्त्यादिसाक्षित्वात् यद्यद् वृत्त्यादिभ्यो न भिद्यते तत्तद् वृत्त्यादि साक्षि न भवति यथा वृत्त्यादि विमतः सत्यो भवितुमर्हति नि
ख्याधिष्ठानत्वात् यदसत्यं न तदधिष्ठानं शुक्तिवत्। विमतः चिद्रूपः जडमात्रावभासकत्वात् यच्चिद्रूपं न भवति तत्सर्वजडा
वभासकमपि न भवति यथा घटादिः। विमतः परमानंदरूपः परमप्रेमास्पदत्वात् यत्परमानंदरूपं न भवति तत्परप्रेमास

असत्यालंबनत्वेन सत्यः सर्वजडस्य तु॥ साधकेन चिद्रूपः सदा प्रेमास्पदत्वतः॥५७॥ आनंदरूपः सर्वार्थ
साधकत्वेन हेतुना॥ सर्वसंबंधवत्वेन संपूर्णः शिवसंज्ञितः॥५८॥ इति शैवपुराणेषु कूटस्थः प्रविवेचितः
जीवेशत्वादिरहितः केवलः स्वप्रभः शिवः॥५९॥ मायाभासेन जीवेशौ करोतीति श्रुतत्वतः॥ मायिका
वेव जीवेशौ स्वच्छौ तौ काचकुंभवत्॥६०॥

दमपि न भवति यथा घटादि। विमतः परिपूर्णः सर्वसंबंधित्वाद्गग
नवत् सर्वसंबंधित्वं च सर्वसाधकत्वेन। विमतः सर्वसंबंधिवान् सर्वावभासकत्वात् यः सर्वसंबंधवान्न भवति स सर्वा
वभासकोऽपि न भवति। यथा दीपादिरपि॥५८॥ उदाहृतपुराणवाक्यस्य तात्पर्यमाह। इतीति। इत्येवं प्रकारेण सूतसं
हितादिपुराणेषु जीवेशत्वादिकल्पनारहितः केवलोऽद्वितीयः स्वप्रभः स्वयंप्रकाशचैतन्यरूपः शिवः कूटस्थो विवेचि
तः इत्यन्वयः॥५९॥ जीवेशत्वादिरहितत्वं कुतः इत्याशंक्य श्रुत्या तयोर्मायिकत्वप्रदर्शनादित्याह॥ मायेति। जीवेशा
वाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतिर्मायाविद्याधीनयोश्चिदाभासयोर्मायिकत्वं प्रतिपाद

॥ कू० ॥
॥ ८ ॥

ननु घटकाचकुंभारंभकयोर्मृद्विशेषयोर्भेदात् वैलक्षण्यमुचितं जगज्जीवेश्वरभेदहेतोर्मायायाएकत्वान्नयोर्जगतो वैलक्षण्यमनुचितमित्याशंक्याअनजन्ययोर्देहमनसोर्यथावैलक्षण्यं तद्वदित्याह ॥ अन्नजन्यइति ॥ भवतु काचादिवत् स्वच्छत्वकु चित्वं तु कुतइत्याशंक्यानुभवादित्याह ॥ चिद्रूपमिति ॥ चित्वेन प्रकाशन मपि मायिकयोरनुपपन्नमित्याशंक्य तत्स्यादुर्घटकारित्वादुपपन्नमित्याह ॥ सर्वेति ॥ उक्तमर्थं कैमुतिकन्यायेन दर्शयति ॥ अस्मन्निद्रेति ॥ ईश्वरस्यापि मायिकत्वे तत्स्यजी

अन्नजन्यं मनो देहात्स्वच्छं यद्वत्तथेव तौ ॥ मायिकावपि सर्वस्मादन्यस्मात्स्वच्छतां गतौ ॥ ६३ ॥ चिद्रूपत्वं च संभाव्यं चित्वेनैव प्रकाशनात् ॥ सर्वकल्पनशक्ताया मायाया दुष्करं न हि ॥ ६४ ॥ अस्मन्निद्रापि जीवेशौ चेतनौ स्वप्नगौ सृजेत् ॥ महामाया सृजत्येतदित्याश्चर्यं किमत्र ते ॥ ६५ ॥ सर्वज्ञत्वादिकं चेशे कल्पयित्वा प्रदर्शयेत् ॥ धर्मिणं कल्पयेद्यास्याः को भारो धर्मकल्पने ॥ ६६ ॥ कूटस्थेप्यतिशंका स्यादिति चेन्मातिशंक्यताम् ॥ कूटस्थमायिकत्वे तु प्रमाणं न हि विद्यते ॥ ६७ ॥ वस्तुत्वं घोषयन्त्यस्य वेदान्ताः सकला अपि ॥ सपत्नरूपं वस्त्वन्यन्न सहन्ते त्र किंचन ॥ ६८ ॥ एवं दर्सर्वज्ञत्वादिकं स्यादित्याशंक्य सर्वज्ञत्वादिकमपि मायैव क ल्पयिष्यतीत्याह ॥ सर्वज्ञत्वादिकमिति ॥ तत्रोपपत्तिमाह ॥ धर्मिणमिति ॥ ननु जीवेशयोरिव कूटस्थस्यापि मायिकत्वं
ति प्रसज्येतेत्याशंक्य ॥ कूटस्थेपीति ॥ प्रमाणाभावान्मैवमिति परिहरति ॥ मातिशंक्यतामिति ॥ कूटस्थस्या वास्तवत्वेपि प्रमाणं नोपलभ्यतेइत्याशंक्य श्रुतयः सर्वा अपि प्रमाणमित्याह ॥ वस्तुत्वमिति ॥ अत्र कूटस्थस्य पारमार्थिकत्वे प्रति

पक्षभूतमन्यद्वस्तु किंचन न सहन्ते तदर्थः ॥ ६६ ॥

ननु कूटस्थस्य जीवेशयोश्च वास्तवत्वावास्तवत्वसाधने श्रुतय एव पठ्यन्ते न तर्कैः किंचिदपि साध्यते इत्याशंक्य मुमुक्षूणां श्रुत्यर्थविशदीकरणाय प्रवृत्तत्वान्न तर्कोपन्यास इत्याह ॥ श्रुत्यर्थमिति ॥ ६७ ॥ ततः किमित्यत आह ॥ तस्मादिति ॥ मुमुक्षूणां श्रुत्यर्थः कीदृशोनुसंधेय इत्यत आह ॥ श्रुतावित्ति ॥ श्रुतिषु जीवेशयोर्मायिकत्वमीक्षणादिप्रवेशान्तायाः सृष्टेरीश्वरकर्तृत्वं जाग्रत्स्वप्नसुषुप्तिबंधमोक्षलक्षणस्य संसारस्य जीवकर्तृत्वं कूटस्थस्यासंगत्वादिकं प्रतिजन्मादि

श्रुत्यर्थं विशदीकुर्मो न तर्कान्वच्मि किंचन ॥ तेन तार्किकशंकानामत्र कोवसरो वद ॥ ६७ ॥ तस्मात्कुतर्कं संत्यज्य मुमुक्षुः श्रुतिमाश्रयेत् ॥ श्रुतौ तु माया जीवेशौ करोतीति प्रदर्शितं ॥ ६८ ॥ ईक्षणादिप्रवेशान्ता सृष्टिरीशकृता भवेत् ॥ जाग्रदादिविमोक्षान्तः संसारो जीवकर्तृकः ॥ ६९ ॥ असंग एव कूटस्थः सर्वदा नास्य कश्चन ॥ भवत्यतिशयस्तेन मनस्येव विचार्यतां ॥ ७० ॥ न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ॥ न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ७१ ॥ अवाङ्मनसगम्यं तं श्रुतिर्बोधयितुं सदा ॥ जीवमीशं जगद्वापि समाश्रित्य प्रबोधयेत् ॥ ७२ ॥

लक्षणस्य व्यवहारजातस्यासत्यत्वं च प्रतिपादितमतो मुमुक्षुरिममर्थं सदा विचारयेदित्यभिप्रायः ॥ ७० ॥ कूटस्थस्य जन्माद्यतिशयाभावः कुतोवगम्यत इत्याशंक्य श्रुतिवाक्यादित्यभिप्रेत्य तद्वाक्यं पठति ॥ न निरोध इति ॥ ७१ ॥ ननु तर्हि श्रुतिषु तत्र जीवेश्वरप्रतिपादनं किमर्थमित्याशंक्याऽवाङ्मनसगोचरस्यात्मनोवबोधनायेत्याह ॥ अवाङ्मनसे[illegible]ति ॥ ७२ ॥ ८ ॥ ८ ॥ ८ ॥

श्रुतिबोध्यत्वे   - पुस्तष

ननु तत्त्वस्यैकरूपस्यैव श्रुतिषु विगाने कुतो दृश्यते इत्याशङ्क्य न तत्त्वे विगानमस्त्यपि तु तत्प्रकारबोधने तदपि बोध्यवैचित्त्य
वैषम्यानुसारेणेति सुरेश्वराचार्यैरुक्तमित्याह ॥ यथा यथेति ॥ ७२॥ श्रुत्यर्थस्यैकरूपत्वे तत्प्रतिपादकानामेव कुतो विप्र

यथा यथा भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि ॥ सा सैव प्रक्रियेह स्यात्साध्वी सा चानवस्थिता ॥ चार्यभा
षितं ॥ ७३॥ श्रुतितात्पर्यमखिलमबुध्वा भ्राम्यते जडः ॥ विवेकी त्वखिलं बुध्वा ति
ष्ठत्यानंदवारिधौ ॥ ७४॥ मायामेघो जगन्नीरं वर्षत्येष यथा तथा ॥ चिदाकाश
स्य नो हानिर्न वा लाभ इति स्थितिः ॥ ७५॥ इमं कूटस्थदीपं योऽनुसंधत्ते निरं
तरं ॥ स्वयं कूटस्थरूपेण दीप्यते सो निरंतरं ॥ ७६॥ इति श्रीमत्परमहंसपरिव्रा
जकाचार्य श्रीभारतीतीर्थविद्यारण्यविरचितः कूटस्थदीपः समाप्तः ॥ ८॥

तिपत्तिरित्याशङ्क्य श्रुतितात्पर्यबोधशून्यानामेव विप्रतिपत्तिर्न तु तद्विदामित्याह ॥ श्रुतितात्पर्यमिति ॥ ७४॥ तर्हि
विवेकिनो निश्चयः कीदृश इत्याकांक्षायामाह ॥ मायामेघ इति ॥ ७५॥ ग्रंथाभ्यासफलमाह ॥ इममिति ॥ ७६॥ इति श्री
कूटस्थदीपव्याख्या समाप्ता

॥ शके १७८२॥ आषाढवद्य ५ रोज शनिवार

॥श्रीगणेशायनमः॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ क्रियते ध्यानदीपस्य व्याख्या संक्षेपतो मया॥१॥ इह
तावद्वेदांतशास्त्रे नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसंपन्नस्य सम्यक्श्रवणमनननिदिध्यासनानुष्ठानव
तस्तत्त्वंपदार्थविवेचनपूर्वकं महावाक्यार्थापरोक्षज्ञानेन ब्रह्मभावलक्षणो मोक्षो भवतीति प्रतिपादितं॥ तत्र श्रुतोपनि
षत्के स्वबुद्धिमांद्यादिना केनचिन्निमित्तविशेषेण वाक्यार्थविषयापरोक्षप्रमित्यनुत्पत्तौ सत्यां तदुत्पादनद्वारा मोक्षफलको
पासनानि दिदर्शयिषुरादौ तावत्संवादिदृष्टांतं ब्रह्मतत्त्वोपासनयापि मोक्षो भवतीति प्रतिजानीते॥ संवादीति॥ यथा

॥श्री॥ संवादिभ्रमवद्ब्रह्मतत्त्वोपास्त्यापि मुच्यते॥ उत्तरे तापनीयेऽतः श्रुतोपास्तिरनेकधा॥१॥ मणिप्रदी
पप्रभयोर्मणिबुद्ध्याभिधावतोः॥ मिथ्याज्ञानाविशेषेपि विशेषोऽर्थक्रियांप्रति॥२॥

संवादिभ्रमेण प्रवृत्तस्याभिप्रेतार्थलाभो भवति॥ एवं ब्रह्मतत्त्वोपासनं(यौ)पि अभिलषितो ब्रह्मभावलक्षणो मोक्षो भ
वतीत्यर्थः॥ तत्र किं प्रमाणमित्यत आह॥ उत्तर इति॥ यत उपासनयापि मोक्षोऽस्ति अतस्तापनीयोपनि[illegible]ष
द[illegible]नेकप्रकारेण ब्रह्मोपासना श्रुतोक्तेत्यर्थः॥१॥ संवादिभ्रमवदित्युक्तदृष्टांतं प्रपंचयितुं संवादिभ्रमप्रति
पादकं वार्तिकं पठति॥ मणिप्रदीपेति॥ मणिश्च प्रदीपश्च मणिप्रदीपौ तयोः प्रभे तयोरिति विग्रहः॥ मणिप्रभायां
दीपप्रभायां च या मणिबुद्धिः सा मिथ्याज्ञानमेव अतस्मिंस्तद्बुद्धित्वात् तथापि मणिप्रभायां मणिबुद्ध्याभिधावतः पुरु
षस्य मणिलाभो भवति इतरस्य तु स नास्तीत्यर्थक्रियायां वैषम्यमित्यर्थः॥२॥

मस्ती मणिप्रदीपप्रभे

129

॥८व्या०॥
॥१॥

वार्तिकं व्याचष्टे ॥ दीपप्रभेत्यादिना ॥ कस्मिंश्चिन्मंदिरे ऽपवरकस्यांतर्दीपस्तिष्ठति तस्य प्रभा बहिर्द्वारप्रदेशे [illegible] रत्नमिव वर्तुलोपलभ्यते तथान्यस्मिन्मंदिरे ऽपवरकस्यांतः स्थितस्य रत्नस्य प्रभा बहिर्द्वारप्रदेशे दीपप्रभेव रत्नसमानोपलभ्यते । तथाविधं प्रभाद्वयं दूरतो दृष्ट्वा ऽयं मणिरयं मणिरिति बुद्ध्या द्वौ पुरुषावभिधावनं कुरुतः तत्र द्वयोरपि प्रभाविषयज्ञायमानं मणिज्ञानं भ्रांतमेव तथापि दीपप्रभायां मणिबुद्धिं कृत्वा धावता पुरुषेण मणिर्न लभ्यते मणिप्रभायां मणि

दीपोपवरकस्यांतर्वर्तिते तत्प्रभा वर्तते ॥ दृश्यते द्वार्ये थान्यत्र तद्वद्दृष्टा मणेः प्रभा ॥ दूरे प्रभाद्वयं दृष्ट्वा
मणिबुद्ध्याभिधावतोः ॥ प्रभायां मणिबुद्धिस्तु मिथ्याज्ञानं द्वयोरपि ॥४॥ न लभ्यते मणिर्दीपप्रभां प्र
त्यभिधावता ॥ प्रभायां धावतावश्यं लभ्येतैव मणिर्मणेः ॥५॥ दीपप्रभामणिभ्रांतिर्विसंवादिभ्रमः स्मृ
तः ॥ मणिप्रभामणिभ्रांतिः संवादिभ्रम उच्यते ॥६॥ बाष्पधूमतया बुद्ध्वा तत्राग्न्यनुमानतः ॥ वह्नि
र्यदृच्छया लब्धः स संवादिभ्रमो मतः ॥७॥

बुद्ध्या धावता मणिर्लभ्यते एव ॥५॥ भवत्वेवं वार्तिकार्थः प्रकृते किमायातमित्यत आह ॥ दीपप्रभेति ॥ या दीपप्रभायां मणिभ्रांतिरस्ति सा विसंवादिभ्रम इति स्मृतो विद्वद्भिः सा मणिलाभलक्षणार्थक्रियारहितत्वात् मणिप्रभायां मणिबुद्धिस्तु मणिलाभलक्षणार्थक्रियावत्त्वात् संवादिभ्रम इत्युच्यते इत्यर्थः ॥६॥ एवं प्रत्यक्षविषये संवादिभ्रमं दर्शयित्वा ऽनुमानविषयेऽपि तं दर्शयति ॥ बाष्पमिति ॥ केचिद्देशे स्थितं बाष्पं धूमत्वेन निश्चित्य तन्मूलप्रदेशे ऽस्य प्रदेशोऽग्निमान् धूमवत्त्वादित्यनुमाय प्रवृत्तेन पुरुषेण दैवगत्या यद्यग्निस्तत्रोपलभ्यते

[illegible] ॥७॥ वि

तथाचैवमादि ४

आगमविषये पितृदर्शयति ॥ गोदावरीति ॥ गोदावर्युदकस्यापि विशुद्धिहेतुत्वमागमसिद्धमतस्तत्प्रोक्षणादपि शुद्धि
रस्येवाधापि गोदावर्युदके यागे गोदके शुद्धिः सा भ्रान्तिरेव ॥ ८ ॥ उदाहरणान्तरमाह । ज्वरेणेति ॥ ज्वरेण सन्नि
पातं प्राप्तः पुरुषइदं नारायणस्मरणमस्वर्गसाधनमिति ज्ञानमन्तरेणापि सन्निपातभ्रमवशात्साधारण
पुरुषवन्नारायणं स्मरन्मृतः स्वर्गमाप्नोत्येव ॥ हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ॥ आकृष्य पुत्रमघवान्यद
जामिलोपि नारायणेति म्रियमाणइयाय मुक्तिमित्यादि पुराणवचनेभ्यः पुत्रेपि नारायण नाम्नः पुत्रनामत्व

गोदावर्युदकं गंगोदकमत्वा विशुद्धये ॥ संप्रोक्ष्य शुद्धिमाप्नोति स संवादिभ्रमः ॥ ज्वरेणाप्तः सन्निपातभ्रां
त्या नारायणं स्मरन् ॥ मृतः स्वर्गमवाप्नोति स संवादिभ्रमः ॥ प्रत्यक्षस्यानुमानस्य तथाशास्त्रस्य गोच
रे ॥ उक्तन्यायेन संवादिभ्रमाः संति सहस्रशः ॥ १० ॥ अन्यथा मृत्तिकादारुशिलाः स्युर्देवताः कथं ॥ अ

दाहरणे

ग्नित्वादिधियोपास्याः कथं वा योषिदादयः ॥ ११ ॥ सानं भ्रान्तिरेव ॥ ९ ॥ एवं त्रिविधसंवादिभ्रमोपसिद्ध
मर्थमाह । प्रत्यक्षस्येति ॥ १० ॥ विपक्षे बाधदर्शनेनोक्तमर्थं द्रढयति ॥ अन्यथेति । अन्यथा संवादिभ्रमाभावे मृदा
दयः फलसिद्धये देवतात्वेन न पूज्याः स्वतो देवतात्वाभावादित्यर्थः ॥ बाधकान्तरमाह । अग्नित्वादीति । पंचाग्नि
विद्यायां योषा वाव गौतमाग्निः पुरुषो वाव गौतमाग्निः पृथिवी वाव गौतमाग्निः पर्जन्यो वाव गौतमाग्नि
रसौ वाव लोको गौतमाग्निरित्यादिवाक्यैर्योषित्पुरुषपृथिवीपर्जन्यद्युलोकानामग्नित्वेनोपासनं ब्रह्मलोक

भवेयुः २

वालिफले भेवदित्यर्थः ॥ आदिदृष्ट्येन मनो ब्रह्मेत्युपासी

[illegible] ॥१७॥ ८०

॥ध्या०॥

॥२॥

इत्सानीं बहुभिर्ग्रंथैरुपपादितं संवादिभ्रमं बुद्धिसौकर्याय संक्षिप्य दर्शयति॥ अन्यथेति॥ विहिताद् विहिताद्वायस्मा
द्यथावस्तु विज्ञानाद्विपरीतज्ञानाद् ईप्सितमभिलषितं फलं काकतालीयतो दैवगत्या लभ्यते सोयं संवादिभ्रम इत्य
र्थः॥११॥ ननु ब्रह्मोपासनस्यायथावस्तुविषयस्य कथं सम्यक् ज्ञानसाध्यमुक्तिफलप्रदत्वमित्याशंक्य संवादि
भ्रमवदेवेत्याह॥ स्वयमिति॥१२॥ ननु ब्रह्मतत्त्वज्ञानोपासनं क्रियते ज्ञात्वा वा अज्ञात्वा वा आद्ये उपासनावैयर्थ्यं मोक्षसाधन
स्य ज्ञानस्यैव विद्यमानत्वात्॥ द्वितीये विषयापरिज्ञानादुपासनमेव न घटत इत्याशंक्याह॥ वेदांतेभ्य इति॥ अ

न्यथा वस्तुविज्ञानात्फलं लभ्यत ईप्सितं॥ काकतालीयतः सोयं संवादिभ्रम उच्यते॥११॥ स्वयं भ्रमो
पि संवादी यथा सम्यक्फलप्रदः॥ ब्रह्मतत्त्वोपासनापि तथा मुक्तिफलप्रदा॥१२॥ वेदांतेभ्यो ब्रह्मतत्त्व
मखंडैकरसात्मकं॥ परोक्षमवगम्यैतदहमस्मीत्युपासते॥१४॥ प्रत्यग्व्यक्तिमनुल्लिख्य शास्त्राद्वि
ष्णवादिमूर्तिवत्॥ अस्ति ब्रह्मेति सामान्यज्ञानमत्र परोक्षधीः॥१५॥ यमभिप्रायः॥ ब्रह्मात्मैकत्वापरो

क्षज्ञानस्य मोक्षसाधनस्यानुत्पन्नत्वान्नोपासनावैयर्थ्यं॥ शास्त्रात्परोक्षतयावगताद्ब्रह्मण उपासनाविषयत्वमि
परोक्ष ति॥१४॥ उपास्य ब्रह्मतत्त्वगोचरस्य ज्ञानस्य किंरूपमित्याकांक्षायामाह॥ प्रत्यगिति॥ प्रत्यग्व्यक्तिं बुध्यादिसा
क्षिणमानंदात्मानमनुल्लिख्याविषयीकृत्य शास्त्रात्सत्यज्ञानादिवाक्यजाताद्ब्रह्मास्तीत्येवं सामान्याकारेण
जायमाने ज्ञानमत्रास्यामुपासनायां परोक्षधीः परोक्षज्ञानं विवक्षितमित्यर्थः॥ तत्र दृष्टांतः॥ विष्णवादीति

१९५५

ननु शास्त्रेण विष्ण्वादिमूर्तेश्चतुर्भुजत्वादिविशेषप्रतीतिरूपज्ञानस्यापि कुतः परोक्षत्वमित्याशंक्याह। चतुर्भुजादीति। शा-
स्त्रेण चतुर्भुजत्वादिविशेषप्रतीतावपि चक्षुरादिभिर्विष्ण्वादिमूर्तिमविषयीकुर्वन्पुरुषः परोक्षज्ञान्येवातस्तत्रोपपत्ति-
माह। नतद्दति। तदा उपासनाकाले विष्णुमुपास्यं नेक्षते नेन्द्रियैर्विषयीकरोतीत्यर्थः॥१६॥ ननु विष्ण्वादिगोचर-
स्य ज्ञानस्य व्यक्त्युल्लेखित्वाभावाद्भ्रमत्वमित्याशंक्य प्रमाणेन जनितत्वान्न भ्रमत्वमित्याह। परोक्षत्वेति। परोक्ष-
ज्ञानत्वं भ्रान्तिज्ञानत्वे कारणं न भवति किं तु विषयासत्यत्वमिह तु प्रमाणभूतेन शास्त्रेणैव यथार्थभूताया वि-

चतुर्भुजाद्यवगतावपि मूर्तिमनुल्लिखन्॥ अक्षैः परोक्षज्ञान्येव न तदा विष्णुमीक्षते॥१६॥ परोक्षत्वाप-
राधेन भवेन्नातत्त्ववेदनं॥ प्रमाणेनैव शास्त्रेण सत्यमूर्तेर्विभासनात्॥१७॥ सच्चिदानन्दरूपस्य शास्त्रा-
ज्ज्ञानेप्यनुल्लिखन्॥ प्रत्यंचं साक्षिणं तत्तु ब्रह्म साक्षान्न वीक्षते॥१८॥ शास्त्रोक्तेनैव मार्गेण सच्चिदा-
नंदनिर्णयात्॥ परोक्षमपि तज्ज्ञानं तत्त्वज्ञानं न तु भ्रमः॥१९॥ ष्ण्वादिमूर्तेरवभासनान्न भ्रमत्वमित्यर्थः॥१७॥

ननु सच्चिदानंदव्यक्त्युल्लेखिनो ब्रह्मतत्त्वज्ञानस्य शास्त्रजन्यस्यापि कुतः परोक्षतेत्याशंक्यापरोक्षत्वप्रयोजकप्रत्यक्त्वो-
ल्लेखाभावादित्याह। सच्चिदिति। सत्यं ज्ञानमनन्तं ब्रह्म। नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरंजनः सद्धीदं सर्वं सत्सदि-
ति चिद्धीदं सर्वं काशते काशतइत्यादिशास्त्रात्सच्चिदानंदरूपस्य ब्रह्मणो भानेपि प्रत्यंचं साक्षिणमनुल्लिखंस्तत्त-
स्य ब्रह्मणः प्रत्यगात्मरूपत्वमजानानस्तद्ब्रह्म साक्षान्नैव वीक्षते नैव पश्यति॥१८॥ कथं तर्हि तथाविधब्रह्म-
गोचरस्य ज्ञानस्य तत्त्वज्ञानत्वमित्याशंक्यागमप्रमाणजन्यत्वादित्याह। शास्त्रेति। तज्ज्ञानं परोक्षमपि शास्त्रो-

133

॥ध्या०॥

॥३॥

ननु सत्यज्ञानादिवाक्यैर्ब्रह्मलक्षणः सच्चिदानंदरूपत्वमिव तत्त्वमस्यादिवाक्यैः प्रत्यग्रूपत्वमपि तस्य बोध्यत एवातः
शास्त्रजन्यस्यापि ज्ञानस्य प्रत्यग्व्यक्त्युल्लेखित्वादपरोक्षत्वमेवेत्याशंक्याह॥ ब्रह्मेति॥ यद्यपि वेदांतेषु महावाक्यै
ब्रह्म प्रत्यगात्मत्वेनैवोपदिष्टं तथाप्येतत्प्रत्यग्रूपत्वमन्वयव्यतिरेकाभ्यां त्वंपदार्थविवेकशून्यस्य दुर्बोधं बोद्धुमशक्
यमतः केवलाद्वाक्याज्ञापरोक्षज्ञानमुत्पद्यत इत्यर्थः॥१०॥ ननु सम्यग्ज्ञानस्य प्रमाणवस्तुपरतंत्रत्वात्प्रमाण
स्य च तत्त्वमस्यादिवाक्यरूपस्य सद्भावाद्वस्तुनश्च ब्रह्मात्मैक्यलक्षणस्य विद्यमानत्वात्कुतो विचारमंतरेणादु

ब्रह्मयद्यपि शास्त्रेषु प्रत्यक्त्वेनैव वर्णितं॥ महावाक्यैस्तथाप्येतद्दुर्बोधमविचारिणः॥११॥ देहाद्यात्म
त्वविभ्रांतौ जाग्रत्यां न हठात्पुमान्॥ ब्रह्मात्मत्वेन विज्ञातुं क्षमते मंदधीस्ततः॥१२॥ ब्रह्ममात्रं सुविज्ञे
यं श्रद्धालोः शास्त्रदर्शिनः॥ अपरोक्षाद्वैतबुद्धिः परोक्षाद्वैतबुद्ध्यनुत्॥१३॥ अपरोक्षशिलाबुद्धिर्न परो
क्षेशनुत्तानुदेत्॥ प्रतिमादिषु विष्णुत्वे को वा विप्रतिपद्यते॥१४॥ बोधत्वमित्याशंक्याह॥ देहादीति॥ ब्रह्मात्मै

कत्वापरोक्षज्ञानविरोधिनो देहेंद्रियादिष्वात्मभ्रमस्य विचारं विना सद्भावात्तन्निवृत्तये विचारोऽपेक्ष्यत इत्य
र्थः॥ ननु तर्हि देहेंद्रियादिगोचरस्याद्वैतभ्रमस्य सद्भावाद्द्वितीयब्रह्मगोचरं परोक्षज्ञानमपि नोदेयादित्याशं
क्यापरोक्षाद्वैतभ्रमस्य परोक्षाद्वैतज्ञानाविरोधित्वात्सद्भावतः पुंसः शास्त्रात्परोक्षज्ञानमुत्पद्यत एवेत्याह॥ ब्रह्म
मात्रमिति॥ अपरोक्षाद्वैतबुद्धिर्यतः परोक्षाद्वैतबुद्ध्यनुदत्तो ब्रह्ममात्रं सुविज्ञेयमिति योजना॥ अपरोक्षभ्रमस्य

केचनविप्रतिपद्यमानाउपलभ्यंतइत्याशंक्याह॥ अश्रद्धालोरिति॥ कुतइत्यतआह॥ अश्रद्धालोरिति॥ सर्वेषुवेदोक्तानुष्ठाने
षुश्रद्धालोरेवश्रद्धावतएवाधिकारादित्यर्थः॥२४॥ एतावतापरोक्षज्ञानेकिमायातमित्यतआह॥ सकृदिति॥ उक्तमर्थं
लोकानुभवेनद्रढयति॥ विष्णुमूर्तीति॥२५॥ ननुतर्हिकुतः शास्त्रेषुविचाराः क्रियंतइत्याशंक्यानुष्ठेययोः कर्मोपास
नयोः संदेहसंभवात्तन्निर्णयायविचाराः क्रियंतइत्याह॥ कर्मोपास्तीति॥ संदेहसंभवमेवोपपादयति॥ बहुशाखे

अश्रद्धालोरविश्वासोनोदाहरणमर्हति॥ श्रद्धालोरेवसर्वेषुवैदिकेष्वधिकारता॥२४॥ सकृदाप्तोपदेशेन
परोक्षज्ञानमुद्भवेत्॥ विष्णुमूर्त्युपदेशोहिनमीमांसामपेक्षते॥२५॥ कर्मोपास्ती विचार्येतेअनुष्ठेयाविनि
र्णयात्॥ बहुशाखाविप्रकीर्णंनिर्णेतुंकः प्रभुर्नरः॥२६॥ निर्णीतोर्थः कल्पसूत्रैर्ग्रथितस्तावतास्तिकः॥
विचारमंतरेणापिशक्तोनुष्ठातुमंजसा॥२७॥ उपास्तीनामनुष्ठानमार्षग्रंथेषुवर्णितं॥ विचाराक्षमम
नि र्त्याश्चतच्छ्रुत्वोपासतेगुरोः॥२८॥ वेदवाक्यानिनिर्णेतुमिच्छन्मीमांसतांजनः॥ आप्तोपदेशमात्रेणह्यनुष्ठानं॥२९॥

ति॥ अनेकासुशाखासुततत्रचोदितंकर्मउपासनंवाएकत्रसमाहृत्यनिर्णेतुमस्मदादिर्नरः कः प्रभुः समर्थोनकोपी
त्यर्थः॥ ननुतर्ह्यनुष्ठेयत्वमेवकर्मोपासनयोः प्राप्तमित्याशंक्याह॥ निर्णीतइति॥ जैमिन्यादिभिः पूर्वाचार्यैर्निश्चितोर्थः
अनुष्ठानप्रकारः कल्पसूत्रैः संग्रथितस्तेनैवतेषुविश्वासवानास्तिकोविचारेविनापिकर्मसम्यगनुष्ठातुंशक्तोस्त्येवाननु
तत्रोपासनाविचाराभावात्तदनुष्ठानंनसंभवेदित्याशंक्याह॥ उपास्तीनामिति॥ आर्षग्रंथेषुप्रसववत्रिष्ठादिकल्पे
षूपासनाप्रकारोवर्णितः॥ ततोविचारासमर्थामनुष्याः कल्पसूत्रतदुपासनंगुरुमुखादवगत्यानुतिष्ठंतीत्यर्थः॥२८

॥५१॥०
॥५४॥

ननु ब्रह्मोपासनवद्ब्रह्मसाक्षात्कारस्याप्युपदेशमात्रोदय सिद्धिः किं तस्यादित्याशंक्याह ॥ ब्रह्मेति ॥ आप्तोपदेशमात्रेणोपासना
नुष्ठानोपयोगि परोक्षज्ञानमुत्पाद्यते अपरोक्षज्ञानं तु विचारमन्तरेण न जायते इत्युक्तं ॥ तत्र कारणमुदाहरति परोक्षेति ॥ यतो
ऽविश्वास एव परोक्षज्ञानं प्रतिबध्नाति ना विचारेण तन्निवृत्तौ सत्यामुपदेशादेव परोक्षज्ञानं जन्मोपपद्यते ऽविचारप्रति
बंधस्यापरोक्षज्ञानस्य तु विचारद्वारा तन्निवृत्तिमन्तरेणोत्पत्तिर्न संभवत्यतो विचारः कर्तव्य इति भावः ॥ नत्वपि चारे स्ते पि

ब्रह्मसाक्षात्कृतिस्त्वेवं विचारेण विना नृणां ॥ आप्तोपदेशमात्रेण न संभवति कुत्रचित् ॥ २० ॥ परोक्ष
ज्ञानमश्रद्धा प्रतिबध्नाति नेतरः ॥ अविचारोपरोक्षस्य ज्ञानस्य प्रतिबंधकः ॥ २१ ॥ विचार्याप्यपरोक्षेण
ब्रह्मज्ञानं न वेत्ति चेत् ॥ आपरोक्ष्यावसानत्वाद्भूयो भूयो विचारयेत् ॥ २२ ॥ विचारयन्नामरणं नैवात्मा
नं लभेत चेत् ॥ जन्मान्तरे लभेतैव प्रतिबन्धक्षये सति ॥ २३ ॥ इह वामुत्र वा विद्येत्येवं सूत्रकृतोदितं ॥ शृ
ण्वंतोप्यत्र बहवो यन्न विद्युरिति श्रुतेः ॥ २४ ॥ यद्यपरोक्षज्ञानं न जायते तत् किं तदा कर्तव्यमित्यत आह ॥ विचा

र्यापीति ॥ तत्त्वंपदार्थौ सम्यग्विचार्यापि वाक्यार्थब्रह्मा[illegible]त्मैकत्वमपरोक्षतया न जानातीति चेत्तदापि पुनः पु
नर्विचार एव कर्तव्यः ॥ अपरोक्षज्ञानहेतोरन्यस्याभावादिति भावः ॥ ननु भूयो विचारेणापि इहसाक्षात्कारानुदये
सति विचारो व्यर्थः स्यादित्याशंक्याह ॥ विचारयन्निति ॥ नन्विदं कुतोवगतमित्याशंक्याह ॥ ब्रह्मसूत्रकृता व्यासेने
हिकमप्यप्रस्तुतप्रतिबंधे तद्दर्शनादित्यस्मिन्सूत्रेऽभिधानादित्याह ॥ इहेति ॥ सति प्रतिबंधे ज्ञानानुत्पत्तौ [illegible]
इह जन्मनि

भूयो

इहजन्मनि श्रवणादिकृतेर्जन्मान्तरे वा परोक्षज्ञानं भवति। यत्रापि गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वेत्यादि

कां श्रुतिमर्थतः पठति॥ गर्भ एवेति॥ इहजन्मनि अनुसन्धानस्य ज्ञानस्य कालान्तरीयत्वे दृष्टान्तमाह॥ यद्वदिति॥ ३५॥

दृष्टान्तं विवृणोति॥ बहुवारमिति॥ आदिग्रहणेन परिगृहीतानि दृष्टान्तान्तराण्याह॥ कालेनेति॥ दार्ष्टान्तिके योजयति॥ तद्वदिति

बहुवारं विचारितेपि तत्त्वे प्रतिबन्धबलात् साक्षात्कारो न जायत इत्येतद्दार्ष्टान्तिकेकारे पि निरूपितमित्याह॥ पुनः पुनरिति

गर्भ एव शयानः सन्वामदेवो बुबुधे वान्॥ पूर्वाभ्यस्तविचारेण यद्वदध्ययनादिषु॥ ३६॥ बहुवारमधीतेपि य
दा नायाति त्वेकदा पुनः॥ दिनान्तरेनधीतेऽपि पूर्वाधीतं स्मरेत्पुमान्॥ ३७॥ कालेन परिपच्यन्ते कृषिगर्भादयो यथा
तद्वदात्मविचारोपि शनैः कालेन पच्यते॥ ३८॥ पुनः पुनर्विचारेपि त्रिविधप्रतिबन्धतः॥ न वेत्ति तत्त्वमित्येतद्
दार्ष्टिके सम्यगीरितं॥ ३९॥ कुतस्तत्त्वज्ञानमिति चेत्तद्बन्धपरिक्षयात्॥ असावपि च भूतो वा भावी वा वर्तते
थवा॥ ४०॥ अधीतवेदवेदार्थोप्यत एव न मुच्यते॥ हिरण्यनिधिदृष्टान्तादिदमेव हि दर्शितं॥ ४१॥

तान्येव वार्त्तिकान्युदाहरति॥ कुतस्तत्त्वज्ञानमित्यादिना॥ भरतस्य त्रिजन्मभिरित्यन्तेन॥ तत्र तावत्पूर्वमनुसन्धानस्य ज्ञानस्ये
दानीमुत्पत्तौ कारणं पृच्छति॥ कुत इति॥ उत्तरमाह॥ तद्धीति॥ बन्धः प्रतिबन्धस्तस्य परिक्षयादित्यर्थः॥ सोपि प्रतिबन्धो भूतो
भावी वर्तमानश्चेति त्रिविध इत्याह॥ असावपीति॥ भवत्वेवं त्रिविधः प्रतिबन्धस्ततः किमित्यत आह॥ अधीतेति॥ अत एव प्र
तिबन्धसद्भावादेवेत्यर्थः॥ सति प्रतिबन्धे ज्ञानं नोदेति॥ ■ येतद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो
न विंदेयुः एवमेवेमाः प्रजा अहरहर्ब्रह्मलोकं गच्छन्त्य एतं ब्रह्मलोकं न विंदन्ति अनृतेन हि प्रत्यूढा इत्यनया श्रुत्या प्रदर्शितमित्याह

॥ध्या०
॥५॥

नन्वतीतस्य प्रतिबंधकत्वं न दृष्टमित्याशंक्याह॥ अतीतेनेति॥ अयमर्थः॥ कश्चिद्यतिः पूर्वं गार्हस्थ्यदशायां कस्यांचिन्महिष्यां स्नेहं कृत्वा पश्चात् संन्यासानंतरं श्रवणप्रवृत्तोपि तेनैव स्नेहेन जनितात् प्रतिबंधात् तत्त्वं गुरुणोपदिष्टमपि न ज्ञातवानिति। एवंविधा लोके गाथा प्रगीयते न पुराणादिपठितेत्यर्थः॥ तर्हि तथाविधस्य तस्य कथं ज्ञानोत्पत्तिरित्यत आह॥ अनुसृत्येति॥ गुरुस्तस्य तत्त्वोपदेष्टा तदीयं महिषीस्नेहमनुसृत्य तस्यामेव महिष्यां तत्त्वं तत्त्वमसीत्यादि पार्थिवकं प्रसोक्तवान्॥ ततः सोपि महिषीस्नेहलक्षणप्रतिबंधकापगमेन गुरूपदिष्टं तत्त्वं यथावच्छास्त्रोक्तप्रकारेणैव ज्ञातवानित्यर्थः॥ एवमतीतं प्रतिबंधं प्रदर्श्य वर्त

अतीतेनापि महिषीस्नेहेन प्रतिबंधितः॥ भिक्षुस्तत्त्वं न वेदेति लोके गाथा प्रगीयते॥४१॥ अनुसृत्य गुरुः स्नेहं महिष्यां तत्त्वमुक्तवान्॥ ततो यथावद्वेदैष प्रतिबंधस्य संक्षयात्॥४२॥ प्रतिबंधो वर्तमानो विषयासक्तिलक्षणः॥ प्रज्ञामांद्यं कुतर्कश्च विपर्ययदुराग्रहः॥४३॥ शमाद्यैः श्रवणाद्यैश्च तत्र तत्रोचितैः क्षयं॥ नीतेस्मिन् प्रतिबंधेतः स्वस्य ब्रह्मत्वमश्नुते॥४४॥

मानं तद्दर्शयति॥ प्रतिबंध इति॥ वर्तमानप्रतिबंधश्चित्तस्य विषयासक्तिरूप एकः॥ प्रज्ञामांद्यं बुद्धेस्तैक्ष्ण्याभावः॥ कुतर्कश्च श्रुत्युक्तार्थविरुद्धतार्किकत्वेन श्रुत्यर्थस्यान्यथोपोहनं विपर्ययदुराग्रहः॥ विपर्यये आत्मनः कर्तृत्वादिधर्मयुक्तत्वज्ञानलक्षणे दुराग्रहो युक्तिरहितोभिनिवेशः॥ एतेषामन्यतमस्यापि सत्त्वे ज्ञानं नोदेतीत्यर्थः॥ अस्यापि प्रतिबंधस्य केन निवृत्तिरित्यत आह॥ शमाद्यैरिति॥ शमादयः शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वा आत्मन्येवात्मानं पश्येदिति श्रुत्युक्ताः॥ श्रवणादयः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्याभिहिताः॥ एतैः साधनैस्तत्र तत्र तस्य तस्य प्रतिबंधस्य निवर्तने उचितैर्योग्यैस्तस्मिंस्तस्मिन् प्रतिबंधे क्षयं नीते सति विनाशिते सति तः प्रतिबंधापगमादेव स्वस्य प्रत्यगात्मनो ब्रह्मत्वं प्राप्नोतीत्यर्थः॥४४॥ ७२॥

138

भोगा
मीति

इदानीं भा विप्रतिबंधं दर्शयति आगामिप्रतिबंधो जन्मांतर हेतुप्रारब्धशेषः इत्यर्थः ॥ तस्य च भोगमंतरेण निवृत्त्यभावा इत्यर्थः । भरतस्य त्रिजन्मभिः क्षी
तन्निवृत्तौ कालनियमो नास्तीत्याह ॥ एकेनेति ॥ सचैकेन जन्मना क्षीणो वामदेवस्येति शेषः । भरतस्य त्रिजन्मभिः क्षी
णइत्यनुषज्यते ॥ नन्वेकेन त्रिजन्मभिरिति नियतकालत्वे भवेनेवोच्यते इत्याशंक्याह ॥ योगेति ॥ योगभ्रष्टः तत्त्वसा
क्षात्कारपर्यंतं विचाररहित इत्यर्थः । तर्हि तत्त्वविचारो निष्फलः स्यादित्याशंक्याह । न विचारो पीति प्रतिबंधनिवृत्त्य
नंतरमेवापरोक्षज्ञान लक्षण फलसद्भावादिति भावः ॥ गीतायां प्रतिपादितमर्थं दर्शयति प्राप्य पुण्यकृतां लोकानि

आगामिप्रतिबंधश्च वामदेवे समीरितः ॥ एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिः ॥ ७५ ॥ योगभ्रष्टस्य
गीतायामतीतबहुजन्मनि ॥ प्रतिबंधक्षयः प्रोक्तो न विचारोऽप्यनर्थकः ॥ ७६ ॥ प्राप्य पुण्यकृतां लोकाना
त्मतत्त्वविचारतः ॥ शुचीनां श्रीमतां गेहे साभिलाषोऽभिजायते ॥ ७७ ॥ अथवा योगिनामेव कुले भवति
धीमतां ॥ निस्पृहो ब्रह्मतत्त्वस्य विचारात्तद्धि दुर्लभं ॥ ७८ ॥ सार्द्धं ततो याति परां गतिमित्येतेन प्राप्यति यो

गभ्रष्ट आत्मतत्त्वविचारबलादेव पुण्यकृतां पुण्यकारिणां लोकान् स्वर्गविशेषान् प्राप्य तत्र बहुकालं सुखमनुभूय
तद्भोगावसाने साभिलाषश्चेदस्मिन्लोके शुचीनां मातृतः पितृतश्च शुद्धानां श्रीमतां कुलेऽभिजायते । पक्षांतरमा
हाअथवेति । निस्पृहः स्वयमतिविरक्तश्चेत्तत्त्वविचारादेव धीमतामात्मतत्त्वनिश्चयवतां योगिनां चित्तैकाग्र

तथा

वतां कुले भवति जायते इत्यर्थः । पूर्वस्मात्पक्षात्कोऽतिशय इत्याह तद्धीति । हियस्मात्कारणात्तद्योगिकुले जन्म दुर्ल
विचार

॥ध्या०॥

॥६॥

तु त्तत

तस्य दुर्लभत्वमुपपादयति। तत्रेति। हि यस्मात्कारणात्तत्र तस्मिन्जन्मनि पौर्वदेहिकं पूर्वदेहभवं तं बुद्धिसंयोगं तत्त्व
विचारगोचरबुद्धिसंबंधं लभते प्राप्नोति न केवलं बुद्धिसंबंधमात्रलाभः किं तु ततः पूर्वस्मात्प्रयत्नाद्भूयो यतते च आधि
क्ययत्नं करोतीति तस्मादेतज्जन्म दुर्लभमित्यर्थः॥ भूयोऽभ्यासे कारणमाह। पूर्वेति। स योगभ्रष्टस्तेन पूर्वाभ्यासेनैवावशो
प्यस्वाधीनोऽपि ह्रियते तत्त्वाभावृष्यते। एवमनेकेषु जन्मसु कृतेन प्रयत्नेन संसिद्धस्तत्त्वज्ञानसंपन्नस्तस्मात्तत्त्वज्ञानात्प
रां गतिं मुक्तिं याति प्राप्नोतीत्यर्थः॥ आगामिप्रतिबंधान्तरं दर्शयति। ब्रह्मलोकेति। ब्रह्मलोकप्राप्तीच्छायां तत्कार्यो

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं॥ यतते च ततो भूयस्तस्मादेतद्धि दुर्लभं॥४९॥ पूर्वाभ्यासेन तेनैव ह्रिय
ते ह्यवशोऽपि सः॥ अनेकजन्मसंसिद्धस्ततो याति परां गतिं॥५०॥ ब्रह्मलोकाभिवांछायां सम्यक् संयोगिनि
रुध्यतां॥ विचारयेद्य आत्मानं न तु साक्षात्करोत्ययं॥५१॥ वेदांतविज्ञानसुनिश्चितार्था इति सूत्रात्तः
ब्रह्मलोके स कल्पांते ब्रह्मणा सह मुच्यते॥५२॥ केषांचित्स विचारोऽपि कर्मणा प्रतिबध्यते॥ श्रवणाया

संसारं तां निरुध्य य आत्मानं विचारयेत् तस्य साक्षात्कारो नैव जायते इत्यर्थः॥ न नु तर्हि तस्य कदापि मुक्तिर्न स्यादित्याशंक्याह॥
वेदांतेति। वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः। ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंते
सर्वे। ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यांते कृतात्मानः प्रविशंति परं पदं इत्यादिस्मृतिबलाद्ब्रह्मलोकमास्थाय नंतरं
तत्रैव साक्षात्कृत्य ब्रह्मणा सह मुक्तिर्भविष्यतीत्यर्थः। एवं तत्त्वविचारे क्रियमाणे प्रतिबंधवशाद्यत्र साक्षात्कारो न जायते इ

140

एतावता प्रतिबंधेन तत्त्वसाक्षात्कारस्तत्साधनभूतो विचारश्च न संभवतीत्यभिप्रायेणेदानीं विचारासमर्थेन पुरुषार्थि
थिना किं कर्तव्यमित्यपेक्षायां विचाराक्षममन्दोऽधिकृतश्रुतोपासते गुरोरितिय स्त्रागुप्रतिज्ञा तत्तदुपपादयति। अ
त्यंतेति। सामर्थ्यासंभवो नाम तत्त्वोपदेष्टुर्गुरोरभावाद्ग्रन्थस्योपदेशकालादेर्वा संभवस्तस्मादित्यर्थः॥ ननु निर्गु
णब्रह्मतत्त्वस्य गुणरहितत्वात्तदुपासनं न घटते इत्याशंक्योपासनस्य प्रत्ययावृत्तिरूपत्वात्सगुणब्रह्मणीव नि

अत्यंतबुद्धिमांद्याद्वा सामग्र्या वाप्यसंभवात्॥ यो विचारं न लभेत ब्रह्मोपासीत सो निशं॥ ५४॥ निर्गुणे ब्र
ह्मतत्त्वस्य न ह्युपास्तेरसंभवः॥ सगुणब्रह्मणीवात्र प्रत्ययावृत्तिसंभवात्॥ ५५॥ अवाङ्मनसगम्यं तत्
नोपास्यमिति चेत्तदा॥ अवाङ्मनसगम्यस्य वेदनं च न संभवेत्॥ ५६॥ वागाद्यगोचराकारमित्येवं यदि
वेत्त्यसौ॥ वागाद्यगोचराकारमित्युपासीत नो कुतः॥ ५७॥ सगुणत्वमुपास्यत्वाद्यदि वेद्यत्वतोऽपि तत्॥
वेद्यं चेल्लक्षणावृत्त्या लक्षणेन समुपास्यताम्॥ ५८॥ गुणेऽपि तत्संभवतीत्याह। निर्गुणेति। ननु निर्गुणस्य ब्रह्मणो वाङ्म
नसगोचरस्वाभाव्यान्नोपास्यत्वमित्याशंक्य वेदनपक्षेऽप्ययं दोषः समान इत्याह। अवाङ्मनसेति। ननु ब्रह्म वाङ्मन
सगोचरमित्येवं जानीयादित्याशंक्य एवमेवोपासितुमपि शक्यमित्याह। वागादीति। ब्रह्मण उपास्यत्वे स
पि गुणत्वं प्रसज्येतेत्याशंक्य वेद्यत्वेऽपि सगुणं स्यादित्याह। सगुणत्वमिति। तत्सगुणत्वमित्यर्थः। ननु लक्षणावृ
त्त्याश्रयणान्न वेद्यत्वे सगुणत्वप्रसंग इत्याशंक्योपासनेऽपि तथैव क्रियतामित्याह। वेद्यं चेदिति॥ ५८॥०

॥ ध्या० ॥

॥ ७ ॥

य

ननु ब्रह्मण उपास्यत्वं श्रुत्या निषिध्यते इति शंकते ॥ ब्रह्मेति । यन्मनसा न मनुते येनाहुर्मनो मतं तदेव ब्रह्म त्वं विद्धि नेदं यदिद
मुपासते इति उपास्यस्य ब्रह्मत्वं निषेधतीत्यर्थः ॥ त्वं यद्वाङ्मनसगम्यं तदेव ब्रह्म विद्धि इदमिति यदुपासते पुरुषास्तन्न
विद्धीति योजना ॥ उपास्यत्ववद्वेद्यत्वस्यापि निषेधः समान इत्याह ॥ विदितादिति । अन्यदेव विदितादथो अविदिताद
धीति ब्रह्मणो वेद्यत्वमपि निवारयतीत्यर्थः ॥ विदितात् ज्ञातादित्यर्थः ॥ विदिताविदिताभ्यामन्यद्ब्रह्मेति श्रुतिः प्रति

ब्रह्म विद्धि तदेव त्वं नेदं यदिदमुपासते ॥ इति श्रुतेरुपास्यत्वं निषिद्धं ब्रह्मणो यदि ॥ ७९ ॥ विदितादन्यदेवे
ति श्रुतेर्वेद्यत्वमस्य न ॥ यथा श्रुत्यैव वेद्यत्वं तथा श्रुत्याप्युपास्यता ॥ ८० ॥ अवास्तवी वेद्यता चेदुपा
स्यत्वं तथा न किं ॥ वृत्तिव्याप्तिर्वेद्यता चेदुपास्यत्वेऽपि तत्समं ॥ ८१ ॥ कातेऽभक्तिरुपास्तौ चेत्कस्ते द्वेषस्त
दीरय ॥ मानाभावो न वाच्योऽस्यां बहुश्रुतिषु दर्शनात् ॥ ८२ ॥

पादयतीति चेत्तर्हि तथैव तज्ज्ञानीयादित्या
शंक्योपासनेऽपि तत्समानमित्याह ॥ यथेति ॥ ननु वेद्यत्वं ब्रह्मणो वास्तवं न भवतीत्याशंक्योपास्यत्वमपि तथेत्या
ह ॥ अवास्तवीति ॥ ननु वेदनपक्षे वृत्तेर्ब्रह्माकारत्वमस्ति नोपासने इत्याशंक्य शब्दबलात्तदाकारत्वमुभयत्र समा
नमित्याह ॥ वृत्तिव्याप्तिरिति ॥ युक्तिशून्य उपालंभस्त्वत्पक्षेऽपि समान इत्याह ॥ कातेभक्तिरिति ॥ ननु निर्गुणोपा
सने प्रमाणं नास्तीत्याशंक्यानेकासु श्रुतिषूपलभ्यमानत्वान्मैवमित्याह ॥ मानाभाव इति ॥ ८२ ॥ ७ ॥

बहुश्रुतिषु दर्शनादित्युक्तमर्थं विवृणोति ॥ उत्तरस्मिन्निति ॥ तापनीयोपनिषदि तावत् ॥ देवा ह वै प्रजापतिमब्रुवन्न
णोरणीयांसमिममात्मानमोंकारं नो व्याचक्ष्वेत्यादिना बहुधा निर्गुणोपासनमभिधीयते ॥ द्वितीयप्रश्ने प्रश्नोपनि
निषदि पंचमे यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीतेति ॥ कठे कठवल्ल्यां सर्वे वेदाय
त्पदमामनन्तीत्युपक्रम्य एतद्ध्येवाक्षरं ब्रह्म एतदालंबनं श्रेष्ठमित्यादिना तदालंबनमुच्यते ॥ माण्डूक्योपनिष

उत्तरस्मिंस्तापनीये द्वितीयप्रश्नेऽथ काठके ॥ माण्डूक्यादौ च सर्वत्र निर्गुणोपास्तिरीरिता ॥ ६३ ॥
अनुष्ठानप्रकारोऽस्याः पंचीकरण ईरितः ॥ ज्ञानसाधनमेतच्चेन्नेति केनात्र वारितम् ॥ ६४ ॥
नानुतिष्ठति कोऽप्येतदिति चेन्मानुतिष्ठतु ॥ पुरुषस्यापराधेन किमुपास्तिः प्रदुष्यति ॥ ६५ ॥

दिओमित्येतदक्षरमिदं सर्वमित्यादिना अवस्थात्रयातीततुर्योपासनमेवाभिधीयत इत्यर्थः ॥ आदिश
ब्देनेति श्रीयमंडूकादयो गृह्यन्ते ॥ ६३ ॥ ननु निर्गुणोपासनं कथमनुष्ठेयमित्यत आह ॥ अनुष्ठानेति ॥ ननु
तदुपासनं ज्ञानसाधनमेव न मुक्तिसाधनमित्याशंक्य ब्रह्मतत्त्वोपास्त्यापि मुच्यत इति वदतामस्माकमनु
कूलमेवेत्याह ॥ ज्ञानेति ॥ ननु सगुणोपासनमेव सर्वैरनुष्ठीयते न निर्गुणोपासनमित्याशंक्य तस्य प्र
माणसिद्धस्यापलापो न युक्त इत्याह ॥ नानुतिष्ठतीति ॥ ६५ ॥

॥ध्या०॥
॥८१॥

भावेना

प्रमाणसिद्धस्यानुष्ठानोपरिसाज्यत्वे दृष्टांतमाह॥ इतोपीति॥ अयमभिप्रायः॥ यथा सगुणोपासनेभ्यः कालांतर भाविफलेभ्योऽवश्यादिमारिमंत्रेभ्यो ऐहिकफलप्रदत्वमतिशयं बुध्वा मूढानां तन्मंत्रजपादौ प्रवृत्तावपि विवेकिभिः सगुणोपासनं न परित्यज्यते यथा वा नियमानुष्ठानापेक्षेभ्यस्तेभ्योपि मंत्रेभ्यः कृष्यादावतिशयं नियमनैरपेक्ष्यमत्वा मूढतराणां तत्र प्रवृत्तावपि न तन्मंत्रानुष्ठानं त्यज्यते। तथा सांसारिकफले स्तूनां निर्गुणोपासनानुष्ठानाभावेपि न मुमुक्षुभिर्निर्गुणोपासनं सज्यते इति॥ एवं प्रासंगिकं परिसमाप्य प्रकृतमनुसरति॥ तिष्ठंत्विति। सर्वे वे

इतोप्यतिशयं मत्वा मंत्रान्वश्यादिकारिणः॥ मूढा जपं तु तेभ्योपि मूढाः कृषिमुपासतां॥ ८५॥ तिष्ठंतु मूढाः प्रवृत्ता निर्गुणोपास्तिरीर्यते॥ विवेकात्सर्वशाखास्थान्गुणानत्रोपसंहरेत्॥ ८७॥ आनंदादेर्विधेयस्य गुणसंघस्य संहृतिः॥ आनंदादय इत्यस्मिन्सूत्रे व्यासेन वर्णितो॥ ८८॥ अस्थूलादेर्निषेध्यस्य गुणसंघस्य संहृतिः॥ तथा व्यासेन सूत्रेस्मिन्नुक्ताक्षरधियां त्विति॥ ८९॥ ८६ ॥

दांतप्रत्ययं चोदनाद्यविशेषादित्युक्तन्यायेन निर्गुणोपासनस्यैकत्वात्सर्वशाखासु श्रुतानुपास्यगुणानेकत्रोपसंहृत्योपासनं कर्तव्यमित्याह॥ विवेकादिति॥ ते न गुणा द्विप्रकारा विधेया निषेध्याश्चेति। तत्रानंदो ब्रह्म विज्ञानमानंदं ब्रह्म नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरंजनो विभुरद्वय आनंदः परः प्रत्यगेकरस इत्यादयो ये विधेयगुणास्तेषामुपसंहार आनंदादयः प्रधानस्येत्यस्मिन्नधिकरणेभिहित इत्याह॥ आनंदादेरिति॥ ये चास्थूलमनणव

ननु निर्गुणब्रह्मविद्यायां नगुणोपसंहार एव वक्ष्यते निर्गुणविद्यात्वविरोधादित्याशङ्क्य सूत्रकारेणैवमभिहितत्वेनो पसंहारस्यास्माभिरभिधीयमानत्वान्नास्मात्प्रतीदं चोद्यमुचितमित्याह ॥ निर्गुणेति ॥ हिरण्यश्मश्रुत्वादिगुणविशिष्टमूर्तीनामनभिधानादिदं निर्गुणोपासनमेवेति चेत्तर्हि न विरोध इत्याह ॥ हिरण्येति ॥ हिरण्यश्मश्रुसूर्यादिमूर्तीनां हिरण्ययानि श्मश्रूणि यस्यासौ हिरण्यश्मश्रुस्तथाविधः सूर्यो हिरण्यश्मश्रुसूर्यः स आदिर्येषां ते

निर्गुणब्रह्मतत्त्वस्य विद्यायां गुणसंहृतिः ॥ न युज्यते सुपालंभो व्यासं प्रत्येव मानतु ॥७०॥ हिरण्यश्मश्रुसूर्यादिमूर्तीनामनुदाहृतेः ॥ अविरुद्धं निर्गुणत्वमिति चेत्तुष्यतां त्वया ॥७१॥ गुणानां लक्षकत्वेन नतत्त्वं तः प्रवेशनं ॥ इति चेदस्त्वेवमेव ब्रह्मतत्त्वमुपास्यतां ॥७२॥ आनंदादिभिरस्थूलादिभिश्चात्मात्र लक्षितः ॥ अखंडैकरसः सोहमस्मीत्येवमुपासते ॥७३॥ बोधोपास्त्योर्विशेषः क इति चेदुच्यते शृणु ॥ वस्तुतंत्रो भवेद्बोधः कर्तृतंत्रमुपासनं ॥७४॥ हिरण्यश्मश्रुसूर्यादयस्तेषां मूर्तयो हिरण्यश्मश्रुसूर्यादयस्तासामिति विग्रहः ॥ नन्वानंदादीनामस्थूलादीनां च गुणानामुपास्यतत्त्वं तः प्रवेशाभावात्तद्गुणविशिष्टत्वेन कथमुपास्यत्वमित्याशङ्क्य तेषां तत्त्वांतः प्रवेशाभावेपि तेषां लक्षकत्वसंभवात्तैर्लक्षितं ब्रह्मोपास्यमित्याह ॥ गुणानामिति ॥ तथोपासनप्रकारमेव दर्शयति ॥ आनंदैरिति ॥ अत्र श्रुतिषु यो रखंडैकरस आत्मा आनंदादिभिरस्थूलादिभिश्च गुणैर्लक्षितः सोहमस्मीत्येवमुपासते मुमुक्षव इति शेषः ॥ नन्वेवं सति विद्योपासनयोः कुतो भेद

॥ध्या०॥
॥१॥

यं

वैलक्षण्यांतरम्सिद्ध्येबोधस्यवैलादिकंदर्शयति॥ विचारज्जायत इत्यादिनाश्लोकद्वयेन॥ विचाराद्वस्तुतत्त्वविचारो
द्बोधोजायते किंच विचारबलाज्जायमानं बोधमनिच्छाबोधो माभूदित्येवंरूपान निवर्तयेत्तन्न निवारयेत्॥ उत्पद्यमा
नश्च बोधः संसारे देहखिलस्यप्रपंचस्यसत्ताद्दृढत्तिनाशयति ताचनातेस्वत्तानोस्तिमात्रेण निरतिशयंसुखं
प्राप्नोतीत्यर्थः॥७४॥ उपासनायाश्च बोधाद्वैलक्षण्यांतरसिद्ध्येतद्दर्शयति॥ आसेति॥ आसस्यगुरोरूपदेशमुपा

विचारज्जायते बोधो निष्ठायेन निवर्तयेत्॥ स्वोसत्तिमात्रात्संसारे देहस्यखिलसत्यता॥७५॥ तावतातु
तवृत्तः स्यान्नित्यतृप्तिमुपागतः॥ जीवन्मुक्तिमनुप्राप्य प्रारब्धक्षयमीक्षते॥७६॥ आसोपदेशं विश्वस्य
श्रद्धालुरविचारयन्॥ चिंतयेत्प्रत्ययैरन्यैरनंतरितवृत्तिभिः॥७७॥ यावच्चिंत्यस्वरूपत्वाभिमानः स्वस्य
जायते॥ तावद्विचिंत्यपश्चाच्चतदेवामृतिधारयेत्॥७८॥ ब्रह्मचारी भिक्षमाणो युतः संसर्गविद्यया॥
संसर्गरूपतां चिन्ते धारयित्वाह्य भिक्षत॥७९॥
स्वस्वरूपप्रतिपादकवाक्यादिज्ञातं विश्वस्य विश्वासंभूत्वावि

व

चारयन्नुपास्यतत्त्वं प्रत्ययैरन्यैर्घटादिविषयैरनंतरितैरतरवृत्तिभिरव्यवहितवृत्तिभिश्चिंतयेदिति॥ कियंतं कालं चिंतये
दित्याशंक्याह॥ यावदिति॥ उपासकस्यतद्रूपत्वाभिमानमुदाहरणप्रदर्शनेन स्पष्टीकरोति॥ ब्रह्मचारीति॥ कश्चि
त्सवर्गस्वगुणविशिष्टप्राणोपासको भिक्षाहारार्थं मार्गस्याभिप्रतारिनामराज्ञः पुरतो महात्मन श्वतुरो देवए
कः॥ कः सो ज्ञागारभुवनस्यगोपा तं कापेयनाभिपश्यंति मर्त्याः अभिप्रतारिन्बहुधा संतमिति मंत्रेण स्वा

आमृत्तिधारणेनिमित्तंदर्शयन्ननिछायांननिवर्तयेदित्युक्तोद्वोधधर्मीद्वेलक्षण्यमाह॥पुरुषस्येति॥उपास्तिः पुरुषस्ये
पासकस्येच्छयाकर्तुमकर्तुमन्यथावाप्रकारांतरेणवाकर्तुंशक्या॥अतःपुरुषस्येच्छाधीनत्वादुपासनंसर्वदाकुर्यादि
त्यर्थः॥एवंसर्वदाचिंतनेनकिंभवतीत्याह॥वेदेति॥अप्रमत्तोवेदाध्यायीसदाध्ययनशीलःजपितासदाजपशी

पुरुषस्येच्छयाकर्तुमकर्तुंकर्तुमन्यथा॥शक्योपास्तिरतोनित्यंकुर्यात्प्रत्ययसंततिं॥८०॥वेदाध्यायीह्यप्र
मत्तोऽधीतेस्वप्नेपिवासितः॥जपितातुजपत्येवतथाध्यातापिवासयेत्॥८१॥विरोधिप्रत्ययंत्यक्त्वाने
रंतर्येणभावयन्॥लभतेवासनावेशात्स्वप्नादावपिभावनां॥८२॥भुंजानोपिनिजारब्धंमास्थातिशा
यतोनिशं॥ध्यातुंशक्तोनसंदेहोविषयव्यसनीयथा॥८३॥परव्यसनिनीनारीव्यग्रापिगृहकर्मणि॥
तदेवास्वादयत्यंतःपरसंगरसायनं॥८४॥परसंगंस्वादयंत्याअपिनोगृहकर्मतत्॥कुंठीभवेदपि
त्वेतदापातेनैववर्तते॥८५॥गृहकृत्यव्यसनिनीयथासम्यक्करोतितत्॥परव्यासनिनीतद्वन्नकरोति

लोवासितोदृढवासनयास्वप्नादिष्वध्ययनंजपंवाकरोत्येवमुपासकोवासनादार्ढ्यात्स्वप्नादावपिध्यायेदित्यर्थः
स्वप्नादावपिध्यानानुवर्तनेकारणमाह॥विरोधीति॥वासनावेशात्संस्कारपाटवात्॥भावनाध्यानं॥ननुप्रारब्ध
कर्मवशाद्विषयाननुभवतःकथंनैरंतर्येणभावनासिद्धिरित्याशंक्यास्थातिशयेसतिविषयव्यासनिवद्भा
वनासिद्धिःस्यादित्याह॥भुंजानइति॥दृष्टांतंविवृणोति॥परेति॥परसंगास्वादनेगृहकृत्यविच्छेदःस्यादित्या

॥ध्या०॥
॥९०॥

दार्ष्टान्तिके योजयति॥ एवमिति। ननु तत्त्वविदपि लौकिकव्यवहारं किं कुर्वन्नाचरति किं वा सम्यगिति विषयव्यवहा
रस्य तत्त्वज्ञानाविरोधित्वात्सम्यगेवाचरतीत्याह। तत्त्वविदिति। अविरुद्धत्वमेव दर्शयति॥ मायामय इति। विरो
धाभावमेव प्रपंचयति॥ अपेक्षन्त इति। कामितानि व्यवहारसाधनानीत्यत आह। मनोवाक्कायेति। तद्बाह्याः प
दार्थाः गृहक्षेत्रादयस्तान्मन आदीन्त्साधनानि न निवारयति। अतोऽस्य ज्ञानिनो व्यवहारः कुम्भवत्तिभवेत्स्येव

तो

एवं ध्यानैकनिष्ठोऽपि लेशाल्लौकिकमाचरेत्॥ तत्त्ववित्त्वविरोधित्वाल्लौकिकं सम्यगाचरेत्॥८७॥ मायाम
यः प्रपंचोऽयमात्मा चैतन्यरूपधृक्॥ इति बोधे विरोधः को लौकिकव्यवहारिणः॥८८॥ अपेक्षन्ते व्यवह
तिर्न प्रपंचस्य वस्तुताम्॥ नाप्यात्मजाड्यं किं त्वेषां साधनान्येव काङ्क्षति॥८९॥ मनोवाक्कायतद्बाह्यपदा
र्थाः साधनानि तान्॥ तत्त्वविन्नोपमृद्नाति व्यवहारोऽस्य नो कुतः॥९०॥ उपमृद्नाति चित्तं चेद्ध्याताऽसौ न तु तत
त्त्ववित्॥ न बुद्धिं मर्दयन्दृष्टो घटतत्त्वस्य वेदिता॥९१॥ ५ ॥ ५ ॥ ५ ॥

सर्थः। ननु विषयानुपमर्देऽपि तत्त्वविदा चित्तोपमर्दनं कार्यमित्याशंक्य तथाकरणे तत्त्वविदेव न स्यादित्याह॥ उपम
ृद्नातीति। ननु तत्त्वविदा चित्तेनोपमृद्यत इत्यत इष्टमित्याशंक्याह। नेति। घटतत्त्वस्य वेदिता ज्ञाता बुद्धिं मर्दय
न्पीडयन्नेकाग्र्यं कुर्वन्पुरुषो न दृष्टो नोपलब्ध इत्यर्थः॥९१॥ ५ ॥ ५ ॥ ५ ॥

ननु घटस्य स्थूलत्वेन स्पष्टत्वात् दर्शने चित्तपीडनं नापेक्ष्यते ब्रह्मणस्तु तथाविधत्वात्तज्ज्ञाने तदपेक्ष्यत इत्याशंक्य तस्य स्वप्रकाशत्वेन घटादपि स्पष्टतरत्वाच्चित्तनिरोधनं नैवापेक्ष्यत इत्याह। सदिति। ननु ब्रह्मणः स्वप्रकाशत्वे तज्ज्ञोचराया बुद्धिश्चेत्तरेव तत्त्वज्ञानत्वात्तस्याश्च क्षणिकत्वे ब्रह्मणि पुनःपुनरवस्थानमपेक्ष्यत इत्याशंक्येदं चोद्यं घटादिष्वपि समानमित्याह। स्वप्रकाशतयेति। घटादिज्ञानस्य क्षणिकत्वेपि सकृन्निश्चितस्य घटस्य सर्वदा व्यवहर्तुं

सद्रूपस्य स्वयमात्रेण घटश्चेद्भासते सदा॥ स्वप्रकाशोयमात्मा किं घटवच्च न भासते॥१२॥ स्वप्रकाशत्वतः किं ते तद्बुद्धिस्तत्त्ववेदनं॥ बुद्धिश्च क्षणनाश्येति चोद्यं तुल्यं घटादिषु॥१३॥ घटादौ निश्चिते बुद्धिर्नश्यत्येव यदा घटः॥ इष्टो नेतुं तदा शक्य इति चेत्सममात्मनि॥१४॥ निश्चित्य सकृदात्मानं यदपेक्षा तदैव तं॥ वक्तुं मंतुं तथा ध्यातुं शक्नोत्येव हि तत्त्ववित्॥१५॥ उपासक इव ध्यायन् लौकिकं विस्मरेद्यदि॥ विस्मरत्येव सा ध्यानाद्विस्मृतिर्न तु वेदनात्॥१६॥ ध्यानं त्वैच्छिकमेतस्य वेदनान्मुक्तिसिद्धितः॥ ज्ञानादेव तु कैवल्यमिति शा[स्त्रेषु डिण्डिमः — margin]

शक्यत्वात्तत्र चित्तस्थैर्यसंपादनमप्रयोजकमित्याशंक्येदमात्मन्यपि समानमित्याह। घटादाविति। सममात्मनीत्युक्तमर्थं विवृणोति। निश्चित्येति। ननु तत्त्वविदप्युपासकवदात्मानुसंधानवशाज्जगदनुसंधानरहितो दृश्यत इत्याशंक्य सोनुसंधानाभावो ध्यानप्रयुक्तो न वेदनप्रयुक्त इत्याह। उपासक इवेति। ननु तत्त्वविदापि मुक्तिसिद्धये ब्रह्मध्यानं कर्तव्यमित्याशंक्य ज्ञानादेव कैवल्यं प्राप्यते येन मुच्यते तं तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति

॥ध्या०॥

॥११॥

द्वितिचेत्त्र २

तत्त्वविदो ध्यानानभ्युपगमेत्तस्य सद्भावहिःप्रवृत्तिःस्यादित्याशंक्याबाधकत्वात्प्रवृत्तेःसाभ्युपेयतेइत्याह। तत्त्वविद इति। बहिःप्रवृत्त्यभ्युपगमेतिप्रसंगः स्यादित्याशंक्य प्रसंगस्य दुर्निरूपत्वान्नैवमितिपरिहरति। अतिप्रसंग इति। न प्रसंगो दुर्निरूप्यः विधिशास्त्रस्य प्रसंगस्त्वोद्धन विवक्षितत्वात्तस्याज्ञान विषयत्वेनतत्त्व विषयत्वाभावादित्याह। प्र संगइति। विधिशास्त्रमित्युपलक्षणं निषेधशास्त्रस्यापि। विधिशास्त्रस्या विद्वद्विषयत्वमेवदर्शयति। वर्णाश्रमेति

तत्त्वविद्यदि न ध्यायेत्प्रवर्तेत्त सदा बहिः। प्रवर्तेतां सुखेनायं को बाधोस्य प्रवर्तने॥९८॥ अतिप्रसंग इति चेत्प्र संगतावदीरय। प्रसंगो विधिशास्त्रं चेन्नत्त त्त्वविदं प्रति॥९९॥ वर्णाश्रमवयोवस्थाभिमानो यस्य विद्यते। तस्यैव च निषेधाश्च विधयः सकलाअपि॥१००॥ वर्णाश्रमादयो देहे मायया परिकल्पिताः॥ नात्मनो बोधरूपस्यैवं तस्य विनिश्चयः॥१॥ समाधिमथ कर्माणि माकरोतु करोतु वा॥ हृदयेनास्त सर्वास्थो मुक्त एवोत्तमाशयः॥२॥ नैष्कर्म्येण न तस्यार्थस्तस्यार्थोस्ति न कर्मभिः॥ न समाधानजप्याभ्यां यस्य निर्वासनं

ननु तत्त्वविदोपि देहधारित्वेन वर्णाश्रमाभिमानित्वमस्तीत्याशंक्याह। वर्णाश्रमादय इति। ननु तत्त्वविन्निश्चयस्तावत्तिष्ठतु शास्त्रं तु तस्य कर्तव्यं प्रतिपादयतीत्याशंक्य तद्विज्ञस्य कर्तव्याभावमेव बोधयतीत्याह। समाधिमिति। यो हृदयेन बुध्या स्तसर्वास्थः। अस्तापरित्यक्ता अशेषा आस्था आसक्तिविशेषा यस्य तथाविधः अत एवोत्तमाशय उत्तम आशयो भिप्रायो निर्मलं ज्ञानं यस्य स तथोक्तः समुक्त एवातः समाधिमथ कर्माणी त्यन्वयः। विदुषः कर्तव्यं नास्तीस

ननु विदुषापि वासनानिवृत्तये ध्यानं कर्तव्यमित्याशंक्य सम्यक्ज्ञानिनो वासनैव नास्तीत्याह। आलोचेति। भवत्वेवं प्रवृत्तेति
मायात्त मित्यत आह। एवमिति। कुतस्तर्ह्यतिप्रसंग इत्यत आह। प्रसंग इति। एवं कृत्स्नमित्यत आह। विध्यभाव
दिति। दार्ष्टान्तिके योजयति। स्यादिति। बालस्य विध्यभावे प्रयोजकमस्त्यलमस्ति न विदुष इत्याशंक्य तस्याज्ञ
त्वाभावेपि विध्यभावप्रयोजकं सर्वज्ञत्वमस्तीत्याह।। न किंचिदिति। तर्हि विध्यधिकारः कस्येत्याशंक्याह। अ

आसासंगस्ततोऽन्यस्यादिद्वज्ञाले हिमायिके।। इत्थं च बलनिर्णीते कुतो मनसि वासना।।४।। एवं नास्ति
प्रसंगोपि कुतोऽस्यातिप्रसंजनं।। प्रसंगो यस्य तस्यैव शंक्येतातिप्रसंजनं।।५।। विध्यभावान्न बालस्य
दृश्यतेऽतिप्रसंजनं।। स्यात्कुतोऽतिप्रसंगोऽस्य विध्यभावे समे सति।।६।। न किंचिद्वेत्ति बालस्तु ज्ञस्तु सर्वं वेत्त्यतस्तत
त्त्ववित्।। अल्पज्ञस्यैव विधयः सर्वे स्युर्नान्ययोर्द्वयोः।।७।। शापानुग्रहसामर्थ्यं यस्यासौ तत्त्वविद्यदि। तत
न्न शापादिसामर्थ्यफलं स्यात्तपसो यतः।।८।। व्यासादेरपि सामर्थ्यं दृश्यते तपसो बलात्।। शापादिकार
णादन्यत्तपो ज्ञानस्य कारणं।।९।। द्वयं यस्यास्ति तस्यैव सामर्थ्यज्ञानयोर्जनिः।। एकैकं तु तपः कुर्वन्नेकं

लभतेऽस्येति। ननु व्यासादिवच्छापानुग्रहसामर्थ्यं यस्य स एव तत्त्वविन्नान्य इत्याशंक्य नेत्याह। शापेति। परिहरति। तन्नेति।
तत्र हेतुमाह। शापादीति। ननु व्यासादीनां तत्त्वविदामपि शापादिसामर्थ्यं दृश्यत इत्याशंक्य तेषां न तत्तत्त्वज्ञानफ
लमपि तु तपः फलमित्याह। व्यासादेरपीति। ननु तर्हि तपसा ब्रह्म विजिज्ञासस्वेति श्रुतेस्तपोरहितस्य तत्त्वज्ञानमपि
न घटेतेत्याशंक्य शापादिकारणादन्यस्य तपसः सत्त्वान्नैवमित्याह। शापादिकारणादिति। तर्हि तेषां व्यासादीनां त

ननु यः शापादिसामर्थ्यरहितस्तस्य विध्यभावेपि विहितानुष्ठानाभिर्निर्वृत्तं स्यादित्याशंक्य तेषामपि विषयलंपटैर्निंदित्वं स्यादित्या[illegible]ह। सामर्थ्येति। एतेपि भोगतुष्ट्यर्थं विषयान्संपादयेयुरित्याशंक्य तद्दातॄणां तिरस्कारमेव हेयत्वेनाभिप्रायेणोपहसंति। भिक्षावस्त्रादीति। विषयलंपटैः पामरैः क्रियमाणया निंदया क्रियापराणां विद्वेषो हानिर्नास्तीत्युच्यते इति चेत् नहि देहाभिमानिभिः क्रियापरैः क्रियमाणया निंदया तत्त्वविदोपि न हानिरित्याह। वर्णा

सामर्थ्यहीनो निंद्यश्चेद्यतिभिर्विधिवर्जितः॥ निंद्यंते यतयोप्यन्यैरनिशं भोगलंपटैः॥११॥ भिक्षावस्त्रादि रक्षेयुर्यद्येते भोगतुष्टये॥ अहो यतित्वमेतेषां वैराग्यभरमंथरं॥१२॥ वर्णाश्रमपरान्मूढा निंदंत्विच्यते यदि॥ देहात्मतयो बुद्ध निंदाश्रममानिनः॥१३॥ तदित्थं तत्त्वविज्ञाने साधनानुपमर्दनात्॥ ज्ञानिनाचरितुं शक्यं सम्यग्राज्यादि लौकिकं॥१४॥ मिथ्यात्वबुध्या तत्रेच्छा नास्ति चेत्तर्हि मास्तु तत् ध्यायन्वाथ व्यवहरन्यथारब्धं वसत्वयं॥१५॥ ५ ॥ ५ ॥ ५ ॥

श्रमपराणिति॥१३॥ [illegible] प्रासंगिकं परिसमाप्य प्रकृतमनुसरति॥ तदित्थमिति॥ तत्तस्मात्कारणा दित्थमुक्तेन प्रकारेण तत्त्वविज्ञाने सति साधनानुपमर्दानात् लौकिकव्यवहारसाधनानां मनआदीनाम विलापनात् लौकिकं राज्यादि राज्यपरिपालनादिकर्म वा ज्ञानिना सम्यगाचरितुं शक्यमित्यर्थः॥ ननु तत्त्ववि दः प्रपंचमिथ्यात्वज्ञानेन तत्रेच्छैव नोदीयादिति चेत्तर्हि स्वकर्मानुसारेण वर्ततामित्याह॥ मिथ्यात्वेति॥

रूपत्नीमुपासकस्यातोवैलक्षण्यंदर्शयति। उपासकस्त्विति। तत्रोपपत्तिमाह। यत इति। यतः कारणात्तस्य ब्रह्मत्वं ध्यानेनैवदृ
तेन प्रमाणेन प्रमितमतो ध्यायिना सदा ध्यानं कर्तव्यमित्यर्थः। तत्र दृष्टान्तः। विष्णुत्वादिवदिति। यथा स्वस्मिन्ध्या
नेन संपादितस्य विष्णुत्वादेः पारमार्थिकत्वं नास्ति तद्वदित्यर्थः॥ ध्यानसंपादितस्यापि तस्य पारमार्थिकत्वं किं न स्या
दित्याशंक्य ध्यानसंपादितस्य वाग्धेनुत्वादेर्ध्यानापायेऽपगमं दर्शयन्नेवमित्याह। ध्यानोपादानकमिति। त्ता

उपासकस्तु सततं ध्यायन्नेव वसेद्यतः॥ ध्यानेनैव कृतं तस्य ब्रह्मत्वं विष्णुतादिवत्॥१६॥ ध्यानोपादान
कं यत्तद्ध्यानाभावे विलीयते॥ वास्तवी ब्रह्मता नैव ज्ञानाभावे विलीयते॥१७॥
ततोऽभिज्ञापकज्ञानेन न नित्यं जन्यतेऽमुना॥ ज्ञापकाभावमात्रेण न हि सत्यं विलीयते॥१८॥
अस्त्येवोपासकस्यापि वास्तवी ब्रह्मतेति चेत्। पामराणां तिरश्चां च वास्तवी ब्रह्मता न किं॥१९॥

नेन तु प्रकाशितस्य तु ब्रह्मत्व
स्य ततो वैलक्षण्यमाह। वास्तवीति। हेतुगर्भितं विशेषणं। यतो ब्रह्मत्वं वास्तवमतो ज्ञापकज्ञानाभावे सति नैव वि
लीयते। वास्तवत्वादेव ज्ञानेनैव जन्यत इत्याह। तत इति। यतो ब्रह्मतत्त्वं नित्यं ततो ज्ञानं तस्याभिज्ञापकं सद्बोध
कमेव न जनकमित्यर्थः। तत्रोपपत्तिं व्यतिरेकमुखेनाह। ज्ञापकेति। अयमभिप्रायः। ब्रह्मत्वं यदि ज्ञानजन्यं स्या
त्तर्हि ज्ञाननाशे स्वयं विलीयेत। न तु ज्ञानेन जन्यत इत्यर्थः। ननु ज्ञानिवदुपासकस्यापि ब्रह्मत्वं वास्तवमस्त्येव

हृ॥ न

पामराणां विद्यमानमपि ब्रह्मतत्त्वमज्ञातत्वा न पुरुषार्थोपयोगीत्याशंक्य ज्ञाततेनापुरुषार्थोपयोगित्वमुपासकस्यापि समानमित्याह॥ अज्ञानादिति॥ ननु तर्ह्युपासनं किमर्थमभिधीयत इत्याशंक्येतरानुष्ठानेभ्यः श्रेष्ठत्वाभिप्रायेणोक्तमिति दृष्टांतपूर्वकमाह॥ उपवासादिति॥ इतरानुष्ठानाच्छ्रेष्ठत्वमेव दर्शयति॥ पामराणामिति॥ उत्तरोत्तरश्रेष्ठ्ये कारणमाह॥ यावदिति॥ निर्गुणोपासनस्य सर्वश्रेष्ठ्ये कारणमाह॥ ब्रह्मसत्तानायत इति॥ उक्तमर्थं दृष्टांतप्रदर्शनपूर्वकं दृढयति॥

अज्ञानादपुमर्थत्वमुभयत्रापि तत्समं॥ उपवासाद्यथा भिक्षा वरं ध्यानं तथान्यतः॥१२०॥ पामराणां व्यवहर्तेर्वरं कर्माद्यनुष्ठितिः॥ ततोपि सगुणोपास्तिर्निर्गुणोपासनं ततः॥१२१॥ यावद्विज्ञानसामीप्यं तावच्छ्रैष्ठ्यं विवर्द्धते॥ ब्रह्मसत्तानायत्ता साक्षान्निर्गुणोपासनं ज्ञानेः॥१२२॥ यथा संवादिविभ्रान्तिः फलकाले प्रमायते॥ विद्यायते तथोपास्तिर्मुक्तिकालेऽतिपाकतः॥१२३॥ संवादिभ्रमतः पुंसः प्रवृत्तस्यान्यमानतः॥ प्रमेति चेत्तथोपास्तिर्मान्तरे कारणायतां॥१२४॥ मूर्तिध्यानस्य मंत्रादेरपि कारणता यदि॥ अस्तु नाम तथाप्यत्र प्रत्यासत्तिर्विशिष्यते॥१२५॥ यथेति॥ ननु संवादिभ्रांतिः स्वयमेव न प्रमा भवति किंतु तया प्रवृत्तस्येंद्रियार्थसंनिकर्षात्प्रमा जायत इति शंकते॥ संवादीति॥ अस्तु तर्हि निर्गुणोपासनमपि निदिध्यासनरूपं सद्वाक्यजन्यापरोक्षज्ञाने कारणं भविष्यतीत्याह॥ तथेति॥ नन्वेवं सति मूर्तिध्यानादेरपि चित्तैकाग्र्यसंपादनद्वारापरोक्षज्ञानसाधनत्वं स्यादिति चेत्तदप्यंगीक्रियत इत्याह॥ मूर्तीति॥ तर्हि निर्गुणोपासने को विशेषस्तत्राह॥ तथापीति॥ प्रत्यास-

त्यासत्तिप्रकारमेव दर्शयति। निर्गुणेति। निर्गुणोपासनं यदा पक्वं भवति तदा सविकल्पकसमाधिः स्यात्ततः सविकल्पसमाधिर्निरोधाख्यो यस्तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिरितिसूत्रोक्तलक्षणो निर्विकल्पकः समाधिः सोनायासेन लभ्यते। भवत्वेवं निर्विकल्पकलाभस्ततः किमित्यत आह। निरोधेति। ततोपि किमित्यत आह। पुनःपुनरिति। अस्मिन्नसंगे वस्तुनि पुनः पुनर्वासिते भाविते सति वाक्यात्तत्त्वमस्यादिलक्षणात्तत्त्वधीस्त

निर्गुणोपासनं पक्वं समाधिः स्याच्छनैस्ततः॥ यस्समाधिर्निरोधाख्यः सोनायासेन लभ्यते॥२६॥ निरोधलाभे पुंसोंतरसंगं वस्तु विशिष्यते॥ पुनःपुनर्वासिते स्मिन्वाक्याज्जायेत तत्त्वधीः॥२७॥ निर्विकारसंगनित्यस्वप्रकाशैकपूर्णता॥ बुद्धौ झटिति शास्त्रोक्ता आरोहत्यविवादतः॥२८॥ योगाभ्यासस्त्वेतदर्थोमृतबिंद्वादिषु श्रुतः॥ एवं च दृष्टद्वारापि हेतुत्वादन्यतो वरः॥२९॥ उपेक्ष्य तत्तीर्थयात्राजपादीनेव कुर्वतां॥ पिंडं समुत्सृज्य करं लेढीति न्याय आपतेत्॥३०॥ तत्त्वज्ञानं महद्ब्रह्मास्मीत्येवमाकारं जायेत उत्पद्येत॥ तत्त्वज्ञानस्वरूपमेव विवृणोति। निर्विकारेति। ननु निर्विकारसमाधिवशादपरोक्षज्ञानमुदेतीत्यत्र किं प्रमाणमित्याशंक्यामृतबिंद्वादिश्रुतयः प्रमाणमित्याह॥ योगाभ्यास इति। फलितमाह। एवं चेति। एवं च सति निर्गुणोपासनस्यापरोक्षज्ञानप्रत्यासत्तिसंभवे सति दृष्टद्वारापि निर्विकल्पकसमाधिद्वारेणापि अदृष्टद्वारापि हेतुत्वाज्ज्ञानसाधनत्वादन्यतः सगुणोपासनादिभ्यो वरं श्रेष्ठमित्यर्थः। एवं निर्गुणोपासन

वक्ष्यमाणः स्यादिति लौकिकन्यायप्रदर्शनात्॥ पृष्ठे श्लोकेति॥१३०॥

स्यापरोक्षज्ञानसाधनत्वसिद्धेः स्मृतिताद्युत्कृष्टत्वम्

नन्वात्मतत्त्वविचारं परित्यज्य निर्गुणोपासनं कुर्वतोऽप्ययं न्यायः समान इत्याशङ्क्याङ्गीकरोति ॥ उपासकानामिति ॥ तर्हि निर्गुणोपासनं कुतः प्रतिपाद्यत इत्यत आह ॥ तस्मादिति ॥ यस्मादुक्तन्यायप्रसंगस्तस्माद्विचारासंभवे योग उपासनमुक्तमित्यर्थः ॥ विचारासंभवे कारणमाह ॥ बह्विति ॥ यतो विचारेण न संभवत्यतो योगः कर्तव्य इत्याह ॥ योग इति ॥ मुख्यत्वे कारणमाह ॥ धीदर्प इति ॥ तेन योगेन यतो धीदर्पो नश्यत्यतो मुख्य इत्यर्थः ॥ एवं व्याकुलचित्तानां

उपासकानामप्येवं विचारत्यागतो यदि ॥ बाढं तस्माद्विचारस्यासंभवे योग ईरितः ॥२१॥ बहुव्याकुलचित्तानां विचारात्तत्त्वधीर्न हि ॥ योगो मुख्यस्ततस्तेषां धीदर्पस्तेन नश्यति ॥२२॥ अव्याकुलधियां मोहमात्रेणाच्छादितात्मनां ॥ सांख्यनामा विचारः स्यान्मुख्यो झटिति सिद्धिदः ॥२३॥ यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥ एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥२४॥ तत्कारणं सांख्ययोगाभिपन्नमिति हि श्रुतिः ॥ यस्तु श्रुतेर्विरुद्धः स आभासः सांख्ययोगयोः ॥

योगस्य मुख्यत्वमभिधायाव्याकुलचित्तानां विचार एव मुख्य इत्याह ॥ अव्याकुलेति ॥ सांख्यनामा विचारः सांख्यं ब्रह्माभिध्येयसत्त्वविचारो मुख्यः कुत इत्यत आह ॥ यदिति ॥ योगसांख्ययोरुभयोरपि तत्त्वज्ञानद्वारा मुक्तिसाधनत्वे गीतावाक्यं प्रमाणयति ॥ यत्सांख्यैरिति ॥ यः सांख्यं योगं च फलत एकं पश्यति स शास्त्रार्थं सम्यक् पश्यतीत्यर्थः ॥ न केवलं गीतावाक्यं किंतु तन्मूलभूता श्रुतिरप्यस्तीत्याह ॥ तत्कारणमिति ॥ ननु सांख्ययोगयोस्तत्त्वज्ञानसाधनत्वाङ्गीकारे तच्छास्त्रप्रतिपादि

ननूपासनं कुर्वाणस्य तत्त्वज्ञानाभावान्मरणे सति मोक्षो न सिद्ध्येदित्याशंक्याह। उपासनमिति। मरणावसरे ज्ञानान्मुक्ति-
लाभे प्रमाणमाह॥ यं यं वापीति। यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः सहात्मना यथासंकल्पितं लोकं न-
यतीति वाक्याच्चेत्यर्थः॥ ननूदाहृताभ्यां श्रुतिस्मृतिवाक्याभ्यां मरणप्रत्ययस्य भाविजन्माभिधीयते न ज्ञानान्मुक्तिरि-
त्याशंक्य मुख्यतस्तथाभिधानमंगीकरोति। अन्त्यप्रत्ययत इति। कथं तर्हि मरणकाले ज्ञानान्मोक्षो भवतीत्यत्र वाक्य-
द्वयं प्रमाणत्वेनोपन्यस्तमित्याशंक्याह। तथा सतीति। तथा सत्यन्त्यप्रत्ययाद्भाविजन्मनिश्चये सति सगुणोपास-

उपासनं नातिपक्वमिह यस्य परं तु सः। मरणे ब्रह्मलोके वा तत्त्वं विज्ञाय मुच्यते॥२६॥ यं यं वापि स्मरन्भा-
वं त्यजत्यंते कलेवरं॥ तं तमेवैति यच्चित्तस्तेन यातीति शास्त्रतः॥२७॥ अंत्यप्रत्ययतो नूनं भाविजन्म त-
था सति॥ निर्गुणप्रत्ययोऽपि स्यात्सगुणोपासने यथा॥२८॥ नित्यनिर्गुणरूपं यन्नाममात्रेण गीयता॥
अर्थतो मोक्ष एवैष संवादिभ्रमवन्मतः॥२९॥ तत्सामर्थ्याज्जायते धीर्मूलाविद्यानिवर्तिका॥ अविमुक्तोपास-

कस्य यथा मरणावसरे पूर्वाभ्यासवशात्सगुणब्रह्माकारः प्रत्ययो जायते एवं निर्गुणोपासकस्यापि निर्गुणब्रह्मगोच-
रः प्रत्ययो जनिष्यत इत्यर्थः॥ ननु निर्गुणप्रत्ययाभ्यासवशान्निर्गुणब्रह्मसमाप्तिरेव भवेन्न मुक्तिरित्याशंक्य ब्रह्मसमा-
प्तिमुक्त्योः शब्दमात्रभेदो नार्थत इत्याह। नित्येति। तद्ब्रह्म नित्यमिति निर्गुणमिति नाममात्रेणोच्यतामर्थस्त्वेष मो-
क्ष एव स्वरूपावस्थितिर्मुक्तिरित्यभिधानादिति भावः। तत्र दृष्टान्तमाह। संवादीति। यथा संवादिभ्रमो नाममात्रेण
भ्रम इत्युच्यते वस्तुतस्तत्त्वज्ञानं भवति तद्वदित्यर्थः॥ ननु निर्गुणोपासनस्य मानसक्रियारूपस्य मुक्तिसाधनत्वाभिधा

॥ध्या०
॥१५॥

ननु निर्गुणोपासनस्य मोक्षफलमित्यत्र किं प्रमाणमित्याशंक्याह। सो कामइति। सो कामो निष्कामो आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंते ब्रह्मैव सन्ब्रह्माप्येति। अशरीरो निरिंद्रियोऽप्राणो ह्यमनाः स इ चिदानंदमात्रः स्वराड् भवति य एवं वेद। चिन्मयो ह्ययमोंकारश्चिन्मयमिदं सर्वं तस्मात्परमेश्वर एवैकमेव तद्भवति। एतदमृतमभयमेतद्ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेदेति रहस्यमित्यादिवाक्ये तापनीयोपनिषदि निर्गुणोपासनस्य मोक्षफलत्वेन श्रुतं इत्यर्थः॥ ननूपासनयापि मुक्तिः स्याच्चेन्नान्यः पंथा विद्यतेऽयनायेति श्रुतिविरोधः स्यादित्याशंक्याह।

सोकामो निष्काम इत्यशरीरो निरिंद्रियः॥ अभयं हीति मुक्तत्वं तापनीये फलं श्रुतं॥१७१॥ उपासनस्य सामर्थ्याद्विद्योत्पत्तिर्भवेत्ततः॥ नान्यः पंथा इति ह्येतच्छास्त्रं नैव विरुध्यते॥१७२॥ निष्कामोपासनान्मुक्तिस्तापनीये समीरिता॥ ब्रह्मलोकः सकामस्य शैब्यप्रश्ने समीरितः॥१७३॥ य उपास्ते त्रिमात्रेण ब्रह्मलोके स नीयते॥ स एतस्माज्जीवघनात्परं पुरुषमीक्षते॥१७४॥

यावद्व्यवधानेन मोक्षप्रदत्वाभिधानान्न विरोध इत्याह। उपासनस्येति॥ मरणे ब्रह्मलोके वा तत्त्वं विज्ञाय मुच्यते इत्युक्तार्थं श्रुतिद्वयं प्रमाणयति। निष्कामेति। तत्र सोकामो निष्काम इति तापनीयवाक्यं पूर्वमेवोदाहृतं॥ इदानीं प्रश्नोपनिषद्वाक्यमर्थतः पठति। य उपास्त इति। यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते इति सकामस्य ब्रह्मलोकप्राप्तिः श्रूयत इत्यर्थः। ननु शैब्यप्रश्ने सकामस्य ब्रह्मलोकगतिरिति न प्रतीयत इत्याशंक्य तत्र साक्षात्कारश्च श्रूयत इत्याह

किंचाप्रतीकालंबनान्नयतीति बादरायण उभयथापिदोषात्तत्क्रतुश्चेत्यत्र कामानुसारेण फलप्राप्तिर्भवतीति प्रतिपादि
तं तस्मादपि सकामस्य ब्रह्मलोकगतिरिष्यते त्याह। अप्रतीकेति। न हि सकामस्य तत्त्वज्ञानं कुतो जायते इत्यासंक्याह
निर्गुणेति। इदं मानवमावर्तं नावर्तन्ते न स पुनरावर्तते ब्रह्मणा सह ते सर्वे इत्यादिश्रुतिस्मृतिसद्भावान्नतस्य पुनः

अप्रतीकाधिकरणे तत्क्रतुन्याय ईरितः॥ ब्रह्मलोकफलं तस्मात्सकामस्येति वर्णितं॥७५॥ निर्गुणोपास्ति
सामर्थ्यात्तत्र तत्त्वमवेक्षते॥ पुनरावर्तते नायं कल्पांते तु विमुच्यते॥७६॥ प्रणवोपास्तयः प्रायो निर्गुणा
एव वेदगाः॥ क्वचित्सगुणताप्युक्ता निर्गुणोपासनस्य हि॥७७॥ परावरब्रह्मरूप ओंकार उपवर्णितः॥
पिप्पलादेन मुनिना सत्यकामाय पृच्छते॥७८॥ एतदालंबनं ज्ञात्वा यो यदिच्छति तस्य तत्॥ इति प्रोक्तं
यमेनापि पृच्छते नाचिकेतसे॥७९॥ इह वा मरणे वास्य ब्रह्मलोके थवा भवेत्॥ ब्रह्मसाक्षात्कृतिः स
म्यगुपासीनस्य निर्गुणं॥८०॥ अर्थोयमात्मगीतायामपि स्पष्टमुदीरितः॥ विचारक्षममर्त्यानमु

संसारप्राप्तिः किंतु मुक्तिरेवेत्याह॥ पुनरिति॥ इदानीं प्रणवोपासनप्रसंगाद्बुद्धिस्थं तद्द्वैविध्यं दर्शयति॥ प्रणवेति
द्वैविध्ये प्रमाणमाह। परावरेति। एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्
वेतीत्युभयरूपत्वं प्रतिपादितमित्यर्थः। कठवल्ल्यां यमेनापि एतदालंबनं ज्ञात्वेत्यादिना द्वैविध्यमुक्तमित्याह
एतदिति। उक्तमर्थमुपसंहरति। इहवेति। विचारात्तत्त्वज्ञानासमर्थस्य निर्गुणब्रह्मध्याने धिकार इत्ययमर्थ आत्म

॥ध्या०॥
॥१६॥

आत्मगीतावाक्यान्येवोदाहरति। साक्षात्कर्तुमिति॥ ध्यानस्य सम्यग्ज्ञानोपायत्वे दृष्टान्तमाह। यथेति। दार्ष्टान्तिके योजयति। मल्लाभेऽपीति। व्यतिरेकेणोक्तमर्थमन्वयमुखेनाह। देहोपलमिति। ज्ञानेऽसमर्थस्य ध्यानेऽधिकार इत्यत्र वाक्यान्तरं पठति। अनुभूतेरिति। ध्यानाद्ब्रह्मप्राप्तौ कैमुतिकन्यायमाह। अप्यसदिति। उपासकस्य पूर्वमविद्यमानमपि देवत्वादिकं ध्यानात्प्राप्यते किमु स्वरूपत्वेन नित्यप्राप्तं सर्वात्मकं ब्रह्म ध्यानात्प्राप्यत इति किमु वक्तव्यमित्यर्थः॥

साक्षात्कर्तुमशक्तोऽपि चिंतयेन्मामशंकितः॥ कालेनानुभवारूढो भवेयं फलितो ध्रुवं॥५३॥ यथागाधनिधेर्लब्धौ नोपायः खननं विना॥ मल्लाभेऽपि तथा स्वात्मचिंतां मुक्त्वा न चापरः॥५४॥ देहोपलमपाकृत्य बुद्धिकुद्दालकात्पुनः॥ खात्वा मनोभुवं भूयो गृण्हीयान्मां निधिं पुमान्॥ अनुभूतेरभावेऽपि ब्रह्मास्मीत्येव चिंत्यतां॥ अप्यसत्प्राप्यते ध्यानान्नित्याप्तं ब्रह्म किं पुनः॥५५॥ अनात्मबुद्धिशैथिल्यं फलं ध्यानाद्दिने दिने॥ पश्यन्नपि न चेद्ध्यायेत्कोऽपरोऽस्मात्पशुर्वद॥५६॥ देहाभिमानं विध्वस्य ध्यानादात्मानमद्वयं॥ पश्यन्मर्त्योऽमृतो भूत्वा ह्यत्र ब्रह्म समश्नुते॥५७॥ ध्यानदीपमिमं सम्यक् परामृशति यो नरः॥ मुक्तसंशय एवायं ध्यायति ब्रह्म संततं॥५८॥ इति ध्यानदीपः समाप्तः॥

अस्य ध्यानफलस्य प्रत्यक्षसिद्धत्वादपि ध्यानं कर्तव्यमित्याह। अनात्मेति। इदानीमुपपादितमर्थं संक्षिप्य दर्शयति। देहाभिमानमिति। मरणशीले देहेऽहमित्यभिमानपरित्यागात्स्वयममृतो भूत्वाऽस्मिन्नेव शरीरे स्वस्य निजं

॥श्रीगणेशाय नमः॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ अथो नाटकदीपस्य मया संक्षिप्य वक्ष्यते॥१॥
चिकीर्षितस्य ग्रंथस्य निष्प्रत्यूहपरिपूरणायाभिमतदेवतातत्त्वानुस्मरणलक्षणं मंगलमाचरन् मंदाधिकारिणा
मनायासेन निःप्रपंचब्रह्मात्मतत्त्वप्रतिपत्तिसिद्धये अध्यारोपापवादाभ्यां निःप्रपंचं प्रपंच्यत इति न्यायमनुसृत्याध्या
रोपं तावदाह। परमात्मेति पूर्वं सृष्टेः प्राग् अद्वयानंदपूर्णः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं विज्ञानमानंदं ब्रह्म
दः पूर्णमदः पूर्णमिदमित्यादिश्रुतिप्रसिद्धः स्वगतादिभेदशून्यः परमानंदरूपपरिपूर्णः परमात्मा स्वमायया मायां तु प्रकृतिं

परमात्माद्वयानंदपूर्णः पूर्वं स्वमायया॥ स्वयमेव जगद्भूत्वा प्राविशज्जीवरूपतः॥१॥ विष्ण्वाद्युत्तमदेहेषु प्रविष्टो
देवता भवत्॥ मर्त्याद्यधमदेहेषु स्थितो भजति देवताम्॥२॥

विद्यान्मायिनं तु महेश्वरमिति श्रुत्युक्त्या स्वनिष्ठमायया स्वयमेव जगद्भूत्वा तदात्मानं स्वयमकुरुत स
च्च त्यच्चाभवदित्यादिश्रुतेः स्वयमेव जगदाकारतां प्राप्य जीवरूपतः प्राविशत्। तत्सृष्ट्वा तदेवानुप्राविशत्। अ
नेन जीवेनात्मनानुप्रविश्येत्यादिश्रुतेर्जीवरूपेण प्रविष्टवानित्यर्थः॥१॥ ननु परमात्मन एवैकस्य सर्वशरीरे
षु प्रविष्टस्य पूज्यपूजकादिभावेन प्रतीयमान उत्तमाधमभावो विरुद्ध इति शंकायामाह॥ विष्ण्वादीति। नात्र स्वाभाविक
उत्तमाधमभावः॥ किंतु शरीरोपाधिनिबंधनोऽतो न विरोध इति भावः॥२॥

॥ना०
॥३॥

रस्य मामन्य ध्यारोपं संक्षेपेण प्रदर्श्य संसाधनं तदपवादं संक्षिप्य दर्शयति ॥ अनेकेति। अनेकजन्मभजनादने
केषु जन्मस्वनुष्ठितानां कर्मणां ब्रह्मणि समर्पणरूपाद्भजनात्स्वविचारं स्वस्यात्मनो ब्रह्मरूपस्य ज्ञानसाधनं श्रवणा
दिकं चिकीर्षति कर्तुमिच्छति ततः स्वविचारेण विचारजनितज्ञानेन मायायां स्वस्याध्यारोपितस्य नरत्वादिरूपाच्छादिका
यां मतानाविद्यादि शब्दवाच्यायां विनिष्टायां निवृत्तायां सत्यां स्वयमद्वयानंदपूर्णः परमात्मैवावशिष्यते। ननु
नद्भ्रस्ताद्दृष्यिति ज्ञाता सर्वबंधैः प्रमुच्यत इत्यादि श्रुतिभिर्बंधनिवृत्तिलक्षणस्य ज्ञानफलस्याभिधानात्परमात्मा

अनेकजन्मभजनात्स्वविचारं चिकीर्षति। विनष्टायां स्वमायायामद्वयं शिष्यते स्वयं ॥३॥ अद्वयानंदरूप
स्य सद्वयत्वं च दुःखिता। बंधः प्रोक्तः स्वरूपेण स्थितिर्मुक्तिरितीर्यते ॥४॥ अविचारकृतो बंधो विचारे
ण निवर्तते। तस्माज्जीवपरात्मानौ सर्वदैव विचारयेत् ॥५॥ विशेषणस्य तत्फलत्वाभिधानमनुपपन्नमित्या

शंक्याह। अद्वयेति। अद्वितीये ब्रह्मणि वास्तवस्य बंधस्य मोक्षस्य वा दुर्निरूपत्वाद्दुःखित्वादिभ्रमएव बंधः स्वरूपावस्थि
तिलक्षणा तन्निवृत्तिरेव मोक्षः। तेन श्रुतिविरोध इति भावः ॥४॥ ननु कर्मणैव हि संसिद्धिमास्थिता जनकादय इति
स्मृतेर्मोक्षस्य कर्मसाधनत्वोगमात् किमनेन विचारजनितज्ञानेनेत्यत आह। अविचारेति। विचारप्रागभावो पलक्षि
तात् ज्ञानकृतस्य बंधस्य न विचारज्ञानादन्यतो निवृत्तिरुपपद्यते। उदाहृतस्मृतौ च संसिद्धिशब्देन चित्तशुद्धिरेवाभिधीयते।
न मोक्ष इति भावः। विचारेण बंधनिवृत्तिरुक्ता किं विषयेण विचारेणेत्यत आह। तस्मादिति। तत्वसाक्षात्कारपर्यंतं

व

५

तत्र जीवस्य स्वरूपं तावन्निरूपयति। अहमितीति। परिच्छिन्नाभासो विशिष्टः। अहंकारो व्यवहारदशायां देहादावहमित्य
भिमन्यते। सो कर्ता कर्तृत्वादिधर्मविशिष्टो जीव इत्यर्थः। तस्य किं करणमित्यपेक्षायामाह। तस्येति। कामादिवृत्तिमा
न्तः करणभागो मनः। करणस्य क्रियाव्याप्तत्वात् क्रियां दर्शयति। तस्य क्रिये इति। अनयोः स्वरूपं विषयं च विवि
च्य दर्शयति। अन्तर्मुखेति। इदमित्येषेति बहिर्वृत्तेः स्वरूपाभिनयो विशिष्टेन विषयप्रदर्शनं बाह्यं देहाद्बहिर्वर्तमा

अहमित्यभिमन्ता यः कर्ता सोत्र तस्य साधनं। मनस्तस्य क्रिये अन्तर्बहिर्वृत्ती क्रमोत्थिते॥ ६॥
अन्तर्मुखाहमित्येषा वृत्तिः कर्तारमुल्लिखेत्॥ बहिर्मुखेदमित्येषा बाह्यं वस्त्विदमुल्लिखेत्॥ ७॥
इदमो ये विशेषाः स्युर्गन्धरूपरसादयः॥ असांकर्येण तान् भिन्द्यात् घ्राणादीन्द्रियपञ्चकं॥ ८॥ क
र्तारं च क्रियां तद्वद्व्यावृत्तविषयानपि। स्फोरयेदेकयत्नेन योसौ साक्ष्यत्र चिद्वपुः॥ ९॥

नन्विदं तत्पा निर्दि
ष्टमात्रं वस्तूल्लिखेद्बुद्धिवृत्तिः कुर्यादित्यर्थः॥ ननु मनसैव सर्वव्यवहारसिद्धौ चक्षुरादिवैयर्थ्यं प्रसज्येतेत्याशंक्याह॥ इ
दमंशेति। मनसेदमिति सामान्यमात्रं गृह्यते न तु तद्विशेषो गन्धादिरतस्तद्ग्रहणे घ्राणादिकमुपयुज्यत इत्यर्थः॥ ८ ए
वं सोपकरणं जीवस्वरूपं निरूप्य परमात्मानं निरूपयति॥ कर्तारमिति। कर्तारं पूर्वोक्तमहंकाररूपं क्रियामहमिदं
मात्मक रूपां व्यावृत्तविषयानपि व्यावृत्तानन्योन्यविलक्षणान् घ्राणादिग्राह्यान् गन्धादीन् विषयांश्च एकयत्ने

साक्षिण एकरूपत्वेन सर्वस्फोरकत्वमभिनीय दर्शयति। ईक्ष इति। ईक्षे रूपमहं पश्यामीत्येवं द्रष्टृदर्शनदृश्यलक्षणां त्रिपुटीमे-
कत्वेन भासयते। एवं शृणोमीत्यादावपि योज्यं युगपदविकारित्वेनानेकावभासकत्वे दृष्टान्तमाह। नृत्येति। दृष्टान्तं स्पष्ट-
यति। नृत्यशालास्थित इति। अविशेषेण प्रभ्वादिविषयविशेषणावभासनाय वृध्यादिविकारमन्तरेणेति यावत्। दार्ष्टा-
न्तिके योजयति। अहंकारमिति। सुषुप्त्यादावहंकाराद्यभावेऽपि तत्साक्षितया भात्येवेत्यर्थः॥ ननु प्रकाशरूपाया बुद्धि-

ईक्षे शृणोमि जिघ्रामि स्वादयामि स्पृशाम्यहं। इति भासयते सर्वं नृत्यशालास्थदीपवत्॥ १०॥ नृत्यशालास्थि-
तो दीपः प्रभुं सभ्यांश्च नर्तकीं। दीपयेदविशेषेण तदभावेऽपि दीप्यते॥ ११॥ अहंकारं धियं साक्षी विषयानपि
भासयेत्। अहंकाराद्यभावेऽपि स्वयं भात्येव पूर्ववत्॥ १२॥ निरन्तरं भासमाने कूटस्थे ज्ञप्तिरूपतः। तद्भासा
भास्यमानेयं बुद्धिर्नृत्यत्यनेकधा॥ १३॥

रेवाहंकारादिसर्वावभासकत्वसंभवात् किं तदतिरिक्तसाक्षिकल्पनये-
त्याशंक्याह। निरन्तरमिति। कूटस्थे निर्विकारे साक्षिणि ज्ञप्तिरूपतः स्वप्रकाशचैतन्यरूपतया निरन्तरं भासमाने स- नरं
दा स्फुरति सतीयं बुद्धिस्तद्भासा तस्य साक्षिणः स्वरूपचैतन्येन भास्यमाना प्रकाश्यमाना नेकधा घटोऽयं पटोऽयमि-
त्यादिनानाकारेण नृत्यतीति क्रियते। अयंभावः यतो बुद्धेर्विकारित्वाज्जडत्वात् स्वतः स्फूर्तिराहित्यमतस्तदतिरिक्तः सर्वा-
वभासकः साक्ष्यभ्युपगन्तव्य इति॥ १३॥ ७॥
वि

उक्तमर्थं श्रोतृबुद्धिसौकर्याय नाटकदीपेन रूपयति। अहंकार इति। विषयभोगसंरक्तत्वेन कल्प्याभिमानप्रभुत्वेऽहं
र्षविषादत्वसान्नृताभिमानिप्रभुतुल्यत्वमहंकारस्य परिसरवर्त्तित्वेऽपि विषयाणां तद्ग्राहे सानुस्मृ पुरुषसाम्य
नानाविध विकारवत्त्वान्नर्तकीसाम्यं धियः। धीविक्रियाणामनुकूलव्यापारवत्त्वात्तालादिधारिसमानत्वमिं
द्रियाणामेतत्सर्वावभासकत्वात्साक्षिणो दीपसादृश्यमिति द्रष्टव्यं। ननु साक्षिणाप्यहंकाराद्यवभासक

अहंकारः प्रभुः सभ्या विषया नर्तकी मतिः। तालादिधारीण्यक्षाणि दीपः साक्ष्यवभासकः॥१४॥ स्वस्था
नस्थितो दीपः सर्वतो भासयेद्यथा। स्थिरस्थायी तथा साक्षी बहिरन्तः प्रकाशयेत्॥१५॥
बहिरन्तर्विभागोऽयं देहापेक्षो न साक्षिणि। विषया बाह्यदेशस्था देहस्यान्तरहंकृतिः॥१६॥

त्वेनेन तेन संबंधापगमागमरूपविकारवत्त्वं स्यादित्याशंक्याह। स्वस्थानेति। दीपो यथागमनादिविकारशून्यः स्वदेशे
वस्थित एव सन्स्वसन्निहिताखिलपदार्थानवभासयति एवं साक्ष्यपीति भावः॥१५॥ ननु साक्षिणो बहिरन्तरवभा
सकत्वाभिधानमनुपपन्नमपूर्वमनपरमनन्तरमबाह्यमिति श्रुत्यान्तस्य बाह्यान्तरविभागाभावाभिधानादित्याशं
क्याह॥ बहिरन्तरिति। कस्य बाह्यं कस्य वान्तरत्वमित्यत आह॥ विषया इति॥१६॥ ७॥ ७॥ ७

165

१०दी०

ननु स्थिरस्वभावी तथा साक्षी बहिरन्तःप्रकाश्यदेशस्य विकारिणः सतो बहिरन्तरभासकः सोऽस्थिरः पुनः अहं घटं पश्यामि
त्यत्राहमित्यन्तरहंकारसाक्षितया प्रथमतो भासकः पश्चात्तस्य घटं पश्यामीति घटाकारवृत्तिस्फुरणरूपेण बहिर्निर्गमा
नुभवादित्याशंक्याह। अंतःस्थेति। दृष्टान्तमाह कुलेन देहान्तरवस्थिता धीबुद्धीरूपा ... चक्षुरादिद्वारा भूयो नि
र्गच्छति तथा च तन्निष्ठं चाञ्चल्यं तद्भासके साक्षिण्यारोप्यते न तु वास्तवं साक्षिणश्चाञ्चल्यमिति भावः॥१७॥ भास

अंतःस्थधीः सहैवाक्षैर्बहिर्याति पुनः पुनः। भास्यबुद्धिस्थचाञ्चल्यं साक्षिण्यारोप्यते वृथा॥१७॥ गृहान्त
रगतः स्वल्पो गवाक्षादातपोऽचलः। तत्र हस्ते नर्त्यमाने नृत्यतीवातपो यथा॥१८॥ निजस्थानस्थितः साक्षी
बहिरन्तर्गमागमौ। अकुर्वन्बुद्धिचाञ्चल्यात्करोतीव तथा तथा॥१९॥ न बाह्यो नान्तरः साक्षी बुद्धेर्देशौ हि तावुभौ।
बुद्ध्याद्यशेषसंशान्तौ यत्र भात्यस्ति तत्र सः॥२०॥

के भास्यचापल्यारोपः दृष्टान्तसाक्षादयमाह॥ गृहान्तरिति। गवाक्षाद्गृ
हान्तर्गतः स्वल्प आतपोऽचल एव वर्तते तत्र तस्मिन्नातपे पुरुषेण हस्ते नर्त्यमाने हस्तगतचाञ्चल्यमाने यथातपो नृत्यतीव चल
तीव लक्ष्यते न तु चलतीत्यर्थः॥ दार्ष्टान्तिकमाह। निजस्थानेति। निजस्थाने स्थितस्य नेन किं बाह्यादिदेशस्थत्वमेवोच्य
ते नेत्याह। न बाह्य इति। तत्र हेतुमाह। बुद्धेरिति। तर्हि किं विवक्षितमित्यत आह। बुद्ध्यादीति। आदिशब्देन त्रिपादयोगसंतते।
सद्ध्यानदिशब्देन तदन्तःस्थपरालिविवक्षिता॥२०॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥

166

ननु सर्वेष्व्यवहारो परस्तौ देहाद्यवनोपलभ्यते कुतस्तस्य प्रत्यक्त्वं स्वप्रभास्य माविष्कुर्वतीति। देहस्तथेति। देहादिकल्प
ना धिष्ठानस्य स्वातिरिक्त देहाद्यपेक्षा नास्तीति भावः। ननु देहाद्यभावे शास्त्रस्य वेगतत्स्य सर्वे सांसिद्धा धृति विरुध्येतेत्यत आह।
सर्वे देहेति। स्वाभाविकमेव विज्ञस्याद्दित्यत आह। नत्वेति। अद्वितीयस्य स्वसंगतानेति भावः। सर्वगं तस्य तत्त्वं सर्वसाक्षित्वमपि
नवास्तवमित्याह। अन्तर्बहिर्वेति। नथावस्तुषु योजयेदित्येतत्स्य प्रपंचयति। यद्यदिति। तर्हि किं तस्य निजरूपमित्यत आह। स्वत इति।
अनात्मनस्सगोचरत्वे मुमुक्षूणां न गृह्येतेति शंकते। कथमिति। अन्यात्मस्वमिष्टमेवेत्याह। मैवेति। नन्वात्मनो ग्राह्यत्वाभावे विचा

देहाः कोऽपि न भासेत यदि तस्यैव देहभाक्। सर्वं देहप्रकाशस्यैव गास्ते न तु स्वतः ॥२१॥ अन्तर्बहिर्वा सर्वं वा यं देशं परिकल्पये
त्। बुद्धिस्तद्देशगः साक्षी तथा वस्तुषु योजयेत् ॥२२॥ यद्यद्रूपादि कल्प्येत बुध्यात्तत्तत्प्रकाशयन्। तस्य तस्य भवेत्साक्षी
स्वतो वाग्बुद्ध्यगोचरः ॥२३॥ कथं तादृङ्मया ग्राह्य इति चेन्मैव गृह्यताम्। सर्वग्रहोपसंशान्तौ स्वयमेवावशिष्यते ॥२४॥
न तत्र मानापेक्षास्ति स्वप्रकाशस्वरूपतः। तादृग्व्युत्पत्यपेक्षा चेच्छ्रुतिं पठ गुरोर्मुखात् ॥२५॥ यदि सर्वं ग्रहत्यागो शक्य
स्तर्हि धियं व्रज॥ शरणं तदधीनोऽन्तर्बहिर्वैषोऽनुभूयताम् ॥२६॥ इति नाटकदीपः समाप्तः ॥८॥

चैतन्ये न शायां मायायां शिष्य
ते स्वयमित्युक्तं परमात्मावशेषणं न सिध्येदित्यत आह। सर्वग्रहेति। स्वात्मा तिरिक्त स्य द्वैतस्य मिथ्यात्वनिश्चयेन तत्प्रतीत्युपशान्तौ स्वा
त्मैव सत्यतया वशिष्यत इति भावः ॥२४॥ यद्युक्तन्यायेन स्वात्मापरिशिष्यते तथा तदा परोक्ष्याय किंचित्प्रमाणमपेक्षितमि
त्यत आह। न तत्रेति। ननु ह तन्मात्राह। स्वप्रकाशेति। नन्वात्मा स्वप्रकाशतया स्वस्फूर्तौ मानं नापेक्षतामिति। ... सिद्धये मानम
पेक्षितमित्याशंक्य श्रुतिरेव प्रमाणमित्याह। तादृगिति ॥२५॥ तत्र मुख्यमाधिकारिणामात्मानुभवोपायमभिधाय मंदाधिका

रि०

...तेन तदधीनः परमात्मा तथैवानुभूयतामित्यर्थः ॥२६॥
इति नाटकदीपव्याख्या समाप्ता ॥८॥

167

४७

श्लोक		पत्र
१६५	तत्वविवेक	१७
१०९	भूतविवेक	१०
६९	द्वैतविवेक	८
४३	पंचकोशविवेक	७
८	महावाक्यविवेक	२
२९०	चित्रदीप	[illegible]
२९९	तृप्तिदीप	३८
७५	कूटस्थदीप	९
१५८	ध्यानदीप	१५
२५	नाटकदीप	४

ब्रह्मानंदपंचक

श्लो		पत्र
१३३	योगानंद	१७
९०	आत्मानंद	१६
१०५	अद्वैतानंद	११
५५	विद्यानंद	३
३५	विषयानंद	३

शुभंभवतु॥ इति दीपपंचकं समाप्तं॥ शके १७८३ आषाढवद्य॥
॥दशम्यां नाटकदीपो घाटोपनाम्ना श्रीकृष्णेन लिखितः॥

श्री॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ ब्रह्मानंदाभिधं ग्रंथं व्याकुर्वे बोधसिद्धये॥१॥ चिकीर्षितस्य ग्रंथस्य निर्विघ्नप
रिपूरणाय परिपंथिकल्मषनिवृत्तये अभिमतदेवतातत्त्वानुसंधानलक्षणं मंगलमाचरन् श्रोतृप्रवृत्तिसिद्धये सप्रयोजनमभि
धेयमाविष्कुर्वन् ग्रंथारंभं प्रतिजानीते॥ ब्रह्मानंदमिति। निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः॥ ये मंदास्तेनुकंप्यंते स
विशेषनिरूपणैः॥ इति सविशेषब्रह्मरूपाणां देवतानां तत्त्वस्य निर्विशेषब्रह्मरूपत्वाभिधानाद्ब्रह्मणश्चानंदो ब्रह्मेत्यादिश्रु
तिभिरानंदरूपताभिधानाद्ब्रह्मानंदमित्यानंदरूपस्य ब्रह्मणो वाचकशब्दप्रयोगेण यद्धि मनसा ध्यायति तद्वाचा वदतीति
श्रुतिसिद्धन्यायेन ब्रह्मानुसंधानलक्षणमंगलाचरणं सिद्धं॥ ब्रह्मणश्च सर्ववेदांतप्रतिपादितत्वात्तत्प्रकरणरूपस्यास्य ग्रं

ब्रह्मानंदं प्रवक्ष्यामि ज्ञाते तस्मिन्नशेषतः॥ ऐहिकामुष्मिकानर्थव्रातं हित्वा सुखायते॥१॥ ब्रह्मवित्परमाप्नोति [illegible]

थस्यापि तदेव विषय इति ब्रह्मशब्देन विषयश्च सूचितः॥ ऐहिकस्यामुत्रस्थ्यनानिष्टनिवृत्तीष्टप्राप्तिरूपं प्रयोजनद्वयं सुखायत इ
त्युक्तं॥ ब्रह्मानंदं ब्रह्म चासावानंदश्चेति ब्रह्मानंदः वाच्यवाचकयोरभेदोपचारात्तत्प्रतिपादकोयं ग्रंथोपि ब्रह्मानंदस्तं प्रवक्ष्यामि त
स्मिन्प्रतिपाद्ये प्रतिपादकरूपे ब्रह्मानंदे ज्ञाते अवगते सति ऐहिकामुष्मिकानर्थव्रातमैहिका अस्मिन्निह लोके भवा ये देहपुत्रादिष्वहंम
माभिमानप्रयुक्ता नानाध्यात्मिकादितापानामामुष्मिकाणाममुष्मिन्परलोके भवानां चैतेषां तेषामनर्थानां व्रातोऽनर्थसमूह
स्तमशेषतो निरवशेषं यथा भवति तथा हित्वा परित्यज्य सुखायते सुखरूपं ब्रह्मैव भवति॥१॥ ब्रह्मज्ञानस्यानिष्टनिवृत्तीष्ट
प्राप्तिहेतुत्वे बहूनि श्रुतिस्मृतिवाक्यानि प्रमाणानि संतीति प्रदर्शयितुकामः स्तावद्ब्रह्मविदाप्नोति परं श्रुतेह्येवमे भगवद्
शोभ्यस्तरति शोकमात्मविदिति सोहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्विति च वाक्यद्वयमर्थतः पठति

169

॥श्री०नं०
॥१७॥

आत्मवित् भ्रमरुद्धवाच्यं देशकालवस्तुपरिच्छेदशून्यमात्मानं वेत्तीति आत्मवित् शोकं स्वसंसक्तेष्टपुरुषेष्टशोऽन्वयतीति शो
कः स तमोमूलः संसारस्तं तरति अतिक्रामति। ननु दाहृतेते त्तिरीयकश्रुतिवाक्ये ब्रह्मज्ञानस्य परप्राप्तिहेतुत्वेवावभासते
नानंदप्राप्तिहेतुत्वं त्याशंक्यानंदप्राप्तिहेतुत्वप्रतिपादनेपरं रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति तत्तीयमेव वाक्य
मर्थतः पठति। रसइति। सत्यं ज्ञानमनंतं ब्रह्म तस्माद्वा एतस्मादात्मन आकाशः संभूत इति प्रकरणादौ ब्रह्मात्मशब्दा
भ्यामभिहितोयमात्मासौ रसः सार आनंदरूप इत्यर्थः। रसमानंदरूपं ब्रह्म लब्ध्वा ब्रह्माहमस्मीति ज्ञानेन प्राप्यानं

शोकं तरति चात्मवित्॥ रसो ब्रह्म रसं लब्ध्वानंदी भवति नान्यथा॥२॥ प्रतिष्ठां विंदते स्वस्मिन्यदा स्याद
थ चाभयः॥ कुरुते स्मिन्नंतरं चेदथ तस्य भयं भवेत्॥३॥ वायुश्चन्द्रः सूर्यो वह्निरिंद्रो मृत्युर्न्मात्तरे तरं॥
कृत्वा धर्मं विजानंतोप्यस्माद्भीत्याचरंति हि॥४॥

नंदी भवति अपरिच्छिन्ननिरतिशयसुखवान्भवति॥ उक्तमर्थं
व्यतिरेकप्रदर्शनेन दृढयति। नान्यथेति। अन्यथा ब्रह्मात्मैकत्वज्ञानं विहाय साधनांतरानुष्ठानेन नानंदी भवतीत्य
र्थः॥२॥ एवमन्वयसुखेनेष्टप्राप्त्यनिष्टनिवृत्तिप्रतिपादनपराणि वाक्यानि प्रदर्श्यान्वयव्यतिरेकाभ्यामनर्थनि
वृत्तिप्रदर्शनपरं यदा ह्येवैष एतस्मिन्नदृश्येनात्म्येनिरुक्तेनिलयनेभयं प्रतिष्ठां विंदते अथ सोऽभयं गतो भवति य
दा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीति। वाक्यद्वयमर्थतोनुक्रामति। प्रतिष्ठामिति। अस्य चा

यमर्थः। यदा यस्मिन्काले हीति विद्वत्प्रसिद्धिप्रदर्शनपरो निपातः। एवेति अयमेवानर्थनिरस्त्युपायो नान्य इति नियमार्थः।
एष मुमुक्षुरेतस्मिन्विद्वदनुभवगम्ये अदृश्ये इन्द्रियागोचरे अनात्म्ये अनात्मीये स्वरूपतयो स्वकीयत्वरहिते अनिरु-
क्ते निरुक्तं निर्वचनं शब्देनाभिधानं यत्र नास्ति तदनिरुक्तं तस्मिन् अनिलयने निलीयते अस्मिन्निति निलयनमाधारः
स न विद्यते यस्मिन्स्वमहिम्नि स्थित इत्यर्थः॥ अभयं द्वितीयाद्वै भयं भवतीति श्रुतेः। भयशब्देनात्र भयहेतुर्भेदो लक्ष्यते तेन
विषते भयं भेदो मे दोयथ्या भवति तथा प्रतिष्ठां प्रकर्षेण संशयविपर्ययराहित्येन स्थितिः ब्रह्माहमस्मीत्यवस्थानं प्र
तिष्ठां तां विंदते गुरूपसत्त्यादिना श्रवणादिकं कृत्वा लभते अथ तदानीमेव स एव विद्वानभयं भयरहितं मोक्षरूपम
द्वितीयं ब्रह्म गतः प्राप्तो भवति। ब्रह्म वेद ब्रह्मैव भवतीति श्रुतेः। यदा यस्मिन्नेव काले एषः एतस्मिन्नदृश्यत्वादिरु
पाके प्रत्यगभिन्ने ब्रह्मणि उदिति निपातोऽपिशब्दार्थो अरं उत अल्पमपि अन्तरं भेदमुपास्योपासकादिलक्षणं कुरुते
पश्यति धातूनामनेकार्थत्वात् अथ तदानीमेव तस्य भेददर्शिनो भयं संसारप्रयुक्तं दुःखं भवति॥ अभेददर्शिनां भयं
भवतीत्येतद्दृढीकर्तुं ब्रह्मात्मैकत्वज्ञानरहितानां वाय्वादीनां भयप्रदर्शनपरं भीषास्माद्वातः पवत इत्यादिमंत्रमर्थतः
पठति। वायुरिति। वाय्वादयो जगन्नियामकत्वेन प्रसिद्धाः पंचापि देवता अतीते जन्मनि धर्ममिष्टापूर्तलक्षणं विज्ञा
नेतो ज्ञानपूर्वकमनुष्ठितवंतोऽप्यन्तरं प्रत्यग्ब्रह्मणो भेदं कृत्वा स्वस्माद्ब्रह्मणो भीत्या अस्मिन्वाय्वादिजन्मनि चरन्ति स्वस्व
व्यापारेषु सदा प्रवर्तन्ते हिशब्देन भयादस्याग्निस्तपति भयात्तपति सूर्यः। भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चम इ
ति कठश्रुतौ यमेनोक्तां प्रसिद्धिं दर्शयति॥ ८॥

॥यो०नं०

॥२॥

ननु तरति ब्रह्मविदित्यादिषूदाहृतेषु वाक्येषु ब्रह्मानंदज्ञानस्यानर्थनिवृत्तिहेतुत्वं स्पष्टं नावभासत इत्याशंक्य तथा प्रतिपादनपरं वाक्यमुदाहरति। आनंदमिति। राहोः शिर इतिवद्भेदव्यपदेश औपचारिकः ब्रह्मणः स्वरूपभूतमानंदं विद्वानपरोक्षतया जानन्पुरुषः कुतश्चन कस्मादपि ऐहिकभयहेतोर्व्याघ्रादेः पारलौकिकहेतोः पापादेर्वा न बिभेति भयं न प्राप्नोति। ननु तत्त्वविदः पापादेर्भयं नास्तीत्येतत्कुतोऽवगम्यत इत्याशंक्य तत्प्रतिपादकमेतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमिति इति वाक्यमर्थतः पठति। एतमिति। कर्माग्निसंभृता पुण्यपापरूपं कर्मैवाग्निरकरणकरणाभ्यामग्निवत्संतापहेतुत्वात्तेन संभृता संपादिता एषा पुण्यं नाकरवं कस्मात्पापं तु कृतवानस्मीत्येवंरूपा चिंता एतं

आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चन॥ एतमेव तपेन्नैषा चिंता कर्माग्निसंभृता॥५॥ स एते विद्वान् कर्मणी हित्वा स्वात्मानं स्मरेत्सदा॥ कृते च कर्मणी स्वात्मरूपेणैवैष पश्यसि॥६॥

मेवंविदमेवं न तपेन्न संतापयेदन्यमविद्वांसं सततं चिंतया सदा संतप्यत इत्यर्थः॥५॥ पुण्यपापयोरतापकत्वे हेतुप्रदर्शनपरं स य एवं विद्वानेते आत्मानं स्पृणुते उभे ह्येवैष एते आत्मानं स्पृणुत इति वाक्यमर्थतः पठति। एवमिति। स योऽयं कश्चित्सुमानेवमुक्तेन [illegible] स यश्चायं पुरुषे यश्चासावादित्ये स एक इत्यनेन प्रकारेण विद्वान् ज्ञानवान्वर्तते स एते पुण्यपापे हित्वेत्यध्याहारः आत्मानं ब्रह्माभिन्नं स्वं च स्पृणुते प्रीणयति सदा स्मरेदित्यर्थः। अतः पुण्यपापयोर्मिथ्यात्वानुसंधानेन हानं कृतमतस्तद्विषया चिंतैव नास्ति कुतस्तन्निमित्तकस्ताप इत्यभिप्रायः। एष विद्वानेते पूर्वोक्ते उभे पुण्यपापरूपे कर्मणी इदं ह्रियादिप्रवृत्या जनिते स्वात्मरूपेणैव इदं सर्वं यदयमात्मेत्यादिवाक्योक्तप्रकारेण जानातीत्यर्थः। अतः स्वात्माभिन्नत्वादप्यतो

पश्यति

कथं

ननु नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीत्यादिशास्त्रसद्भावादनादौ संसारे बहुजन्मार्जितेषु पुण्यापुण्यलक्षणेषु कर्मसु असंख्यातेषु प्रसिद्धत्वेनात्मतत्त्वानुसंधानायोग्येषु सत्सु तद्विषयाचिंता न भवेदित्याशंक्य सनिदानानां तेषां तत्त्वज्ञानेन नाशितत्वाच्चिंताजनकत्वमित्यभिप्रायेण ग्रंथ्यादिनिवृत्तिपरं मुंडकादिषु श्रुतिषु स्थितं वाक्यं पठति। भिद्यत इति। परावरे परमपि हैरण्यगर्भादिकं पदमवरं निकृष्टं यस्मात्तस्मिन्परात्मनि दृष्टे साक्षात्कृते अस्य साक्षात्कारवतः हृदयस्य बुद्धेश्चिदात्मनश्चैकग्रंथिवद्दृढसंश्लेषरूपत्वाद्ग्रंथिरन्योन्याध्यासः भिद्यते विदीर्यते विनश्यतीत्यर्थः। सर्वसंशया आत्मा देहादिव्यतिरिक्तो न वा व्यतिरिक्तोपि कर्तृत्वादिधर्मयोगी न वा अकर्तृत्वेपि तस्य ब्रह्मणो भेदोस्ति न वा अभेदेपि तत्

भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः। क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥ ७॥ तमेव विद्वानत्येति मृत्युं पंथा न चेतरः॥ १०॥

उक्ता नेकर्मादिसहितं मुक्तिसाधनं केवलं वेत्यादयश्छिद्यंते द्वैधीक्रियंते तत्त्वतः साक्षात्कृततत्त्ववस्तुनः संशयविपर्ययविषयत्वादज्ञानादिति भावः। कर्माणि संचितानि पुण्यापुण्यलक्षणानि क्षीयंते स्वनिदानाज्ञानविनाशेन विनश्यंतीत्यर्थः॥ ७॥ ननु कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोस्ति न कर्म लिप्यते नरे इति विधानाद्विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इत्यादिश्रुतेः कर्मणैव हि संसिद्धिमास्थिता जनकादयः यथान्नं मधुसंयुक्तं मधु चान्नेन संयुतं एवं तपश्च विद्या च संयुक्तं भेषजं महदित्यादिस्मृतेश्च केवलस्य वा ज्ञानसमुच्चितस्य वा कर्मणो मुक्तिहेतुत्वं स्यादित्याशंक्योदाहृतवाक्यस्थस्यालेपशब्दस्य पापनिवृत्तिपरत्वात् संसिद्धिशब्देन ज्ञानसाधनचित्तशुद्ध्यभिधानाद्विद्याशब्देन चोपासनाया विवक्षितत्वान्न कर्मणो मुक्तिसाधनत्वमित्यभिप्रायेण साधनांतरनिषेधपरं तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेयनायेति श्वेताश्वतरवाक्यमर्थतः पठ

पत्र ५

यो॰ नै॰
॥३॥

ननु दृष्टान्तासु श्रुतिष्वन्वयव्यतिरेकाभ्यामैहिकानिष्टनिवृत्तिरेवावभासते तेनामुष्मिकी स्यादामुष्मिकस्यानिष्टस्य भाविजन्मपूर्वकत्वात्तस्य सनिदानस्याभावप्रतिपादकं ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैः सर्वदुःखप्रहाणि रिति श्वेताश्वतरवाक्यमर्थतः पठति। ज्ञात्वेति। देवं स्वप्रकाशं प्रत्यगभिन्नं ब्रह्म ज्ञात्वा अपरोक्षतयानुभूय स्थितस्य कामक्रोधादीनां सर्वेषां पाशानां हानिर्भवति। तैः पाशशब्दाभिधेयैः रागादिभिः क्लेशैः क्षीणैर्भाविजन्महेतुकर्मारं भायोगान्न तज्जन्म प्राप्नोतीत्यर्थः॥८॥ ननु शोकसंतरणादिफलं श्रूयत एव नानुभूयते ज्ञानिनामपीष्टानिष्टप्राप्ति परिहारार्थं प्रवृत्तिदर्शनादित्याशङ्क्य दृढापरोक्षज्ञानिनां तदभावप्रतिपादनपरं मध्यात्मयोगाधिगमेन देवं मत्वा

ज्ञात्वा देवं पाशहानिः क्षीणैः क्लेशैर्न जन्मभाक्॥८॥ देवं मत्वा हर्षशोकौ जहात्यत्रैव धैर्यवान्॥ नैनं कृताकृते पुण्यपापे तापयतः क्वचित्॥९॥

धीरो हर्षशोकौ जहातीति कठश्रुतिवाक्यमर्थतः पठति। देवमिति। धैर्यवान् ब्रह्मचर्यादिसाधनसंपन्नः देवं चिदानन्दलक्षणं मत्वावगम्यात्रैवास्मिन्जन्मनि हर्षशोकौ जहाति। एतमेव तपन्नेषा चिन्ताकर्माग्निः संभवतेत्युक्तार्थविशेषप्रदर्शनपरं नैवं हता कृततपते इत्यादिवाक्यब्राह्मणमर्थतः पठति। नैनमिति। पूर्वमकृतं पुण्यं कृतं च पापं तत्त्वविदस्तापहेतु [illegible] न भवतीत्युक्तं। इह तु कृतमकृतं वा पुण्यपापं वा तथाविधतापकं न भवतीत्युच्यत इति विशेषः। तथाहि। तापो नाम चित्तविकारविशेषः कृतं पुण्यं सद्धर्मलक्षणं विकारमुत्पादयति अकृतं विषादं पापं पुनस्तद्विपरीतेन अकृतं हर्षमुत्पादयति कृतं विषादं तत्त्वविदस्तूभयविधविकारहेतुत्वे भवतः अविक्रियब्रह्मरूपत्वज्ञानादित्यभिप्रायः॥९॥ ५ ॥ ५ ॥ ५ ॥ ॰ ॥

प

त्या

न च प्रियं स्वेव वाक्यानि प्रमाणानि नेति हा इत्यादि ॥ आद्य इति देहे च देवेदि दथ सत्यमस्ति नचेदिहावेदीन्महती विनष्टिः य एत
द्विदुरमृतास्ते भवंति अथेतरे दुःखमेवापियंतीति ॥ यो यो देवानां प्रत्यबुध्यत स एव तद्भवत् निचाय्य तं मृत्युमुखात्प्रमुच्य
ते इत्याद्याः श्रुतयो गृहीता सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति स्त्रे
त्रस्यात्मविज्ञानाद्धि शुद्धिः परमा मता इत्यादि पुराण स्मृति वचनैः स्स हृत्प्रमाणानीत्यर्थः ॥ उदाहृतानां सर्वेषां श्रुति
स्मृति वाक्यानां तात्पर्यमाह ॥ ब्रह्मज्ञानमुक्ति ॥ १० ॥ ननु ब्रह्मानंद इत्यानंदस्य ब्रह्मपदेन विशेषणादानंदांतरमस्ती
त्यवगम्यते स कति विधः कीदृशश्चानंद इत्याकांक्षायां तद्भेदप्रदर्शनपूर्वकं ब्रह्मानंदविवेचनं प्रतिजानीते ॥ आनंद

इत्यादि श्रुतयो बह्व्यः पुराणैः स्मृतिभिः सदा ॥ ब्रह्मज्ञानेन नर्थहानिमानंदं चाप्यघोषयन् ॥ १० ॥ आनंदस्त्रिवि
धो ब्रह्मानंदो विद्यासुखं तथा ॥ विषयानंद इत्यादौ ब्रह्मानंदो विविच्यते ॥ ११ ॥ भृगुः पुत्रः पितुः श्रुत्वा वरुणा
द्ब्रह्मलक्षणं ॥ अन्नप्राणमनोबुद्धिस्यक्त्वानंदं विजज्ञिवान् ॥ १२ ॥ इति ब्रह्मानंदो विद्यानंदो विषयानंद इत्यने

न प्रकारेण स्यत्रैविध्यमवगंतव्यं तत्रेतरयोरानंदयोर्ब्रह्मानंदमूलत्वात्प्राधान्यात्तत्र येन ब्रह्मानंदो विभज्य प्रदर्श्य
त इत्यर्थः ॥ ११ ॥ तत्रादौ तावत्तैत्तिरीयश्रुतिपर्यालोचनया मानंदस्य ब्रह्मत्वं गम्यत इत्यभिप्रायेण भृगुवल्ल्यार्थं सं
क्षिप्य प्रदर्शयति ॥ भृगुरिति ॥ भृगुर्नामकः पुत्रः पितुर्वरुणाख्यात् ब्रह्मलक्षणं यतो वा इमानि भूतानि जायंते येन जा
तानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेत्येवं रूपं श्रुत्वा अन्नमयादिकोशेषु तल्लक्षणासंभवेन तेषामब्र
ह्मत्वं निश्चित्यानंदमयकोशे पंचमावयवत्वेन ब्रह्मपुच्छं प्रतिष्ठेति श्रुतं विवभूतमानंदं ब्रह्मलक्षणयोजनया ब्रह्मत्वेन री

पं॰ दी॰
१५४॥

भूतानि प्राणिनो

कथमानंदे तल्लक्षणं योजितवानित्याकांक्षायां तद्योजनाप्रकारं प्रदर्शयन् परमानंदाद्धेव खल्विमानि भूतानि जायंते आनंदेन जातानि
जीवंति आनंदं प्रयंत्यभिसंविशंतीति वाक्यमर्थतः पठति। आनंदादिति। ग्राम्यधर्मनिमित्तकादानंदादेव जायंते उत्पद्यं
ते तेन विषयभोगादिनिमित्तकेनानंदेन जीवनं प्राप्नुवंतीति तेषां प्राणिनां लयश्च तत्र सुषुप्तिकालीने स्वस्वरूपभूते आनंदे ए
व भवति सुषुप्तावानंदातिरेकेण कस्याप्यनुभवाभावात् तत आनंदे ब्रह्मण्येव सर्वानुभवसिद्धत्वान्नात्र संशयः कार्य इत्य
र्थः ॥१३॥ एवं तैत्तिरीयश्रुतिपर्यालोचनया ब्रह्मण आनंदरूपत्वं प्रदर्श्य छांदोग्यश्रुतिपर्यालोचनयापि तदिदं भू
मिषुः सनत्कुमारनारदसंवादरूपे सप्तमाध्याये स्थितस्य भूमब्रह्मप्रतिपादकस्य यत्र नान्यच्छृणोति नान्यद्विजा

आनंदादेव भूतानि जायंते तेन जीवनं। तेषां लयश्च तत्रातो ब्रह्मानंदो न संशयः ॥१३॥ भूतोत्पत्तेः पुरा भूमा त्रिपु
टीद्वैतवर्जनात्। ज्ञातृज्ञानज्ञेयरूपा त्रिपुटी प्रलये हि न ॥१४॥ विज्ञानमय उत्पन्नो ज्ञाता ज्ञानं मनोमयः। ज्ञेयाः
शब्दादयो नैतत्त्रयमुत्पत्तितः पुरा ॥१५॥

नात्ति स भूमेत्यादिवाक्यस्यार्थं संक्षेपेण दर्शयति भूतोत्पत्तेरिति। भूतानामाका
शादीनां तत्कार्याणां जरायुजादीनां चोत्पत्तेः पूर्वं त्रिपुटीद्वैतवर्जनात् त्रयाणां ज्ञातृज्ञानज्ञेयरूपाणां पुटानामाकाराणां
समाहारस्त्रिपुटी सैव द्वैतं तस्य वर्जनमभावस्तस्माद्भूमा देशतः कालतो वस्तुतो वा परिच्छेदशून्यः परमात्मा भावानयने
ऽवस्थानमिति न्यायाद्भूमैवासीदित्यध्याहारः। तदेव द्वैतवर्जनमुपपादयति। ज्ञात्रिति। वक्ष्यमाणज्ञात्रादिरूपा त्रि
पुटी प्रलयकाले नास्तीत्येतत्सर्ववेदांतसंमतमिति हिशब्दं प्रयुंजानस्याभिप्रायः ॥१४॥ इदानीं ज्ञात्रादिस्वरूपं दर्शयति
विज्ञानेति। परमात्मन उत्पन्नो बुद्ध्युपाधिको जीवो विज्ञानमयो ज्ञाता मनसि प्रतिबिंबितमनोमयप्रवृद्ध्या च्यैतन्यं ज्ञा

फलितमाह। त्रयाभाव इति। ज्ञात्रादित्रयाभावे द्वैतरहितः पूर्ण एवात्मा अनुभूयते। कुत्रानुभूयत इत्यत आह। समाधाविति। विद्वदनुभ
वप्रदर्शनाय समाधिग्रहणं सर्वानुभवद्योतनाय सुप्तिमूर्छयोरुदाहरणं सुप्तोत्थितस्याद्वैतादर्शनस्मरणान्यथानुपपत्त्या
निर्द्वैतस्य तदनुभवितुः सिद्धिरिति भावः। भवतु सुप्त्यादावद्वैतसिद्धिः प्रकृते किमायातमत आह। पूर्ण इति। यथा सुप्त्यादौ परि
च्छेदकाभावात्परिपूर्णस्तथा सृष्टेः पुरापि तदभावात्पूर्ण इत्यर्थः॥१६॥ अस्तु ब्रह्मणः पूर्णत्वमानंदरूपत्वे किमायातमित्या
शंक्यान्वयव्यतिरेकाभ्यां भूम्नः सुखरूपत्वप्रदर्शनपरं यो भूमा तत्सुखं नाल्पे सुखमस्तीति वाक्यमर्थतोऽनुक्रामति। यो भूमे
ति। यः पूर्वोक्तो भूमा सुखरूप एव द्वितीयदुःखहेतोरभावादल्पे परिच्छिन्ने तस्यैव विवरणं त्रेधा विभेदिनीति हेतुगर्भविशेषणं सु

त्रयाभावे तु निर्द्वैतः पूर्ण एवानुभूयते॥ समाधिसुप्तिमूर्छासु पूर्णः सृष्टेः पुरा तथा॥१६॥ यो भूमा स सुखं नाल्पे सुखं
त्रेधा विभेदिनि॥ सनत्कुमारः प्राहैवं नारदायातिशोकिने॥१७॥ सपुराणान्पंच वेदाञ्छास्त्राणि विविधानि च॥
ज्ञात्वाप्यनात्मवित्त्वेन नारदोऽतिशुशोच ह॥१८॥ वेदाभ्यासात्पुरा तापत्रयेण शोचितः॥ पश्चात्त्वभ्यासविस्मारभंगग

खतत्त्वेन विद्यत इत्यर्थः। एवं कस्मै केनाभिहितमित्यत आह। सनत्कुमार इति। नारदस्य शिष्यत्वे कारणमाह। अतिशोकि
न इति। अतिशयितो यः शोकः कोऽयस्येति अतिशोकी तस्मै तस्यातिशोकित्वे कारणमाह। सपुराणानिति। नारदः पुरा
णैः सह वर्तंत इति सपुराणाः पंच वेदाः तान् विविधानि शास्त्राणि च विदित्वाप्यात्मज्ञानरहितत्वेनातिशुशोच शोकमाप सः।
ननु वेदशास्त्राणां विषयज्ञानस्य शोकनिवर्तकत्वेन प्रसिद्धस्य कथमतिशोकहेतुत्वमित्यत आह। वेदेति। तापत्र
येणाध्यात्मिकादिलक्षणेन शोकितः शोकोऽस्यास्तीति शोकी तस्य भावस्तत्ता आसीदित्यध्याहारः। पश्चादिति। तु
शब्दो विशेषद्योतनार्थः। अभ्यासः पाठाद्यावर्तनं विस्मारः पठितस्य विस्मरणं भंगः स्वतोऽधिकेन तिरस्कारः गर्वोन्यू

॥यो०नं०
॥५॥

ननु सर्वज्ञस्यापि नारदस्यार्त्तिशोकः किं त्वं जातमिति कुतोवगम्यते इत्याशंक्य सोहं भगवः शोचामीति तितरीयादेव वाक्यादवगतमित्यभि
प्रेत्य तं मा भगवान्शोकस्य पारं तारयत्विति तितं निर्वत्सुपायेते नपृष्टे सनत्कुमारो भूमज्ञात्वान्यं सुखरूपं ब्रह्मैव ज्ञातव्यमानं शोकं भि
इत्युपाय इति सुखं त्वेव जिज्ञासितव्यमित्यारभ्योत्तरग्रंथसंदर्भेणोक्तवानित्याह। सोहमिति। ननु स्वर्गादिजन्येषु सुखेषु बहुषु स
त्सु नाल्पे सुखमस्तीत्युक्तिरनुपपन्नेति चेन्न तेषां दुःखानुषंगेण विषसंपृक्तान्नवद्दुःखरूपत्वस्य मुनिनाभिप्रेत्याह। सुखमि
ति। द्वैते सुखाभावमंगीकृत्याद्वैतेपि तमाशंकते। नन्विति। तत्रानुपलब्धिं प्रमाणयति। अस्ति चेदिति। अद्वैते सुखं यदि विद्यते

सोहं विद्वन्शोचामि शोकपारं नयात्र मां॥ इत्युक्तः सुखमेवास्य पारमित्यभ्यधादृषिः॥२०॥ सुखं वैषयिकं शोकसहस्रे
णावृतत्वतः॥ दुःखमेवेति मत्वाह नाल्पेऽस्ति सुखमित्यसौ॥२१॥ ननु द्वैते सुखं माभूदद्वैतेप्यस्ति नो सुखं॥ अस्ति चेदुपल
भ्यतं तथा च त्रिपुटी भवेत्॥२२॥ मास्त्वद्वैते सुखं किंतु सुखमद्वैतमेव हि॥ किं मानमिति चेन्नास्ति मानाकांक्षा स्वयंप्रभे॥
॥२३॥ स्वप्रभत्वे भवद्वाक्यं प्रमाणं यस्माद्भवानिदं॥ अद्वैतमभ्युपेत्यास्मिन्सुखं नास्तीति भाषते॥२४॥

तर्हि विषयसुखा
द्विवदुपलभ्येत नोपलभ्यते तो नास्तीत्यर्थः। ननूपलभ्यत एवेत्याशंक्य मानं प्रत्याह। तथा चेति। अनुभवस्यानुभवित्रनुभाव्यसापेक्ष
त्वाद्द्वैतहानिरिति भावः॥ अद्वैतस्य सुखाधिकरणत्वनिषेधमंगीकृत्याह सिद्धांती। मास्त्विति। तत्र हेतुमाह। किंत्विति। हियस्मा
त्कारणादद्वैतमेव सुखमतः सुखाधिकरणं न भवतीत्यर्थः। अद्वैतं सुखमित्यत्र किं प्रमाणमित्याशंक्य कान्तवादपूर्वकं तस्य स्व
प्रकाशत्वात्प्रमाणप्रश्न एवानुपपन्न इत्याह। किं मानमिति। ननु स्वप्रकाशत्वेपि किं प्रमाणमित्याशंक्य स्वदायमेव वचनं प्रमा
णमित्याह। स्वप्रभत्व इति। तदुपपादयति यस्मादिति। यतः कारणाद्भवताप्रमाणनैरपेक्ष्येणाद्वैतमभ्युपेत्य सुखमेवाक्षिप्यते

नाभ्युपैमीति। विकल्पासहत्वाद्द्वैतानभ्युपगमोऽनुपपन्न
नमयाद्वैतमभ्युपगम्यते किंतु त्वदुक्तमद्वैतमनूद्य दूष्यते ततो नोक्तसिद्धिरित्याशंकते॥ नाभ्युपैमीति। विकल्पासहत्वाद्द्वैतानभ्युपगमोऽनुपपन्न
इति मन्वानः पृच्छति। तद्देति। किंरूपद्वैतस्य चित्ते विकल्पं दर्शयति। किमद्वैतमिति। तृतीयपक्षं निराकरोति। अंतिमइति। द्वैताद्वैतविलक्षण
इति मन्वानः पृच्छति। ... तत्र हेतुमाह। अनुत्पत्तेरिति। अतः प्रथमः पक्षः प
स्य स्वरूपस्यलोकेऽदर्शनादितिभावः॥ द्वितीयपक्षं निराकरोति। नद्वितीयइति। ... अद्वैतेति। अद्वैतसिद्धिर्युक्त्यैवेत्युक्ते
रिशिष्यतइत्याह। शिष्यतइति। ननूक्तप्रकारेणाद्वैतंयुक्त्यैव सिध्यति नानुभवेनेति चोदयति। नानुभूतिरिति। अद्वैतसिद्धि
विकल्पासहत्वादनुपपन्नमिति मन्वानो युक्तिं विकल्पयति। को हीति। प्रथमपक्षं सोपहासं निराकरोति। ... अत्र श्लो
नाभ्युपैम्यहमद्वैतं त्वद्वचो दूषणं॥ ब्रवीति चेत्तदा ब्रूहि किमासीद्द्वैततः पुरा॥२५॥ किमद्वैतं किमुद्वैतं द्वैताद्वैतविलक्षणं। न तृतीयं ... अत्र
सिद्धो न द्वितीयो नुत्पत्तेः शिष्यते प्रथमः॥२६॥ अद्वैतसिद्धिर्युक्त्यैव नानुभूत्येति चेद्वद॥ निर्दृष्टांता सदृष्टांता वा को द्यतरा
मत्रनो॥२७॥ नानुभूतिर्न दृष्टांतो इति युक्तिः सुसंमतेः॥ सदृष्टांतपक्षे तु दृष्टांतं वद मे वचः॥२८॥ अद्वैतः प्रलयो द्वैतानुप
लंभेन सुसुप्तिवत्॥ इति चेत्सुसुप्तिरद्वैते त्वत्र दृष्टांतमीरय॥२९॥ दृष्टांतः परसुसुप्तिश्चेत्कदा तेको नलेमहत्॥ यः स्वसुसुप्तिर्न वेत्स्य
र्युक्त्यैवेति वदता नुभूतिस्तावन्नाभ्युपेयते युक्तिस्तु दृष्टांतप्रदर्शनं मतं तेणान किंचित्साध्ययस्य तो न दृष्टांत इत्युक्तिः स्युक्तेतिभावः
द्वितीयपक्षं संप्रतिपन्नो दृष्टांतो वक्तव्य इत्याह। सदृष्टांतेति। तहि दृष्टांते नैवाद्वैतं सो ध्यामीति शंकते पूर्ववादी। अद्वैत इति।
प्रलयो द्वैतरहितो भवितुमर्हति द्वैतानुपलब्धिमत्वात् यो यो द्वैतानुपलब्धिमान् स सद्वैतरहितः यथा स्वाप इति। न त्वेवं साध्यत
स्तव स्वसुषुप्तिर्दृष्टांतः परसुषुप्तिर्वा। आद्ये तस्याः परंप्रत्यसिद्धत्वेन तत्सिद्धये दृष्टांतांतरं वक्तव्यमित्याह। सुसुप्तिरिति। न
नुतस्याः परसुसुप्तिरेव दृष्टांत इति द्वितीयविकल्पमाशंकते। दृष्टांत इति। परसुसुप्तेस्तावप्रसिद्धत्वेन तया दृष्टांतीकरणमनुप

११८

नन्वनुमानात्सुखसुप्तिसिद्धिरिति शंकते। निश्चेष्टत्वादिति। विमतः पुरुषः सुप्तो भवितुमर्हति प्राणादिमत्वे सति निश्चेष्टत्वान्मद्व
दित्यनुमानादित्यर्थः। एवं तर्हि तत्र सुप्तेः स्वप्रकाशत्वं हीयेतेत्याह सिद्धान्ती। तदेति। तदा तर्हि मां प्रति स्वासुसुप्तिमुदाहृत्य दृ
ष्टान्तीकृत्य तत्र सुप्तेः स्वप्रभत्वे स्वप्रकाशत्वं बलात्सुषुप्त्युदाहरणसामर्थ्यादेव भवेत्। कथं बलाद्भवति इत्याशंक्याह। नेति। सु
सुप्तावहंकारेन्द्रियाणि न सन्ति तेषां स्वकारणे लीनत्वात् दृष्टान्तश्च संप्रतिपन्नो नास्ति परसुप्तेरप्रसिद्धत्वात् स्वीयसुप्तेस्तु तथापि तां
सुप्तिमंगीकरोषि एवं च सति साधनैर्विना ज्ञानसाधनमन्तरेणापि भानं प्रकाशनमिति यदिदमेव स्वप्रकाशत्वं सुषुप्त्याः॥

निश्चेष्टत्वात्परः सुप्तो यथाहमिति चेत्तदा। उदाहर्तुः सुषुप्तेस्ते स्वप्रभत्वं बलात्सतः॥ २१॥ नेन्द्रियाणि न दृष्टान्तस्तथाप्यंगी
करोषि ताम्। इदमेव स्वप्रभत्वं यद्ज्ञानसाधनैर्विना॥ २२॥ स्वात्मद्वैतस्वप्रभत्वे वद सुप्तौ सुखं कथम्। शृणु दुःखं तदा नास्ति
ततस्ते शिष्यते सुखम्॥ २३॥ अन्धः सन्नप्यनन्धः स्याद्विद्धो विद्धोऽथ रोग्यपि। अरोगीति श्रुतिः प्राह तच्च सर्वे जना विदुः॥ २४॥

इत्यर्थः। अत्रायं प्रयोगः। विमता सुप्तिः स्वप्रकाशा असत्स्वपि ज्ञानसाधनेषु प्रकाशमानत्वात् सांख्याभिमतात्मवत् प्राभाक
रीयसंवेदनवत् त्वयाभिमतस्वात्मवदित्यर्थः। इदं प्रलयस्य दृष्टान्तत्वेनोदाहृतायाः सुषुप्तेरद्वैतत्वं स्वप्रभत्वं च प्रसाध्य
तत्र सुखसाधनाय पूर्वपक्षिणमाशंकामुत्थापयति। स्वात्मेति। सुखप्रतियोगिनो दुःखस्य तदानीमसत्त्वात् सुखमेव परिशि
ष्यत इत्याह। शृण्विति। सुखदुःखयोः प्रकाशतमसोरिव परस्परविरोधित्वात् दुःखाभावे सुखमेवाभ्युपेयमिति भावः। ननु दुः
खाभावे किं मानमित्याकांक्षायां श्रुत्यनुभवाविरोध्याह। अन्ध इति। तस्माद्वा एतं सेतुं तीर्त्वान्धः सन्ननन्धो भवति विद्धः सन्नवि
द्धो भवति उपतापी सन्ननुपतापी भवतीति तथापीदं भेदावः शरीरसंबन्धभवत्वेन पुंसः संभवतीत्यादिश्रुतिभिरहंभिमानप्र
युक्तान्धत्वादीन्दोषान्सुप्तो निवारयति। व्याध्यादिनापीड्यमानस्यापि सुप्तौ तद्दुःखानुभवो नास्तीत्येतत्सर्वजनप्रसिद्धं चे

180

ननु यत्र दुःखाभावस्तत्र सुखमित्यस्या व्याप्तेर्लोष्टादौ व्यभिचार इति चेत् कृते। नदुःखेति। दुःखाभावमात्रेण सुखं कल्पयितुं न शक्यते लोष्ठशिलादिषु द्वयाभावस्य दर्शनादित्यर्थः। दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यान्नैवमिति परिहरति। विषममिति। वचोदृष्टान्तवचनं विषमं दार्ष्टान्तिकाननुसारीत्यर्थः। दृष्टान्तस्याननुकूलत्वमेवोपपादयति। सुखेति। अन्यनिष्ठयोः सुखदुःखयोरूहनं यथाक्रमं सुखदैन्यविकासाभ्यां लिंगीकर्तव्यमयं दुःखी विषण्णवदनत्वात्संप्रतिपन्नवदिति अयं सुखी प्रसन्नवदनत्वात्संप्रतिपन्नवदित्यर्थः। भवत्वेवं प्रकृते किमायातमित्यत आह। दैन्येति। लोष्टादौ सुखदैन्यादिलिंगाभावाद् दुःखसुखयोरूहनमेव न संभवति। अतस्तत्र दुःखाभावोपि न निश्चेतुं शक्यत इति भावः इदानीं परकीयसुखदुःखाभ्यां स्वकीयसुख

लोके

नदुःखाभावमात्रेण सुखं लोष्ठशिलादिषु॥ द्वयाभावस्य दृष्टत्वादिति चेद्विषमं वचः॥२५॥ सुखदैन्यविकासाभ्यां परदुःखसुखोहनं॥ दैन्याद्यभावतो लोष्टे दुःखाद्यूहो न संभवेत्॥२६॥ स्वकीयसुखदुःखे तु नोहनीये ततस्तयोः॥ भावो वेद्योनुभूत्यैवं तदभावोपि नान्यथा॥२७॥ तथा सति स्वसुप्तौ च दुःखाभावोनुभूतितः॥ विरोधि दुःखराहित्यात्सुखं निर्विघ्नमिष्यतां॥२८॥ महत्तरप्रयासेन मृदुशय्यादिसाधनं॥ कुतः संपाद्यते सुप्तौ सुखं चेत्तर्हि नो भवेत्॥२९॥

योर्वैषम्यं दर्शयति। स्वकीयेति। स्वनिष्ठयोस्तु सुखदुःखयोरनुभवसिद्धत्वान्नानुमेयत्वं यतस्ततस्तयोः सुखदुःखयोर्भावः सत्तानुभूत्यैव यथावेद्यः प्रत्यक्षेणावगम्यते तथा तदभावोपि तयोः सुखदुःखयोरभावोप्यन्यतो न्यस्मादनुमानादेर्नैव गम्यते किंतु प्रत्यक्षेणैवेत्यर्थः। फलितमाह। तथा सतीति। तथा सति स्वकीयस्य सुखदुःखादेरनुभवगम्यत्वे सति स्वसुप्तौ स्वकीयसुप्तावपि विद्यमानो दुःखाभावोनुभवेनैव सिद्धः। ततोपि किं तत्राह। सुप्तौ सुखविरोधिनो दुःखस्याभावान्निर्विघ्नं बाधरहितं सुखमिष्यतां। शय्यादिसुखसाधनान्यथानुपपत्त्यापि सुप्तौ सुखमस्तीत्यवगम्यत इत्याह। महत्तरेति। तत्र तस्याः सुप्तौ सुखं न भवेच्चेन्महत्तरप्रयासेन बहुवित्तव्ययशरीरपीडादिना मृदुतल्पशय्यादिकं त्रिपुंसां चादिसाधनं सुख

विरोधीति॥

॥यो०नि०
॥७॥

अर्थापत्तेरन्यथोपपत्तिं कुरुते॥ दुःखेति॥ एत[illegible]शय्यादिसाधनसंपादनं दुःखनिवृत्तिफलकं न नियतमिति परिहरति॥
रोगिण इति॥ रोगादिदुःखसत्त्वे निवृत्तये तत्त्वेतु तदभावे तु निवर्त्यदुःखाभावात्तत्संपादनं सुखायैवेति गम्यत इत्यर्थः॥ न
नु सौषुप्तसुखस्य शय्यादिसाधनजन्यत्वे आत्मस्वरूपत्वं व्याहन्येत॥ तर्हीति॥ किं निद्रागमनात्पूर्वकालीनस्य विषयजन्य
त्वमुच्यते उत निद्राकालीनस्येति विकल्प्याद्यमंगीकरोति॥ भवत्विति॥ द्वितीयं निराकरोति॥ निद्रायामिति॥ सुषुप्तौ शय्या
द्यनुसंधानाभावात्तज्जन्यत्वं तस्य न संभवतीति भावः॥ ननु निद्रायामजन्यं सुखं यद्यस्ति तर्हि तद्विषयसुखवत्कुतो नानु

स्तेत

दुःखनाशार्थमेवैतदिति चेद्रोगिणस्तथा॥ भवं त्वरोगिणस्तु सुखायैवेति निश्चिनु॥८०॥ तर्हि साधनजन्यत्वात्सुखं वैष
यिकं भवेत्॥ भवत्वेवात्र निद्रायाः पूर्वं शय्यासनादिजं॥८१॥ निद्रायां तु सुखं यत्तज्जन्यते केन हेतुना॥ सुखाभिमुख
धीरादौ पश्चान्मज्जेत्परे सुखे॥८२॥ जागरव्यापृतिभिः श्रांतो विश्रम्याथ विरोधिनि। अपनीते स्वस्थचित्तोऽनुभवेद्विष
ये सुखं॥८३॥

भूयते इत्याशंक्यानुभवितुस्तदा तस्मिन्निमग्नत्वान्न विषयसुखवत्तदनुभव इत्यभिप्रायेणाह॥ सुखेति॥ आदौ निद्रायाः
पूर्वस्मिन्काले जीवः सुखाभिमुखधीः शय्यादिजन्यसुखाभिमुखा धीर्यस्य स तथोक्तः तथाविधो भवेत् पश्चान्निद्राका
ले परे उत्कृष्टे सुखे स्वरूपसुखे मज्जेद्विलीनो भवेत्॥ संक्षेपेणोक्तमर्थं श्लोकत्रयेण प्रपंचयति॥ जागरव्यापृतिभिरित्यादिना
जीवो जागरव्यापृतिभिः जागरणावस्थायां क्रियमाणैर्व्यापारविशेषैः श्रांतो विश्रम्य मृदुशय्यादौ शयनं कृत्वा अथानं
तरं विरोधिनि व्यापारजनिते दुःखे अपनीते निवारिते सति स्वस्थचित्तः अव्याकुलमना भूत्वा शय्यादौ विषये जायमानं
सुखमनुभवेद्विषयीकुर्यात्॥८३॥

विषयसुखं कीदृशमित्याकांक्षायां तत्स्वरूपं प्रदर्शयन्नुपरे सुखे निमज्जननिमित्तत्वेन तदनुभवे विश्रमं दर्शयति ॥ आसे
ति ॥ अनागतविषयसंपादनादिना दुःखमनुभूय तन्निवृत्तये मृदुशय्यादौ शयानस्य बुद्धिरन्तर्मुखा भवति ॥ तस्यां च
बुद्धिवृत्तौ स्वरूपभूत आनंदः स्वाभिमुखे दर्पणे मुखमिव प्रतिबिंबति एष हि विषयानंदो ॥ अपि अस्यां वेलायामेनं विष
यानंदमनुभूयानुभवितृ अनुभवानुभाव्यलक्षणं त्रिपुट्या श्रमं प्राप्नुयात् ॥ ततः किं तत्राह ॥ तच्छ्रमस्येति ॥ तस्य त्रिपु
टीदर्शनजनितस्य श्रमस्यापनोदनाय स एव जीवः परमात्मन्यानंदरूपे ब्रह्मणि धावेच्छीघ्रं गच्छेत् ॥ तथा च तत्तेन ब्रह्मणै
क्यतादात्म्यं गत्वा सता सोम्य तदा संपन्नो भवतीति श्रुतेः ॥ स्वयमपि तत्रस्थस्तस्यां सुषुप्तौ स्थितो ब्रह्मानंदो भवेत् ॥ ७५

आस्याभिमुखधीवृत्तावानंदः प्रतिबिंबति ॥ अनुभूयेनमत्रापि त्रिपुट्या श्रांतिमाप्नुयात् ॥ ७४ ॥ तच्छ्रमस्यापनुत्यर्थं
जीवो धावेत्परात्मनि ॥ तेनैक्यं प्राप्य तत्रस्थो ब्रह्मानंदः स्वयं भवेत् ॥ ७५ ॥ दृष्टान्ताः शकुनिः श्येनः कुमारश्च महानृपः
महाब्राह्मण इत्येते सुप्तानंदे समीरिताः ॥ ७६ ॥ शकुनिः सूत्रबद्धः सन्दिक्षु व्यापृत्य विश्रमं ॥ अलब्ध्वा बंधनस्था
नं हस्तस्तंभाद्युपाश्रयेत् ॥ ७७ ॥

अस्मिन्नुपपादिते सौषुप्ते आनंदे शकुन्यादयो बहवो दृष्टान्ताः श्रुत्युक्ता विद्यंत इ
त्याह ॥ दृष्टान्ता इति ॥ शकुन्यादिभिः पंचभिर्दृष्टान्तैः सुषुप्तावानंदोपपादनेन तत्र सुखं नास्तीति मतं निराकृतं ॥ तत्र ताव
स यथा शकुनिः सूत्रेण बद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बंधनमेवोपाश्रयत एवमेव खलु सोम्य तन्मनो दि
शं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपाश्रयते प्राणबंधनं हि सोम्य मन इत्यस्य दृष्टान्तदार्ष्टान्तिकप्रतिपा
दनपरस्य छांदोग्यश्रुतिवाक्यस्यार्थं संक्षेपेण दर्शयति श्लोकद्वयेन ॥ शकुनिरित्यादिना ॥ हस्तादौ बद्धो विद्याधारसू
त्रेण बद्धः शकुनिः पक्षी आहारादिग्रहणाय दिक्षु मार्गादिषु व्यापारं कृत्वा तत्र विश्रमं विश्रम्यतेऽस्मिन्निति विश्र

॥ ८० ॥

183

तथा जीवोपाधिभूतं मनो पि पुण्यापुण्यफलयोः सुखदुःखयोरनुभवाय स्वप्नजाग्रदवस्थयोस्तत्र तत्र भ्रांत्वा भोगप्रदे
कर्मणि क्षीणे सति स्वोपादानेऽज्ञाने विलीयते तल्लये च तदुपहितो जीवः परमात्मैव भवतीत्यर्थः। एवं श्येनदृष्टांतप्रपंचे
न परस्य तत्त्वं यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रांतः संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरु
ष एतस्मा अन्ताय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यतीति बृहदारण्यकवाक्यस्यार्थं संक्षि
प्याह। श्येनस्त्विति। यथाकाशे सर्वतः प्रचरन् श्येन एतन्नामा पक्षी गगने संचारनिमित्तश्रमपरिहाराय शायितुं श्रय

जीवोपाधिर्मनस्तद्वद्धर्माधर्मफलाप्तये॥ स्वप्ने जागृति च भ्रांत्वा क्षीणे कर्मणि लीयते॥६८॥ श्येनो वेगेन नीडैकलं
पटः शायितुं व्रजेत्॥ जीवः सुप्तौ तथा धावेद्ब्रह्मानंदैकलंपटः॥६९॥ अतिबालः स्तनं पीत्वा मृदुशय्यागतो ह
सन्॥ रागद्वेषाद्यनुत्पत्तेरानंदैकस्वभाववान्॥७०॥ महाराजः सार्वभौमः संतृप्तः सर्वभोगतः॥ मानुषानंद
सीमानं प्राप्यानंदैकमूर्तिमान्॥७१॥ महाविप्रो ब्रह्मवेदी कृतकृत्यत्वलक्षणां॥ विद्यानंदस्य परमां काष्ठां प्रा

नेकर्तुं नीडैकलंपटः कुलायैकाभिलाषवान् व्रजेत् शीघ्रं गच्छेत् तद्वदेव जीवो मनउपाधिकश्चिदाभासोपि ब्रह्मानंदैका
भिलाषवान् स्वापाय शीघ्रं गच्छेत् हृदयाकाशमिति शेषः। स यथा कुमारो वा महाराजो वा महाब्राह्मणो वातिघ्नीमान
दस्य गत्वा शयीतैवमेवैष एतच्छेत इति कुमारादिदृष्टांतप्रदर्शनपरं वाक्यं श्लोकत्रयेण व्याच
ष्टे अतिबाल इत्यादिना। यथा स्तनंधयः शिशुः रागलः स्तनं पीत्वा मृद्वादियोगिनि तल्पे शायितः स्वकीयादिज्ञान
शून्यत्वेन रागादिरहितः सन् सुखमूर्तिरेव तिष्ठति। यथा वा सार्वभौमो राजा विराट् बुद्धिलेपि सर्वैर्मानुषानंदैर्युक्तत्वा

नन्वेते कुमारादयस्त्रय एव किमिति दृष्टांतीकृता नान्ये इत्याशंक्य दृष्टांतत्रयोदाहरणे तात्पर्यमाह। मुग्धेति। विवेकशून्यानाम
ध्येऽतिबालः सुखी विवेकिषु सार्वभौमोऽति विवेकिषु ज्ञानेदास्य साक्षात्कारवानेव इतरे तु सर्वदोषरागादिमत्त्वेनासुखिन इ
ति न दृष्टांतीकृता इत्यर्थः। भवंत्वेते सुखिनः प्रकृते किमायातमित्याशंक्य दार्ष्टांतिकश्रुतिवाक्यस्य तात्पर्यमाह। कुमारा
दिवदिति। कुमारादिवत्कुमारादयो यथानंदभाज एवमयमपि सुषुप्तो ब्रह्मानंदैकतत्परः ब्रह्मानंदैकभागित्यर्थः। ब्र
ह्मानंदैकपरत्वे युक्तिप्रदर्शनपरं तद्यथा प्रियया संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमेवायं पुरुषः प्राज्ञेनात्मना संप

मुग्धबुद्ध्यतिबुद्धानां लोके सिद्धा सुखात्मता। उदाहृता नामन्ये तु दुःखिनो न सुखात्मकाः॥५५३॥ कुमारादिवदे
वायं ब्रह्मानंदैकतत्परः॥ स्त्रीपरिष्वक्तवद्वेद न बाह्यं नापि चांतरं॥५५४॥ बाह्यं रथ्यादिकं वृत्तं गृहकृत्यं तथांतरं।
तथा जागरणं बाह्यं नाडीस्थः स्वप्न आंतरः॥५५५॥ पितापि सुप्तावपितेत्यादौ जीवत्ववारणात्। सुप्तो ब्रह्मैव नो
जीवः संसारित्वासमीक्षणात्॥५५६॥ रिष्वक्तो न बाह्यं किंचन वेद नांतरमिति ज्योतिर्ब्राह्मणगतवाक्यमर्थतोऽनुक्रा

मति। स्त्रीति। यथा लोके प्रियया स्त्रिया संपरिष्वक्तो ऽलिंगितः कामी बाह्याभ्यंतरज्ञानशून्यत्वात्सुखमूर्तिर्भव
ति। तथा सुप्तो प्राज्ञः परमात्मनैक्यं गतो जीवो बाह्यादिविषयज्ञानाभावादानंद एव भवति। अत्र दृष्टांतदार्ष्टांतिकवा
क्यस्थयोर्बाह्याभ्यंतरशब्दयोर्विवक्षितमर्थं क्रमेण दर्शयति। बाह्यमिति। वृत्तं वृत्तांतः नाडीस्थः जाग्रद्वासनया ना
डीमध्ये प्रतीयमानप्रपंचः स्वप्न इत्युच्यते। जीवः सुप्तो ब्रह्मानंदरूपेणैवावतिष्ठत इत्यत्र युक्तिप्रदर्शनपरायाः अत्र पि
ता पिता भवतीत्यादिकायाः श्रुतेस्तात्पर्यमाह। पितापीति। अत्र सुप्तावध्यासिकानां पितृत्वादिजीवधर्माणां श्रुत्यैव

॥यो॰ नं॰
११९॥

ननु पित्तत्वाद्यभिमानाभावे पि सुखित्वादिसंसारः किं न स्यादित्याशंक्य संसारस्य देहाभिमानमूलत्वात्तदभावे भाव इति मत्वा
न त्तत्प्रतिपादकं तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य भवतीति समनंतरवाक्यं तत्तास्यर्यतो व्याचष्टे । पित्तत्वादीति । ननूदा
हृताभिः श्रुतिभिर्न सुखप्राप्तिः सुखत्तो भिधीयमानोपलभ्यत इत्याशंक्य तथाभिधानपरं केवल्यश्रुतिवाक्यमर्थतः पठ
ति । सुषुप्तीति । सकले जाग्रदादिलक्षणे प्रपंचे विलीने स्वोपादानभूतायां तमःप्रधानायां प्रकृतौ विलयं गते सति तमसा त
याप्रकृत्या आवृत आच्छादितो जीवः सुखरूपं ब्रह्मोपैतीति तस्याः श्रुतेरर्थः । न केवलमयं श्रुतिसिद्धोऽर्थः किं तु सर्वानुभव

पित्तत्वाद्यभिमानो यः सुखदुःखाकरः स हि ॥ तस्मिन्नपगते तीर्णः सर्वाञ्छोकान्भवत्ययं ॥५७॥ सुषुप्तिकाले स
कले विलीने तमसावृतः ॥ सुखरूपमुपैतीति ब्रूते ह्याथर्वणी श्रुतिः ॥५८॥ सुखमस्वाप्समत्राहं नैव किंचिदवेदिषं ॥
इति तेतु सुखाज्ञाने परामृष्टे प्रबोधितः ॥५९॥ परामर्शो नुभूतेऽस्तीत्यासीदनुभवस्तदा ॥ चिदात्मत्वात्स भाति सुख
मज्ञानधीस्ततः ॥६०॥
सिद्धोपीत्याह । सुखमिति । सुषुप्त्यादुत्थितः पुरुषः एतावंतं कालं सुखमहमस्वाप्सं न हि किंचि
दवेदिषमित्येवं निद्राकालीने सुखाज्ञाने परामृशतीत्यतोपि सुषुप्तौ सुखमस्तीत्यवगम्यते । ननु परामर्शस्याप्रमाण
त्वात्कथं तद्बलात्सुखसिद्धिरित्याशंक्य तस्याप्रामाण्येपि तन्मूलभूतानुभवबलात्तत्सिद्धिरित्यभिप्रायेणाह । परामर्श
इति । परामर्शः स्मरणात्मा ज्ञानं अनुभूत एव विषये भवति नाननुभूतविषयस्तस्माद्धेतोस्तदा सुषुप्तौ अनुभव आसीदित्यव
म्यते । ननु सुषुप्तौ मनःसहितानां विलीनत्वात्कथमनुभवसिद्धिरित्याशंक्य किं सुखानुभवसाधनं नास्तीत्युच्यतेऽज्ञाना
नुभवसाधनं वा नाद्यः । स्वप्रकाशचिद्रूपत्वेन सुखस्य कारणानपेक्षत्वात् । न द्वितीयः । स्वप्रकाशसुखवत्तदा

ब्रह्मेति भिप्रायेण

ननु सौषुप्तसुखस्य स्वप्रकाशसुखत्वेपि ब्रह्मानंदः स्वयं भवेदित्यत्रोक्तं ब्रह्मरूपत्वं न संभवति मानाभावादित्याशंक्य विज्ञा
नमानंदं ब्रह्मेति बृहदारण्यकवाक्यसद्भावान्नैवमित्याह। न त्वनुभवस्मरणयोरेकाधिकरणनियमात् सुखमहमस्वा
प्सं न किंचिदवेदिषमिति च सौषुप्तसुखाज्ञानयोर्विज्ञानमयशब्दवाच्येन जीवेन स्मर्यमाणत्वात्तस्यैव सुखानुभ
वितृत्वं वक्तव्यमित्याशंक्य तदुपाधेर्विज्ञानस्याज्ञानकार्यस्याज्ञाने विलीनत्वान्नैवमित्याह। यदज्ञानमिति। न किं
चिदवेदिषमिति स्मरणान्यथानुपपत्त्यागम्यमानं यदज्ञानमस्ति तत्र तस्मिन्नज्ञाने तौ प्रमातृप्रमाणत्वेन प्रसिद्धौ विज्ञा

ब्रह्म विज्ञानमानंदमिति वाजसनेयिनः॥ पठंत्यतः स्वप्रकाशसुखं ब्रह्मैव नेतरत्॥६१॥ यदज्ञानं तत्र लीनौ तौ
विज्ञानमनोमयौ॥ तयोर्हि विलयावस्था निद्राज्ञानं च सैव हि॥६२॥ विलीनघृतवत्पश्चात्स्याद्विज्ञानमयो घ
नः॥ विलीनावस्थ आनंदमयशब्देन कथ्यते॥६३॥

नमयमनोमयौ लीनौ विज्ञानत्वाद्याकारं परित्यज्य कारणरू
पेणावस्थितौ अतस्तदुपाधिकस्य नानुभवितृत्वमिति भावः। तत्रोपपत्तिमाह। तयोर्हीति। हि यस्मात्कारणात्तयोर्वि
ज्ञानमयमनोमययोर्विलयावस्था निद्रेत्युच्यते। विज्ञानविरतिः सुषुप्तिरित्यभिधानात्। तर्हि निद्रायामेव लीनावि
ति वक्तव्यमित्यत आह। अज्ञानं चेति। सैव निद्रा विद्वद्भिरज्ञानमिति व्यवह्रियत इत्यर्थः। ननु तर्हि सौषुप्तसुखाद्यनुभ
वकालेऽसतो विज्ञानमयस्य प्रबोधे कथं तत्स्मर्तृत्वमित्याशंक्य विलयावस्थायामपि तत्स्वरूपनाशाभावाद्विलया
वस्थोपाधिमदानंदमयरूपेणानुभवितृत्वं विज्ञानमयशब्दवाच्यघनीभावोपाधिमत्त्वेन स्मर्तृत्वं चैकस्यैव तत्त
इत्यभिप्रायेणाह। विलीनेति। यथाग्निसंयोगादिना विलीनं घृतं पश्चाद्वाय्वादिसंबंधवशाद्घनीभवत्येवं जाग्रदा
दिषु भोगप्रदस्य कर्मणः क्षयवशान्निद्रारूपेण विलीनं मतः करणं पुनर्भोगप्रदकर्मवशात्प्रबोधे विज्ञानाकारेण

वलीनावस्थ आनंदमय इत्युच्यत इत्युक्तमेवार्थं स्फुटीकरोति ॥ सुप्तीति ॥ सुप्तेः पूर्वस्मिन्नव्यवहिते क्षणे या अंतर्मुखा बुद्धिवृत्तिः
स्वरूपभूतसुखप्रतिबिंबयुक्ता भवति ॥ ततोनंतरं तत्प्रतिबिंबसहिता सैव वृत्तिर्निद्रारूपेण विलीना आनंदमय इत्युच्यते ॥
स्वरूपभूतसुखप्रतिबिंबयुक्ता भवति ॥ ततोनंतरं तत्प्रतिबिंबसहिता सैव वृत्ति... सुखानुभवमुपपादयति ॥ अंतर्मुखत्व
एवमानंदमयस्वरूपं प्रदर्श्य तस्यैव प्रबोधकाले विज्ञानमयरूपेण स्मर्तृत्वसिद्धये सुखानुभवमुपपादयति ॥ अंतर्मुखत्व
मानंदमयस्वरूपं प्रदर्श्य तस्यैव प्रबोधकाले विज्ञानमयरूपेण स्मर्तृत्वसिद्धये सुखानुभवमुपपादयति ॥ सुखस्वरूपभू
॥ सुखप्रतिबिंबसहितांतर्मुखधीवृत्तिजनितसंस्कारज्ञानोपाधिको य आनंदमयस्सदा सुषुप्तौ ब्रह्मसुखं स्वरूपभू
त ॥ सुखप्रतिबिंबसहितांतर्मुखधीवृत्तिजनितसंस्कारज्ञानोपाधिको य आनंदमयस्सदा सुषुप्तौ ब्रह्मसुखं स्वरूपभू
॥ सुखचिदाभाससहिताभिरज्ञानादुत्पन्नाभिः सुखादिगोचराभिर्वृत्तिभिः सत्त्वपरिणामविशेषैर्भुंक्तेनुभवति ॥

सुप्तिपूर्वक्षणे बुद्धिवृत्तिर्या सुखबिंबिता ॥ सैव तद्बिंबसहिता लीनानंदमयस्ततः ॥ ८४ ॥ अंतर्मुखो य आनंदम
सुप्तिपूर्वक्षणे बुद्धिवृत्तिर्या सुखबिंबिता ॥ सैव तद्बिंबसहिता लीनानंदमयस्ततः ॥ ८४ ॥ अज्ञानवृत्तयः सूक्ष्मा विस्पष्टा बुद्धिवृत्त
यो ब्रह्मसुखं तदा ॥ भुंक्ते चिद्बिंबयुक्ताभिरज्ञानोत्पन्नवृत्तिभिः ॥ ८५ ॥ अज्ञानवृत्तयः सूक्ष्मा विस्पष्टा बुद्धिवृत्त
यः ॥ इति वेदांतसिद्धांतपारगाः प्रवदंति हि ॥ ८७ ॥ मांडूक्यतापनीयादिश्रुतिष्वेतदतिस्फुटं ॥ आनंदमयभोक्तायं
यः ॥ इति वेदांतसिद्धांतपारगाः प्रवदंति हि ॥ ८७ ॥ माण्डूक्यतापनीयादिश्रुतिष्वेतदतिस्फुटं ॥ आनंदभुक्चेतोमयवृत्तिभिः
ब्रह्मानंदे च भोग्यता ॥ [illegible] ॥ एकीभूतः सुषुप्तस्थः प्रज्ञानघनतां गतः ॥ आनंदमय आनंदभुक्चेतोमयवृत्तिभिः

ननु तर्हि जागरणवत्तदानीं सुखमनुभवामीत्यभिमानः कुतो न स्यादित्याशंक्याज्ञानवृत्तीनां बुद्धिवृत्तिवत्स्पष्टत्वाभा
वादित्यभिप्रायेणाह ॥ अज्ञानेति ॥ इदं कुतोवगतमित्यत आह ॥ इतीति ॥ नन्वानंदमयो ब्रह्मानंदं सूक्ष्माभिरविद्यावृत्ति
भिर्भुंक्ते इत्यत्र किं मानमित्यत आह ॥ मांडूक्येति ॥ एतच्छ्रुत्यर्थमाह आनंदमयेति ॥ इदानीं सुषुप्तस्थानमेकीभूतः प्रज्ञा
नघन एवानंदमयो ह्यानंदभुक्चेतोमुख इति मांडूक्यादिश्रुतिगतं वाक्यमर्थतः पठति ॥ एकीभूत इति ॥ सुषुप्तं सुषुप्तिः
तत्र तिष्ठतीति सुषुप्तस्थः सुप्त्यभिमानीत्यर्थः ॥ आनंदमय आनंदप्रचुर आनंदभुक्स्वरूपभूतमानंदं भुंक्त इत्यानंदभु

तदा कृयगतस्येकीभूत इतिपदस्यार्थमाह॥ विज्ञानेति॥ य आत्मा पुरा जागरणावस्थायां विज्ञानमयमुख्यैः सवा अयमात्मा
ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजो
मयः काममयोऽकाममयः क्रोधमय इत्यादिश्रुत्युक्तैः रूपैराकारविशेषैर्युक्तोऽभूत्स एवाधुना लयेन विज्ञानमनआद्युपा
धिलयेनैकतामेकाकारतां प्राप्तोऽगतो भवति॥ तत्र दृष्टांतमाह॥ बहुकिति॥ बहुतंडुलजनितपिष्टवदित्यर्थः॥ अथ प्रज्ञानघ
नशब्दार्थमाह॥ प्रज्ञानानीति॥ पुरा पूर्वं जाग्रदादौ प्रज्ञानशब्दवाच्या घटादिगोचराः या बुद्धिवृत्तयो भवन्नथ सुषुप्तिका

विज्ञानमयमुख्यैर्यो रूपैः सुप्तः पुराधुना॥ सल्लयेनैकतां प्राप्तो बहुतंडुलपिष्टवत्॥६९॥ प्रज्ञानानि पुरा बुद्धिवृत्तयोऽथ
घनोऽभवत्॥ घनत्वं हिमबिंदूनामुदग्देशे यथा तथा॥७०॥ तद्घनत्वं साक्षिभावं दुःखाभावं प्रचक्षते॥ लौकिकास्ता
र्किकाश्चाव दुःखवृत्तिविलोपनात्॥७१॥ अज्ञानबिंबिता चित्स्यान्मुखमानंदभोजने॥ भुक्तं ब्रह्मसुखं त्यक्त्वा बहि
र्यात्यथ कर्मणा॥७२॥

लेघटादिविषयाभावेसति घनोऽभवत् चिद्रूपेणैकरूपोऽभूत्॥ तत्र दृष्टांतमाह॥ घनत्वमिति॥ इ
दानीं प्रज्ञानशब्दार्थनिरूपणप्रसंगादागतं किंचिदाह॥ तदिति॥ यदिदं वेदांतेषु साक्षित्वेनाभिधीयमानं प्रज्ञानघनत्व
मस्ति तदेव लौकिकाः शास्त्रसंस्काररहितास्तार्किका वैशेषिकादयः शास्त्रिणश्च दुःखाभावं प्रचक्षते दुःखाभावं
आहुः॥ कुत इत्यत आह॥ यावदिति॥ यावत्सो दुःखवृत्तयस्तासां सर्वासां विलयादित्यर्थः॥ पूर्वोदाहृतश्रुतिवाक्यगत
चेतोमुखशब्दार्थमाह॥ अज्ञानेति॥ आनंदभोजने सौषुप्तसुखास्वादने साधनमज्ञानबिंबिता चित्स्यादज्ञानवृत्तौ
प्रतिबिंबितं चैतन्यमेव भवेत्॥ ननु सुषुप्तावानंदमयरूपेण जीवेन ब्रह्मसुखं चेद्भुज्यते तर्हि तत्परित्यज्य कुतो जाग
रणं दुःखालयमागच्छेदित्यत आह॥ भुक्तमिति॥ पुण्यापुण्यकर्मपाशाबद्धत्वात्तेन प्रेरितो जीवः सात्त्विकोऽनुभूतमपि ब्रह्मा

सा०नं०
१९॥

एतत्कुतोवगम्यत इत्याशंक्य पुनश्च जन्मांतरकर्मयोगात् स एव तु जीवः स्वपिति प्रबुद्ध इति कैवल्यश्रुतिवाक्यादिति मन्वान
स्तद्वाक्यमर्थतः पठंस्तदभिप्रायमाह। कर्मेति। सुप्तो ब्रह्मानंदानुभूयत इत्यत्र लिंगं चाह। किंचिदिति। प्रबुद्धस्य जागर
णं प्राप्तस्यापि किंचित्कालं स्वल्पकालपर्यंतं सुषुप्तावनुभूतस्य ब्रह्मानंदस्य वासनासंस्कारोनुगच्छत्यनुगच्छति। कुत
एतदित्यत आह। यत इति। यतः कारणात्प्रबोधादौ निर्विषयः विषयानुभवरहितोपि सुखी तूष्णीमास्ते ततोवगम्यत इ
त्यर्थः। तर्हि तथैव तूष्णीं कुतो नावतिष्ठत इत्यत आह। कर्मभिरिति। कर्मभिः पूर्वोक्तैश्चोदितः सर्वोपि प्राणी पश्चान्नाना

कर्मजन्मांतरेभूद्यत्तद्योगाद्बुध्यते पुनः॥ इति कैवल्यशाखायां कर्मजो बोध ईरितः॥७२॥ किंचित्कालं प्रबुद्धस्य
ब्रह्मानंदस्य वासना॥ अनुगच्छेद्यतस्तूष्णीमास्ते निर्विषयः सुखी॥७३॥ कर्मभिः प्रेरितः पश्चान्नानादुःखा
निभावयन्॥ शनैर्विस्मरति ब्रह्मानंदमेषोऽखिलो जनः॥७४॥ प्रागूर्ध्वमपि निद्रायाः पक्षपातो दिने दिने॥ ब्रह्मा
नंदे नृणां तेन प्राज्ञोऽस्मिन्विवदेत कः॥७५॥ ननु तूष्णीं स्थितो ब्रह्मानंदश्चेद्भाति लौकिकः॥ अलसाश्चरिता
र्थाः स्युः शास्त्रेण गुरुणात्र किं॥७७॥

नेदं विस्मरति इतोपि ब्रह्मानंदेन विप्र
विधानि दुःखान्यनुसंदधानः शनैर्ब्रह्मा
तिपत्तिः कार्येत्याह। प्रागिति। प्रत्यहं मनुष्याणां निद्रायाः प्रागूर्ध्वमपि निद्रारंभे निद्रावसाने च ब्रह्मानंदे स्नेहोस्ति
यतो निद्रादौ मृदुशय्यादि संपादयति तदवसाने च तत्परित्यक्तुमशक्तस्तूष्णीमास्ते तेन कारणेनास्मिन्नानंदे को
बुद्धिमान् को विवदेत न कोपीत्यर्थः। चोदयति नन्विति। गुरुशुश्रूषादिलभ्यस्य ब्रह्मानंदानुभवस्य तूष्णीं स्थि
तिमात्रलभ्यत्वे गुरुशुश्रूषादिपूर्वकश्रवणादिकं वृथा स्यादित्यर्थः॥७७॥ ॥ ॥

यं ब्रह्मानंद इति ज्ञातेऽस्मिन्भवत्येव कृतार्थता तदेव गुरुशुश्रूषादिकमंतरेण न संभवतीत्याह। बाढमिति। अत्यंतगंभीरं दुरव
गाहमवाङ्मनसगम्यं सर्वज्ञं सर्ववेत्तिरस्कर्त्रात्मरूपं ब्रह्म सद्गुरुशास्त्रे विहायान्येन केनाप्युपायेन को जानीयान्न कोपीत्यर्थः।
ननु त्वद्वाक्यादेव ब्रह्मानंदं जानतोपि मम न कृतार्थतोपलभ्यत इत्याशंक्यानुवादपूर्वकं सोपहासमुत्तरमाह। जानामीति।
मेव कृतांतं दर्शयति। चतुर्वेदेति। कश्चिच्चतुर्विदे कस्मैचिद्विप्राय बहुधनं दातव्यमित्येवंविधवाक्यश्रुत्या वेदाश्चत्वार इ
तत्स्मादेव वाक्यादहं वेद्मि अतो मे दीयतामिति वक्ति तद्वद्भवानपीत्यर्थः। ननु वेदाश्चत्वार इति यो वेद स वेदगतां संख्या

बाढं ब्रह्मेति विद्युश्चेत्कृतार्थास्तावतैव हि॥ गुरुशास्त्रे विना संततगंभीरं ब्रह्म वेत्ति कः॥७८॥ जानाम्यहं खलु त्वया
युक्तो मे न कृतार्थता॥ शृण्वन्नत्वादृशो वृत्तं मात्रमन्यस्य कस्यचित्॥७९॥ चतुर्वेदविदे देयमिति शृण्वन्नेवोच
त॥ वेदाश्चत्वार इत्येवं वेद्मि मे दीयतामिति॥८०॥ संख्यामेव स जानाति न तु वेदानशेषतः॥ यदि तर्हि त्वमप्येवं
नाशेषं ब्रह्म वेत्सि हि॥८१॥ अखंडैकरसानंदे मायातत्कार्यवर्जिते॥ अशेषत्वसशेषत्ववार्तावसर एव कः॥८२॥

मेव वेत्ति न तु वेदानां स्वरूपमिति चोदयति। संख्यामिति। सामान्येन समाधत्ते। तर्हीति। एवं चतुर्वेदाभिज्ञ इव त्वमप्यशेषं
संपूर्णं यथा भवति तथा ब्रह्म न वेत्सि नैव जानासि। ननु संख्यातिरिक्तवेदस्य स्वरूपभेद इव स्वगतादिभेदशून्यस्यानंदरूप
ब्रह्मणि अशेषमानस्यांशस्याभावात्संपूर्णज्ञानित्वोपालंभो न घटत इति चोदयति। अखंडेति। ब्रह्मज्ञानेप्यशेषत्वा
दिकं दर्शयितुं ब्रह्म जानामीति वदंतं पृच्छति। शुद्धानीति। किमखंडैकरसमद्वितीयं सच्चिदानंदरूपमित्यादि शुद्धानेव प
सि आहो अथवा तेषामर्थं स्वगतादिभेदशून्यत्वादिकं च पश्यसि जानासीति विकल्पार्थः। आद्यपक्षे सावशेषत्वं द
र्शयति। शुद्धेति॥८३॥

भू॰ शुद्धानेव पठस्याहो तेषामर्थं च पश्यसि॥ शुद्धपाठेऽर्थबोधस्तोः संपाद्यत्वेन शिष्यते॥८४॥

यो० न०
१:१२॥

द्वितीयेपि तद्दर्शयति। अर्थ इति। व्याकरणादित्युपलक्षणं निगमादेः। व्याकरणादिना परोक्षज्ञाने संपादितेपि संशयादिनिरासे
नापरोक्षीकरणं विशिष्यते। तर्हि कदा संपूर्णत्वं ज्ञानस्येत्याकांक्षायां तदवधिं दर्शयति। स्यादिति। यदा कृतार्थत्वबुद्धिरुत्पद्येत
तदा ज्ञानस्य संपूर्णतावगंतव्येत्यर्थः। एवं प्रासंगिकं परिसमाप्य प्रकृतमेवानुसरति। आस्तामिति। यत्र यत्र यस्मिन्यस्मिन्का
ले तूष्णींभावादौ विषयानुभवमंतरेण सुखं भवति तत्र तत्र सुखस्य विषयजन्यत्वाभावात् सामान्याहंकारवृत्तत्वाच्च वास
नानंदत्वमवगंतव्यमित्यर्थः। एवं ब्रह्मानंदवासनानंदौ दर्शयित्वेदानीमानंदत्रैविध्यनियमनायात्माभिमुखधीवृत्तावित्यु

अर्थे व्याकरणाद्बुद्धे साक्षात्कारो विशिष्यते॥ स्यात्कृतार्थत्वधीर्यावत्तावद्गुरुमुपास्व भोः॥८४॥ आस्तामेतद्यत्र यत्र
सुखं स्याद्विषयैर्विना॥ तत्र सर्वत्र विध्येतां ब्रह्मानंदस्य वासनां॥८५॥ विषयेष्वपि लब्धेषु तदिच्छोपरमे सति॥ अंतर्मु
खमनोवृत्तावानंदः प्रतिबिंबति॥८६॥ ब्रह्मानंदो वासना च प्रतिबिंब इति त्रयं॥ अंतरेण जगत्यस्मिन्नानंदो
नास्ति कश्चन॥८७॥ यदा यदा स्रगादिविषयलाभात्तदिच्छोपरमो भ

क्तमेव विषयानंदं पुनरनुवदति। विषयेष्विति॥
वति तदा तदा मनसि अंतर्मुखे सति तस्मिन्प्रत्यगात्मानंदः प्रतिबिंबति प्रतिबिंबितो भवति अयं विषयानंद इत्यर्थः। फलि
तमाह। ब्रह्मानंद इति। उक्तप्रकारेण स्वप्रकाशतया सुषुप्त्यादौ प्रतिभासमानो यो ब्रह्मानंदो यश्च तूष्णींस्थितौ विषयानुभव
मंतरेण प्रतीयमानो वासनानंदो यश्चाभीष्टविषयलाभादंतर्मुखे मनसि प्रतिबिंबितो विषयानंद एतत्त्रितयातिरेकेणास्मि
न्जगति न कश्चिदानंदोस्ति॥८७॥ नन्वानंदस्त्रिविधो ब्रह्मानंदो विद्यासुखं तथा विषयानंद इत्यनेन प्रकारेणानंद
त्रैविध्यमुक्तमिदानीं तु ब्रह्मानंदो वासना च प्रतिबिंब इति त्रयमिति तद्विलक्षणमानंदस्य त्रैविध्यमुच्यते ततः पूर्वापर

192

विरोधः। किंच यावद्यावदहंकारो विस्मृतोऽभ्यासयोगतः। तावत्तावत्सूक्ष्मदृष्टेर्निजानंदोऽनुमीयते इति। तादृक्पुमानुदा
सीनकालेऽप्यानंदवासनो उपेक्ष्य मुख्यमानंदं भावयत्येव तत्पर इति चोक्तोऽप्रकारद्वयातिरिक्तो निजानंदमुख्यानंदावभि
धीयेते तथा द्वितीयाध्याये मंदप्रज्ञं तु जिज्ञासुमात्मानंद[illegible]नबोधयेदित्यात्मानंदस्ततोऽभिधीयते। योगानंदः यो
पुरोक्तोऽयमित्यत्र योगानंदोऽपि कश्चिद्वभासते ब्रह्मानंदाभिधे ग्रंथे तृतीयोऽध्याय ईरितः। अद्वैतानंद एवस्यादित्य
त्राद्वैतानंदश्चान्यमवगच्छाम अतोऽनंतरेण जगत्यस्मिन्नानंदो नास्तिकश्चनेत्युक्तिर्विरुध्येतेति चेन्नैव।। विद्यानंदस्से
विषयानंदवदंतःकरणवृत्तिविषयत्वेन विषयानंदंतर्भावस्य विषयानंदवद्द्वियानंदो धीवृत्तिरूपक इत्युत्तरत्र धीवृ
त्तिरूपत्वाभिधानेन विवक्षितत्वान्निजानंदमुख्यानंदात्मानंदयोगानंदाद्वैतानंदानां तु ब्रह्मानंदानतिरिक्तत्वाच्च।
तथाहि। यावद्यावदहंकार इत्युदाहृतश्लोके योगलक्षणोपायगम्यतया विवक्षितस्य निजानंदस्येव नद्वैतं भासते
नापि निद्रा तत्रास्ति यत्सुखं स ब्रह्मानंद इत्याह भगवानर्जुनं प्रतीत्यस्मिन्नुत्तरस्मिन्श्लोके एव ब्रह्मानंदत्वाभिधाना
न्निजानंदो ब्रह्मानंदोऽभिधीयते।। तथा मुख्यानंदोऽपि ब्रह्मानंद एव। तथाच विषयानंदो वासनानंद इत्यमू आनंदौ
जनयन्नास्ते ब्रह्मानंदः स्वयंप्रभ इत्यत्र जन्यत्वेनामुख्यभूतयोर्विषयानंदवासनानंदयोर्जनकत्वेनाभिहितस्ये
ब्रह्मानंदस्येव तादृक्पुमानुदासीनकालेऽपीत्युदाहृतश्लोके एव आनंदवासनो उपेक्ष्य मुख्यमानंदं भावयत्येव त
त्पर इति मुख्यानंदत्वाभिधानादात्मानंदाद्वैतानंदयोस्तु ब्रह्मानंदत्वं योगानंदः पुरोक्तोऽयः स आत्मानंद इष्यता
इति तृतीयाध्यायादौ प्रथमाध्याये योगानंदतया विवक्षितस्य ब्रह्मानंदस्येव योगानंदत्वेनानुवादपूर्वकमा

193

याव

स्मानंदतामभिधायकथंब्रह्मसमेतस्यसद्वयस्येतिचेदितिप्रश्नपूर्वकमाकाशादिशरीरांतमित्यादिना द्वितीयस्यब्रह्मत्व
प्रतिपादनाद्वेगंतव्यं। तस्माद्ब्रह्मानंदोवासनानंदश्चप्रतिबिंबद्वयुक्तत्रैविध्यंसुस्थं॥ ननुतर्हियेयंवासनानंदाद्ब्रह्मा
नंदादपीतरंवेत्तुयोगीनिजानंदमित्यत्रनिजानंदस्यब्रह्मानंदवासनानंदाभ्यांभेदेननिर्देशोनयुज्यतइतिनंदो
कनीयं। एकस्यैवब्रह्मानंदस्यजगत्कारणत्वोपाधिसाहित्यसाहित्यभेदेनभेदव्यपदेशोपपत्तेः। तथाहि। ब्रह्मा
नंदनिरूपणावसरेआनंदादेवभूतानिजायंतइत्यादिनाजगत्कारणत्वाभिधानेनब्रह्मानंदस्यसमायत्वमवे
गम्यते। निर्मायस्यजगत्कारणत्वानुपपत्तेः। निजानंदनिरूपणकालेपियावदहंकारइत्यादिनासकारणस्या

तथाचविषयानंदोवासनानंदइत्यमू॥ आनंदोजनयन्नास्तेब्रह्मानंदः स्वयंप्रभः॥८८॥ श्रुतियुक्त्यनुभू
तिभ्यः स्वप्रकाशचिदात्मके॥ ब्रह्मानंदेसुषिकालेसिद्धेसत्यन्यदाशृणु॥८९॥

हकारस्यविलयप्रतिपादना
निजानंदस्यनिर्मायत्वमवगंतव्यमितिसर्वमनवद्यं॥८७॥८८॥ नन्वस्मिन्नध्यायेब्रह्मानंदविवेचनस्यैवप्रस्तु
तत्वादितरानंदद्वयप्रतिपादनंप्रकृतासंगतमित्याशंक्यतयोर्ब्रह्मानंदजन्यत्वेनतद्बोधोपयोगित्वान्नप्रकृतासं
गतमित्यभिप्रायेणाह। तथाचेति। तथाचएवमानंदत्रैविध्येसतिस्वयंप्रकाशआनंदोविषयानंदवास
नानंदौजनयतिसब्रह्मानंदोवेदितव्यइत्यर्थः। वृत्तानुकीर्तनपूर्वकमुत्तरग्रंथमवतारयति। श्रुतीति। श्रुतिभिः
सुषुप्तिकालेसकलेविलीनेतमोभिभूतः सुखरूपमेतीत्यादिभिरुदाहृताभिः युक्तिभिः सुखमहमस्वाप्समि
त्यादिपरामर्शान्यथानुपपत्त्यादिभिरनुभूयमानत्वाचार्थापत्तिकल्पितेनसोषुप्तानुभवेनचसुषुप्तिकालेस्वप्रकाशेब्र

ह्मानंदः सांख्यितः द्वतः परंजागरणावस्थायामपियो

प्रतिस्रोतमेव ब्रह्मानंदावगमोपायं दर्शयितुं तदुपोद्घातत्वेन स निमित्तो जीवस्यावस्थाद्वयप्राप्तिं दर्शयति। य इति। सु
प्तो सुप्तिकाले विलीनावस्थ आनंदमयशब्देन कथ्यते इत्युक्तो य आनंदमयः स विज्ञानशब्दाभिधेयबुध्युपाधिमत्वे
न विज्ञानमयतां प्राप्य स्थानभेदतः वक्ष्यमाणस्थानविशेषयोगेन स्वप्नजागरणं वा कर्मानुसारेण गच्छति। इदा
नीं जाग्रदाद्यवस्थोपयोगीनि स्थानान्याह। नेत्र इति। नेत्रशब्दस्य तत्स्थदेहोपलक्षणपरत्वमभिप्रेत्य नेत्रे जाग
रणमित्यंशस्यार्थमाह। आपादेति। चेतनो जीवः। देहव्याप्येत्यनेन विवक्षितमर्थं दृष्टांतप्रदर्शनेन स्पष्टयति।

य आनंदमयः सुप्तो स विज्ञानमयात्मतां॥ गत्वा स्वप्नप्रबोधं वा प्राप्नोति स्थानभेदतः॥१०॥ नेत्रे जागर
णं कंठे स्वप्नः सुप्तिर्हृदंबुजे॥ आपादमस्तकं देहं व्याप्य जागर्ति चेतनः॥११॥ देहतादात्म्यमापन्नस्तप्तायःपिं
डवत्ततः॥ अहं मनुष्य इत्येवं निश्चित्यैवावतिष्ठते॥१२॥ उदासीनः सुखी दुःखीत्यवस्थात्रयमित्यसौ॥ सु
खदुःखे समे कार्यत्वौदासीन्यं स्वभावतः॥१३॥ बाह्यबोधात्मनो राज्यात्सुखदुःखे द्विधा मते॥ सुखदुःखां
तरालेषु भवेत्तूष्णीमवस्थितिः॥१४॥

देहेति। तत्र प्रमाणमाह। तत इति। यतो मनुष्यत्वादिजातिमत्ता देहेन ता
दात्म्यं प्राप्तस्ततो मनुष्य इत्येवं निश्चित्य संज्ञायादिरहितत्वानेन गृहीत्वैवावतिष्ठते। देहतादात्म्यहेतुकान्येवावस्थां
तराणि दर्शयति। उदासीन इति। तत्र सुखित्वदुःखित्वयोः कर्मजन्यत्वज्ञानाय विशेषणभूतयोः सुखदुःखयोः
कर्मैकहेतुत्वं दर्शयति। सुखदुःखे इति। तयोश्च सुखदुःखयोर्निमित्तभेदाद्द्वैविध्यमाह। बाह्येति। तदौदासीन्यं
कदा स्यादित्यत आह। सुखेति। व्यक्तिविवक्षया बहुवचनं॥१४॥ ५५ ॥ ५५ ॥ ५५ ॥

पो०नं०
११३

अतो

यदर्थं जाग्रदाद्युपन्यस्तं तदिदानीं दर्शयति। नकापीति। सर्वोपि जनः इदानीं मम कापि चिंता गृहादिविषया नास्ति ततः सुखं यथा भवति तथा तिष्ठामीति वदन्नौदासीन्यकाले स्वरूपानंदस्फूर्तिं ब्रूते। जागरणावस्थायामपि निजानंदभानमस्तीत्येवंगंतव्यमित्यभिप्रायः। ननु औदासीन्ये अवभासमानस्य निजानंदत्वे तस्य ब्रह्मानंदात्सूत्रोक्तवासनानंदता न स्यादित्याशंक्याहंकारसामान्यावृतत्वान्न ब्रह्मानंदतेति परिहरति। अहमिति। देवदत्तोहमित्यादिविशेषशून्येनास्मीत्येवं रूपेणाहंकारसामान्येनावृतत्वान्नायं मुख्य इत्यर्थः। तर्हि तस्य किं रूपं तत्राह। किं त्विति। मुख्यानंदातिरिक्त

न कापि चिंता मेस्त्यद्य सुखमासमिति ब्रुवन्॥ औदासीन्ये निजानंदभानं वक्त्यखिलो जनः॥१५॥ अहमस्मीत्यहंकारसामान्याच्छादितत्वतः॥ निजानंदो न मुख्योयं किंत्वसौ तस्य वासना॥१६॥ नीरपूरितभांडस्य बाह्ये शैत्यं न तज्जलं॥ किंतु नीरगुणस्तेन नीरसत्तानुमीयते॥१७॥ यावद्यावदहंकारो विस्मृतोभ्यासयोगतः॥ तावत्तावत्सूक्ष्मदृष्टेर्निजानंदोनुमीयते॥१८॥

वासनानंदसद्भावे दृष्टांतमाह। नीरेति। जलपूर्णकुंभस्य बहिर्भागे स्पर्शेनोपलभ्यमानं यच्छैत्यमस्ति तन्नाव जलं न भवति द्रवत्वानुपलंभात्। किं तर्हि तदित्यत आह। किं त्विति। नीरगुणत्वं कथमवगम्यते इत्यत आह। तेनेति। विमतं घटे उपलभ्यमानं शैत्यं जलजन्यं भवितुमर्हति शैत्यत्वात् जले उपलभ्यमानशैत्यवदिति। भवत्वेवं नीरानुमापकत्वं शैत्यस्य प्रकृते किमायातमित्याशंक्य तद्वासनानंदस्यापि मुख्यानंदानुमापकत्वमायातमित्याह। यावदिति। अभ्यासयोगतः ज्ञानमात्मनि महति नियच्छेत् तद्यच्छेच्छांत आत्मनीति श्रुत्युक्तनिरोधसमाध्यभ्यासयोगेन यावद्यावद्देहमादिवृत्ति विलयवशाच्चित्तस्य सूक्ष्मता जायते तावत्तावन्निजानंदाभिव्यक्तिर्भवतीत्यनुमीयते। अयमत्र प्रयोगः अहंकारसंकोचविशेषविशिष्टक्षणे पुद्धितीयादिक्षणः पक्षः

दस्मस्य को वधिरित्यत आह। सर्वेति। तर्हि सा निद्रैव स्यादित्यत आह। अलीनत्वादिति। सर्ववृत्तिविलयेप्यंतःकरणविल
भावान्नेयं निद्रा बुद्धेः कारणात्मनावस्थानं सुषुप्तिरित्याचार्यैरुक्तत्वादित्यर्थः। अंतःकरणस्वरूपविलयाभावे लिंग
हा। तत्रस्ति। यत्र सुषुप्त्यादावहंकारविलयस्तत्र देहपातो दृष्ट इह तु तदभावाद्विलीन इति गम्यते फलितमाह। नेद्वैतमि
यस्मिन्काले द्वैतभानं नास्ति निद्रापि नागच्छति तस्मिन्काले उपलभ्यमानं यत्सुखमस्ति स ब्रह्मानंद इत्यर्थः। अयं ब्र
नेदमिति कुतोवगम्यत इत्यात्र श्रीकृष्णवाक्यादित्याह। इत्याहेति। गीतायां षष्ठाध्याय इति शेषः। तत्र कैः श्लोकैरु
सर्वात्मना विस्मृतः सन्सूक्ष्मतां व्रजेत्॥ अलीनत्वान्न निद्रैषा ततो देहोपि नो पतेत्॥९९॥ नद्वैतं भासते नापि निद्रा त
त्रास्ति यत्सुखं॥ स ब्रह्मानंद इत्याह भगवानर्जुनं प्रति॥१००॥ शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया॥ आत्मसंस्थं म
नः कृत्वा न किंचिदपि चिंतयेत्॥११॥ यतो यतो निश्चरति मनश्चंचलमस्थिरं॥ ततस्ततो नियम्यैतदात्मन्येव वशं नये
त्वा निस्याश्लोकान्वयस्त्वर्थक्रमानुसारेण। शनैरिति। अयमर्थः। धृतिगृहीतया धैर्ययुक्तया बुद्ध्या साधनभू
या शनैः शनैस्तेन सह सा उपरमेत्। मन उपरतिं कुर्यात्। किंपर्यंतमित्यत आह। आत्मेति। मनश्चात्मसंस्थं आत्मनिसं
स्था सम्यक्स्थिति आत्मैवं सर्वं न ततोन्यत्किंचिदस्तीत्येवंरूपा यस्य तदात्मसंस्थं तथाविधं कृत्वा न किंचिदपि चिंतये
देष योगस्य परमोवधिः। एतत्संपादने प्रवृत्तो योगी प्रथमं किं कुर्यादित्यत आह। यत इति। चंचलं स्वभावदोषात्। अ
त एवास्थिरमेकत्र विषयेऽनियतमेवंविधं मनो यदा यतो यतो यस्माद्यस्माच्छब्दादेर्निमित्तान्निश्चरति निर्गच्छति ततस्त
तस्तस्मात्तस्माच्छब्दादेः सकाशान्नियम्य तेषां शब्दादीनां मिथ्यात्वादिदोषदर्शनेनाभ्यासीकृत्य वैराग्यभावनापूर्व
कं निरुध्यैतन्मन आत्मन्येव वशं नयेत्। आत्मवश्यतामापादयेत्। एवं योगमभ्यसतोभ्यासबलादात्मन्येव मनः प्रशा

मनःप्रशांतो किं भवतीत्यत आह। प्रशांतेति। शांतरजसं प्रक्षीणमोहादिक्लेशरजसं अत एव प्रशांतमनसं प्रकर्षेणात्यं
तं शांतं विक्षेपरहितं मनो यस्य तं ब्रह्मभूतं ब्रह्मैवेदं सर्वमिति निश्चयवत्तया जीवन्मुक्तमकल्मषमधर्मादिवर्जितमेवं
योगिनमुत्तमं क्षयिष्णुत्वसातिशयत्वादिदोषरहितं सुखमुपैति। उपगच्छति। संगृहीतार्थप्रपंचनपरास्तदीयानेव
श्लोकान्पठति यत्रेत्यादिभिः। चित्तं यत्र यस्मिन्काले योगसेवया योगानुष्ठानेन सर्वस्माद्विषयान्निवारितं सदुपरमते उपर
तिं गच्छति। किंच यत्र यस्मिन्नेव काले आत्मनात्मसमाधिशुद्धेनांतःकरणेनात्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन्नुपलभमा
नः स्वस्मिन्नेव तुष्यति। तुष्टिं लभते न विषयेष्वित्यर्थः। किंच यत्र यस्मिन्काले आत्मनि स्थितो योगी आत्यंतिकमनंतमेव

प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमं। उपैति शांतरजसं ब्रह्मभूतमकल्मषं॥२७॥ यत्रोपरमते चित्तं निरुद्धं योगसेव
या। यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति॥२०॥ सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं। वेत्ति यत्र न चैवायं
स्थितश्चलति तत्त्वतः॥२१॥ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः। यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितं॥०॥ भवतीत्यात्यंतिकमनंतं बुद्धिग्राह्यमिंद्रियनिरपेक्षया बुद्ध्या गृह्यमाणं

अतींद्रियमिंद्रियगोचरातीतमविषयजनितं यत्तदीदृशं सुखं वेत्ति अनुभवति किंच आत्मनि स्थितो यं तत्त्वतस्तस्मा
दात्मस्वरूपान्नैव चलति न च्यवते। किंच यमात्मलाभं लब्ध्वा प्राप्य अपरं लाभं लाभांतरं ततोऽधिकं न मन्यते। आत्मलाभान्नप
रं विद्यत इति स्मृतेः। किंच यस्मिन्नात्मतत्त्वे स्थितो गुरुणा महता दुःखेन शस्त्रनिपातादिलक्षणेन प्रह्लाद इव न विचाल्य
ते। इदानीमुपपादितं योगं निगमयति। तमिति। शनैः शनैरित्यादिना यावद्भिर्विशेषणैर्विशिष्ट आत्मावस्थाविशेषो यो
ग उक्तस्तं दुःखसंयोगवियोगं दुःखैः संयोगो दुःखसंयोगस्तेन वियोगस्तं योगसंज्ञितं विपरीतलक्षणया योग इत्येवं

संछितं विद्याज्ञाकौमारे

एवंविधयोगानुष्ठाने कर्तव्यताविशेषमाह। स इति। स पूर्वोक्तो योगो निश्चयेऽध्यवसायेनानिर्विण्णचेतसा निर्वेदरहितेन चित्तेन योक्तव्योऽनुष्ठेयः ॥६॥ इदानीमुक्तमर्थमुपसंहरति। युञ्जन्निति। विगतकल्मषो विगतपापो योगी अन्तरायवर्जितो योगी सदात्मानमेवं यथोक्तप्रकारेण युञ्जन्ननुसंदधानः सुखेनानायासेन ब्रह्मसंस्पर्शं ब्रह्मणा संस्पर्शो यस्य सुखस्य तद्ब्रह्मसंस्पर्शं ब्रह्मस्वरूपभूतमित्यावत्। अत्यन्तं निरतिशयं सुखमश्नुते प्राप्नोतीत्यर्थः। अनिर्वेदेन क्रियमाणो योगाभ्यासः फलपर्यंतो भवतीत्यत्र दृष्टांतमाह। उत्सेक इति। कुशाग्रेणोद्धृतेन एकेन बिंदुना क्रियमाण

स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥६॥ युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः। सुखेन ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते ॥७॥ उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिंदुना। मनसो निग्रहस्तद्वद्भवेदपरिखेदतः ॥८॥ बृहद्रथस्य राजर्षेर्मुनिः शाकायनः सुखं। प्राह मैत्राख्यशाखायां समाध्युक्तपुरःसरं ॥९॥

उदधेरुत्सेक उद्धरणं बहिःसेचनं परिखेदाभावे सति यद्वत्कालांतरे भवेदेवं तद्वन्मनसो निग्रहोऽपि श्रमराहित्येन क्रियमाणः कालांतरे सिध्येदेव। इदं च टिट्टिभोपाख्यानं मनसि निधायोक्तं। न केवलमयमर्थो गीतायामभिहितः किंतु मैत्रायणीयशाखायामपीत्याह। बृहदिति। मैत्रायणीयनामके यजुःशाखाभेदे शाकायननामकः कश्चिदृषिः स्वशिष्यत्वेनोपसन्नस्य बृहद्रथाख्यस्य राजर्षेर्ब्रह्मसुखं समाध्यभिधानपूर्वकं यथा भवति तथोक्तवान् ॥९॥ ॥ ॥ ॥ ॥ ॥

नं०
८॥

केनप्रकारेणोत्कवानित्याशंक्यतत्प्रतिपादकांस्तदीयानेवश्लोकान्पठति। यथेति। निरिंधनोदग्धकाष्ठोवन्हिः स्वयो-
नौस्वकारणेतेजोमात्रेउपशाम्यति। ज्वालादिरूपंविशेषाकारंपरित्यज्यतेजोमात्ररूपेणावतिष्ठतेतथोत्तनैवप्र
कारेणचित्तमंतःकरणमपिवृत्तिक्षयान्निरोधसमाध्यभ्यासेनरागानसादिसकलवृत्तिनाशात्स्वकारणेसत्त्वमा
त्रेउपशाम्यतिसत्त्वमात्रावशिष्टंभवतीत्यर्थः। ततः किमित्यतआह। स्वयोनाविति। सत्येआत्मनिविषयेकामो
यस्यास्तीसत्यकामीतस्य। अतएवस्वयोनावुपशांतस्योपशांतत्वादेवेंद्रियार्थविमूढस्येंद्रियार्थेषुशब्दादिषु

यथानिरिंधनोवन्हिःस्वयोनावुपशाम्यति। तथावृत्तिक्षयाच्चित्तंस्वयोनावुपशाम्यति॥१०॥ स्वयोनावुप
शांतस्यमनसःसत्यकामिनः। इंद्रियार्थविमूढस्यानृताःकर्मवशानुगाः॥११॥ चित्तमेवहिसंसारस्तत्प्र
यत्नेनशोधयेत्॥

विमूढस्यविमुखस्यज्ञानशून्यस्यमनसः
कर्मवशामनुगच्छंतीतिकर्मवशानुगाः ससाधनाः सुखदुःखादयोनृतामायिकत्वेज्ञानेनमिथ्याभूताःस्युरित्यर्थः न
नुचित्तोपशांतौजगन्मिथ्याभवतीत्येतदनुपपन्नंतदुपादानकत्वाभावात्तस्येत्याशंक्याह। चित्तमिति। यद्यपि
चित्तोपादानकंजगन्नभवतितथापितस्यभोग्यत्वंचित्तकारणकमेवहिशब्देनात्रसर्वोनुभवेप्रमाणयति। सुषुप्त्यो
दौचित्तविलयेभोगादर्शनादितिभावः। यतश्चित्तात्मकःसंसारस्ततस्तच्चित्तमेवप्रयत्नेनाभ्यासवैराग्यादिलक्ष
णेनशोधयेत्तद्रजस्तमोराहित्येनैकाग्रंकुर्यात्॥ ६ ॥ ६ ॥ ६ ॥

नन्वात्मनो विमुक्तये आत्मैव ब्रह्मोपासनीयो न चित्त मित्याशङ्क्याह । यच्चित्तमिति । मर्त्यः स्थूलसूक्ष्मदेहमात्रस्थायी यो देही यच्चि
त्तो यस्मिन् पुत्रादौ विषये चित्तवान् भवति स तन्मयस्तदात्मक एव तत्सांकर्त्ये वैकत्वेयोरात्मन्येवसमारोपणादेतत्सनातन
मिदमनादिसिद्धं गुह्यमेतद्गुह्यं भवति । स्वभावतः शुद्धस्यात्मनो यत्तच्चित्तसंपर्कादेव संसारित्वं ध्यायतीव लेलाय
तीवेति श्रुतेः अतश्चित्तस्य शोधनेनात्मनः संसारनिवृत्तिरिति । नन्वनादिभवपरंपरोपार्जितसुखदुःखप्रदपुण्यपा
पकर्मणः सतश्चित्तशोधनेनापि कथमात्मनः संसारनिवृत्तिर्भविष्यतीत्याशङ्क्य चित्तप्रसादोपलक्षितब्रह्मानु
संधानेन सकलकर्मक्षयोपपत्तेर्मैवमिति परिहरति । चित्तस्य हीति । हि यद्धेनैतद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेते

यच्चित्तस्तन्मयो मर्त्यो गुह्यमेतत्सनातनं ॥१२॥ चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभं । प्रसन्नात्मात्म
निस्थित्वा सुखमक्षयमश्नुते ॥१३॥ समासक्तं यथा चित्तं जन्तोर्विषयगोचरे । यद्येवं ब्रह्मणि स्यात्तत्को
न मुच्येत बंधनात् ॥१४॥

वं ह्यस्य सर्वे पाप्मानः प्रदूयन्ते । उपपा तकेषु सर्वेषु पातकेषु महत्सु च । प्रविश्य रजनीपादं
ब्रह्मध्यानं समाचरेदित्यादिश्रुतिस्मृतिप्रसिद्धिं द्योतयति । ततः किमित्यत आह । प्रसन्नेति । प्रसन्न आत्माय
स्य स तथोक्तः आत्मनि स्वरूपभूते द्वितीयानंदलक्षणे ब्रह्मणि स्थित्वा तदेवाहमिति निश्चयेन दृश्यजातं परि
हृत्य चिन्मात्ररूपेणावस्थायाक्षयमविनाशि सुखं स्वरूपभूतं तदश्नुते । प्रसन्नात्मात्मनि स्थित्वे सुखमेवाथं
दृष्टान्तोक्तिपुरस्सरं द्रढयति । समासक्तमिति । प्राणिनश्चित्तं विषय एव गोचरो विषयगोचरः इंद्रियप्रचार
भूमिः तस्मिन्यथा स्वभावतः सम्यगासक्तं भवति तदेव चित्तं ब्रह्मणि प्रत्यगभिन्ने परमात्मनि यद्येवमासक्तं

उक्तदार्ढ्यायमनसोवांतरभेदमाह। मनोहीति। तत्रकारणमाह। अशुद्धमिति। काममित्युपलक्षणं क्रोधादेरपि। द्विविधस्यैव
तस्यक्रमेण संसारमोक्षयोर्हेतुत्वं दर्शयति। मनइति। प्रसन्नात्मात्मनि स्थित्वा सुखमक्षयमश्नुतइत्युक्तमेवार्थं श्रुतिः
स्वयमेव प्रपंचयति। समाधीति। आत्मनि प्रत्यक्स्वरूपे विनिवेशितस्य समाधिनिर्धूतमलस्य समाधिनाप्रत्यक्ब्रह्म
णोरैक्यगोचरप्रत्ययावृत्त्या निर्धूतमलस्य निःशेषेण निवारितरजस्तमोमलस्य चेतसस्तस्मिन्समाधौ यत्सुखमनु
भूयेत तदासमाध्यवसानेतत्सुखं गिरा वाचा वर्णयितुं न शक्यते अलौकिकसुखत्वादित्यर्थः। किंतु स्वयं तत्स्वरूप

मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च॥ अशुद्धं कामसंपर्काच्छुद्धं कामविवर्जितं॥१५॥ मनएव मनुष्याणां कार
णं बंधमोक्षयोः॥ बंधाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतं॥१६॥ समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्म
नि यत्सुखं भवेत्। न शक्यते वर्णयितुं गिरा तदा स्वयं तदंतःकरणेन गृह्यते॥१७॥ यद्यप्यसौ चिरकालं समा
धिर्दुर्लभो नृणां॥ तथापि क्षणिको ब्रह्मानंदो निश्चयइत्यसौ॥१८॥ श्रद्धालुर्व्यसनी योत्र निश्चिनोत्येव सर्वथा॥१९॥

भूतं सुखमंतःकरणेनैव गृह्यते। ननु स्यैव समाधेर्दुर्लभत्वात्कथमनेनैव ब्रह्मानंदनिश्चयसंभवइत्याशंक्याह। यद्यपी
ति। अस्य समाधेः संततत्वासंभवेपि क्षणिकस्य तत्स्य संभवात्तेनैवायमानंदो निश्चेतुं शक्यतइत्यर्थः। नन्वोत्सदर्श
नायश्रवणादौ प्रवृत्ता अपि केचिदानंदनिश्चयशून्या बहिर्मुखाएव वर्तंतइत्याशंक्य श्रद्धादिरहितानां तथात्वेपि श्र
द्धादिमतां तन्निश्चयो भवत्येवेत्याह। श्रद्धालुरिति। व्यसनी सर्वथा संपादयिष्यामीत्याग्रहवत्त्वाद्व्यसनी अत्र समा
धौ सुर्वथा अवश्यं। ततः किमित्यत आह। निश्चितिर्विति तस्मिन्ब्रह्मानंदे क्षणिकसमाधौ निश्चितेसत्ययं सम्यन्निश्चय

पिकिंतत्राह। तादृगिति। तादृक्सुमान्सन्नूनिश्चयवानुरूपऔदासीन्यदशायामप्युपलभ्यमानांपूर्वोक्तामानंदवासनामु
यत्तसर: मुख्यानंदेतात्पर्यवान्भूत्वातमेवभावयति। एवंव्यवहारकालेपिनिजानंदभावयतीत्येतत्सदृष्टांतमाह। परेति
र्तितिके योजयति। एवमिति। धीरशब्दार्थमाह। धीरत्वमिति। इंद्रियाणां विषयाभिमुख्येनपुरुषाकर्षणसामर्थ्येपि
रूपसुखानुसंधानेच्छयासर्वाणींद्रियाणितिरस्कृत्यानंदानुसंधानएवप्रवर्तमानत्वंधीरत्वमित्यर्थ:। विश्रांतिशब्दु
विवक्षितमर्थसदृष्टांतमाह। भारवाहीति। यथालोकेभारंवहन्पुरुष:श्रमहेतुशिरसिस्थितंपरित्यज्यश्रमरहितोवर्ते
नी
तादृक्सुमानुदासीनकालेप्यानंदवासनां॥ उपेक्ष्यमुख्यमानंदंभावयत्येवतत्सर:॥२०॥ परव्यसनीनारीव्यग्रापिगृहकर्म
णि॥ तदेवास्वादयत्येवं तत:परब्रह्मरसायनं॥२१॥ एवंतत्त्वेपरेशुद्धेधीरोविश्रांतिमागत:॥ तदेवास्वादयत्यंतर्बहिर्व्यवह
न्नपि॥२२॥ धीरत्वमक्षप्राबल्येप्यानंदास्वादवांछया॥ तिरस्कृत्याखिलाक्षाणितच्चिंतायांप्रवर्तनं॥२३॥ भारवाहीशिरो
भारंमुक्त्वास्तेविश्रमंगत:॥ संसारव्यापृतित्यागेतादृग्बुद्धिस्तुविश्रम:॥२४॥ विश्रांतिंपरमांप्राप्तस्त्वौदासीन्येयथा
ततथा॥ सुखदु:खदशायांचतदानंदैकतत्पर:॥२५॥ अग्निप्रवेशहेतौधी:शृंगारेयादृशीतथा॥ धीरस्यादेति
विषयेतुसंधानविरोधिनि॥२६॥ तत्तथासंसारव्यापारपरित्यागेश्रमरहितआसमितिजायमानायाबुद्धि:साविश्रम
नोच्यतेइत्यर्थ:। इदानींफलितमर्थमाह। विश्रांतिमितिपरमांनिरतिशयांविश्रांतिसुखलक्षणांप्राप्त:पुरुष:स्वस्यौदासी
दशायांयथापरमानंदास्वादनेतात्पर्यवान्भवति। एवंसुखदु:खप्राप्तिहेतुकालेपितदनुसंधानंपरित्यज्यनिजानंदास्वा
एवतात्पर्यवान्भवतीत्यर्थ:। ननुदु:खस्यप्रतिकूलत्वेतदनुसंधानेच्छाभावेपिवैषयिकसुखस्यानुकूलत्वेनपुरुषैरभ्यर्थ्य
त्वात्तदनुसंधानेच्छाकुतोनभवेदित्याशंक्यतस्यविषयसंपादनादिद्वारातीव्रबहिर्मुखत्वापादनेननिजानंदानुसंधानवि

र्थ:॥२६॥

द्वयोतनयेति

षयसुखे ॥ प्रयत्नसो लभ्येनाबहिर्मुखत्वहेतो विषये किं भवती सत आह ॥ अविरोधीति ॥ दृष्टांतं विवृणोति ॥ एकेति ॥ यथाका
दृष्टेर्द्वौ न साधनं चक्षुरिंद्रियमेव वामदक्षिणनेत्रयोर्गोलकयोः पर्यायेण गमनागमनेन कस्येवं विविक्तिनो बुद्धिरप्यानंदद्वये
दार्ष्टांतिकं प्रपंचयति ॥ भुंजान इति ॥ तत्त्ववित् विषयान् भुंजानस्तज्जन्यविषयानंदमुपनिषद्वाक्याद्गतं ब्रह्मानंदं चलो
दिकावुभौ विषयानंदब्रह्मानंदौ द्विभाषावद्वीवजानीयादित्यर्थः ॥ ननु दुःखानुभवदशायामुद्वेगोस्तीति कथं निजानंदा
सांक्रया हा ॥ दुःखप्राप्ताविति ॥ यतो यस्मात्कारणाद्विवेकी द्विदृग्लौकिकवैदिकव्यवहारयोरुभयोरपि वेत्ता दुःख

रोप्यसुखबुद्धिः स्वानंदेचगमागमौ ॥ कुर्वन्नास्ते क्रमादेषा काकाक्षिवदितस्ततः ॥१२७॥ एकैव दृष्टिः काकस्य वामद
नेत्रयोः ॥ यात्यायात्येवमानंदद्वये तत्त्वविदो मतिः ॥१२८॥ भुंजानो विषयानंदं ब्रह्मानंदं च तत्त्ववित् ॥ द्विभाषाभिज्ञ
वदुभौ लौकिकं वैदिकं ॥१२९॥ दुःखप्राप्तौ च नोद्वेगो यथा पूर्वं यतो द्विदृक् ॥ गंगामग्नार्धकायस्य पुंसः शीतोष्णधी
॥१३०॥ इत्थं जागरणे तत्त्वविदो ब्रह्मसुखं तदा ॥ भाति तद्वासनाजन्ये स्वप्ने तद्भासते तथा ॥१३१॥ अविद्यावासनाप्य
तस्तद्वासनोत्थिते ॥ स्वप्ने मूर्खवदेवैष सुखं दुःखं च पश्यति ॥१३२॥ ब्रह्मानंदाभिधे ग्रंथे ब्रह्मानंदप्रकाशकं ॥ योगि
समध्यायेप्रथमेस्मिन्नुदीरितं ॥१३३॥

प्राप्तावपि पूर्ववद्ज्ञानदशायामिव तस्य नोद्वेगः ॥ विवेकेन तत्त्वात्ततद्बाध्यमान
दुःखानुभवकालेपि निजानंदानुसंधानेन विरुध्यत इत्यर्थः ॥ युगपदुभयानुसंधाने दृष्टांतमाह ॥ गंगेति ॥ फलितमा
मिति ॥ सदा सुखदुःखदशायां तूष्णीं स्थितो चेत्यर्थः ॥ न केवलं जागरण एव तज्ज्ञाने किंतु स्वप्नावस्थायामपीत्याह ॥ इ
ति ॥ हेतुगर्भविशेषणं जाग्रद्वासनाजन्यत्वात् स्वप्नस्यापि तद्ब्रह्मसुखं तथा जाग्रदवस्थायामिव भासत इत्यर्थः ॥ ननु
आनंदानुभवजन्यत्वे स्वानंद एव भासत इत्याशंक्याह ॥ अविद्येति ॥ न केवलमानंदवासनाबलादेव स्वप्नो जायते किं
चोपलक्षणमागमादीनां ॥ तेषामप्यत्र प्रदर्शितत्वात् ॥ इति ब्रह्मानंदे योगानंदो नाम प्रथमोध्यायः ॥ ५९

॥श्री॥ तदेवं प्रथमाध्याये विवेकिनो योगेन निजानंदानुभवप्रकारं प्रदर्श्य मूढस्य जिज्ञासोरा
त्मानंदस्फूर्त्तये वाक्यस्थत्वंपदार्थविवेचनमुखेन ब्रह्मानंदानुभवप्रकारप्रदर्शनाय शिष्यप्रश्नमवतारयति
नन्वेवमिति।१। शिष्येणैवं पृष्टो गुरुरिति मूढस्य विद्याधिकारे वनास्तीत्याह। धर्मेति। एषोऽति
मूढो नादौ संसारेऽतीतेषु जन्मस्वनुष्ठितसुकृतदुष्कृतवशान्नानाविधदेहस्वीकारेण पुनः पुनर्जा

नन्वेवं वासनानंदाद्ब्रह्मानंदादपीतरे। वेत्तु योगी निजानंदं मूढस्यात्रास्ति का गतिः॥१॥
धर्माधर्मवशादेष जायतां म्रियतामपि॥ पुनः पुनर्देहलक्षैः किं नो दाक्षिण्यतो वद॥२॥ अ
स्ति वो नु जिघृक्षुत्वाद्दाक्षिण्येन प्रयोजनं॥ तर्हि ब्रूहि स मूढः किं जिज्ञासुर्वा पराङ्मुखः॥३॥

यतां म्रियतां चेत्यर्थः॥२॥ सर्वानुग्राहकत्वादाचार्येण तस्यापि काचन गतिर्वक्तव्येति शिष्य आह
अस्तीति। वो युष्माकमनुजिघृक्षुत्वादनुग्रहीतुमिच्छतोऽनुजिघृक्षवस्तेषां भावस्तत्त्वं तस्माच्छिष्यो
द्धरणेऽप्ययुक्तत्वाद्दाक्षिण्यतस्तदुद्धरणे प्रयोजनमस्तीत्यर्थः॥ एवं शिष्यवचनमाकर्ण्य गुरुरस्ते
विकल्पं पृच्छति। तर्हीति। यदि मूढस्यापि काचन गतिर्वक्तव्या तर्हि स मूढः किं रागी विरक्तो वाभ

रागी चेत्तद्रागानुसारेण कर्मैवोपासनं वा वक्तव्यमिति प्रथमे परिहारमाह उपास्तिमिति विमुखाय तत्त्वज्ञानविमुखाय बहिर्मुखायेत्यर्थः यथोचितं यथायोग्यं ब्रह्मलोकादिकामश्चेदुपास्तिं ब्रूया स्वर्गादिकामश्चेत्कर्म ब्रूयादित्यर्थः जिज्ञासुत्वेऽपि सोऽपि विवेकी मंदप्रज्ञो वेति विकल्प्याः ति विवेकिनः पूर्वाध्यायोक्तप्रकारेण योगेन ब्रह्मसाक्षात्कारमभिप्रेत्य मंदप्रज्ञस्य तद्दर्शनोपायमा

> उपास्तिं कर्म वा ब्रूयाद्विमुखाय यथोचितं मंदप्रज्ञं तु जिज्ञासुमात्मानंदेन बोधयेत् ॥४॥
> बोधयामास मैत्रेयीं याज्ञवल्क्यो निजप्रियां नवा अरे पत्युरर्थे पतिः प्रिय इतीरयन् ॥५॥

ह मंदप्रज्ञमिति यो मंदप्रज्ञः मंदा अल्पा प्रज्ञा बुद्धिर्यस्य स मंदप्रज्ञस्तं जिज्ञासुं ज्ञातुमिच्छुर्जिज्ञासुस्तमात्मानंदेन आत्मानंदविवेचनमुखेन बोधयेत् ४ एवं केन कां बोधितेत्यत आह बोधयेति याज्ञवल्क्य एतन्नामको यजुःशाखाविशेषप्रवर्तकः कश्चिदृषिः मैत्रेयीमेतन्नामिकां निजप्रियां स्वभार्यां नवा अरे पत्युरर्थे पतिः प्रिय इति नवा अरे पत्युः कामाय पतिः प्रियो भवतीत्यादिप्रकारेणेरयन् ब्रुवन् बोधयामास बोधितवानित्यर्थः ॥५॥

उत्तरत्र परप्रेमास्पदत्वेन परमानंदरूपतामितिवाक्येन परप्रेमास्पदत्वहेतुना आत्मनः परमानंदरूप
तां सिसाधयिषुरादौ परप्रेमास्पदत्वहेतुसमर्थनाय तावदुदाहृतवाक्यस्योपलक्षणपरतामभिप्रेत्य
तत्प्रकरणस्थसकलपर्यायवाक्यतात्पर्यमाह। पतिरिति। पतिजायादिकं भोग्यजातं भोक्तृशेषत्वा
द्भोक्तृसंबंधेनैव प्रियं न स्वरूपेणेत्यभिप्रायः॥६॥ इदानीं पूर्वोदाहृतस्य न वा अरे पत्युः कामाय पति

पतिजायापुत्रवित्तपश्वुब्राह्मणबाहुजाः॥ लोकादेवा वेदभूतं सर्वं चात्मार्थतः प्रियं॥६॥ प
त्याविच्छा यदा पत्न्यास्तदा प्रीतिं करोति सा॥ क्षुदनुष्ठानरोगाद्यैस्तदा नेच्छति तत्सती॥७॥
न पत्युरर्थे सा प्रीतिः स्वार्थ एव करोति तां॥

प्रियो भवति आत्मनस्तु कामाय सर्वं प्रियं भवतीत्य
स्य वाक्यस्य तात्पर्यार्थं विभज्य दर्शयति। पत्याविति। यदा यस्मिन्काले पत्न्याः जायायाः पत्यौ भ
र्तरि विषये इच्छा कामो भवति तदा सा पत्नी पत्यौ प्रीतिं स्नेहं करोति। यदा तत्सती क्षुदादिनेच्छाभाव
हेतुना युक्तो भवति चेत्तत् तदा तं नेच्छति न कामयते॥७॥ एवं च सति किं फलितमित्यत आह। न पत्युरि
ति। जायया क्रियमाणा या प्रीति सा न पत्युरर्थे पत्युः प्रयोजनाय न किंतु जायाः तां पत्यौ प्रीतिं स्वा

नवा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवतीत्यादीनां नवा अरे
सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवतीत्यंतानां वाक्यानां तात्पर्यं क्रमेण
विभज्य दर्शयति । पतिश्चेत्यादिना पतिश्च भर्तापि स्वप्रयोजनायैव जायायां प्रीतिं करोति न जाया
प्रीतये इत्यर्थः ॥८॥ नन्वेकैककामनया प्रवृत्तौ प्रीतिः स्वार्था भवतु युगपदुभयेच्छया प्रवृत्तौ तु प्री
तेरुभयार्थता स्यादित्याशंक्याह । अन्योन्येति । एवमुक्तेन प्रकारेण स्वेच्छयैव स्वकामनापूरणेच्छये

पतिश्चात्मन एवार्थे न जायार्थे कदाचन ॥८॥ अन्योन्यप्रेरणेऽप्येवं स्वेच्छयैव प्रवर्तनं ॥ श्मश्रु
कंटकवेधेन बालो रुदति तत्पिता ॥ चुंबत्येव न सा प्रीतिर्बालार्थे स्वार्थ एव सा ॥९॥ निरिच्छम
पि रत्नादि वित्तं यत्नेन पालयन् ॥ प्रीतिं करोति सा स्वार्थे वित्तार्थत्वं न शंकितं ॥१०॥ वप्रवर्तन

मुभयोरपीति शेषः ॥ स्वेच्छया प्रवर्तनमेव दर्शयति । श्मश्र्विति । पित्रा क्रियमाणं पुत्रमुखादि चुंब
नं न पुत्रप्रीत्यर्थं तस्य श्मश्रुकंटकवेधेन रोदनकर्तृत्वात् तत्सत्पितुः स्वतुष्ट्यर्थमेवेत्यवगंतव्यमित्यर्थः
चेतनेषु जायापुत्रादिषु क्रियमाणायाः प्रीतेः स्वार्थत्वपरार्थत्वसंदेहसंभवादचेतनत्वेन इच्छामात्र

चेतनस्तेपि वाहनादीच्छारहितपश्वादिविषयस्य नवा अरे पशूनामितिवाक्यस्य तात्पर्यमाह। अनिच्छन्तीतीति। बलीवर्दमनडुहिं अनिच्छतिभारं वोढुमिच्छामकुर्वत्यपि बलाद्विवाहयिषते। वाहयितुं कामयते तत्र वहनादिविषया याः प्रीतेर्वणिग्विषयैव न बलीवर्दार्थेत्यर्थः॥११॥ नवा अरे ब्राह्मणस्य कामायेतिवाक्यस्य तात्पर्यमाह। ब्राह्मण्यमिति ब्राह्मण्यनिमित्तया पूजया ब्राह्मणोहमस्मीत्यभि

अनिच्छतिबलीवर्दे विवाहयिषते बलात्॥ प्रीतिः सा वणिगर्थैव बलीवर्दार्थता कुतः॥११॥
ब्राह्मण्यं मेस्ति पूज्योहमिति तुष्यति पूजया॥ अचेतनाया जातेर्नो संतुष्टिः पुंस एव सा॥१२५
क्षत्रियोहं तेन राज्यं करोमीत्यत्र राजता॥ न जातेर्वैश्यजात्यादेर्योजनायेदमीरितं॥१२॥ स्व
र्गलोकं ब्रह्मलोको स्तां ममेत्यभिवांछने॥ लोकयोर्नोपकारोस्य स्वभोगायैव केवलं॥१४॥०

मानवानेव तुष्यति न जडजातिरित्यर्थः॥१२॥ नवा अरे क्षत्रस्येत्यादिवाक्यस्य तात्पर्यमाह। क्षत्रियो यद्यपि। राज्योपभोगनिमित्तं सुखं क्षत्रियत्वजातिमत एव न क्षत्रियजातेरित्यर्थः॥१३॥ दं क्षत्रियोदाहरणं वैश्याद्युपलक्षणार्थमित्याह वैश्येति॥१३॥ नवा अरे लोकानां कामायेत्यादिवाक्यस्य तात्पर्य

य

209

आ०॥
॥

किं चंद्रस्येति। पाप नष्टये पापनिवृत्तये तत्पूजनेन निष्पापदेवार्थे स्वतः पापरहितानां देवानां न प्रयोजनं यत्किं तु स्वार्थे पूजाकर्तुः प्रयोजनाय ॥१५॥ किं च ऋगाद्य इति। दुर्ब्राह्मण्यं ब्रात्यत्वं तच्च दुर्ब्राह्मण्यमनुष्यावीत रजातिरूपं तद्रहितेषु वेदेषु न प्रसज्यते इत्यर्थः ॥१६॥ किं च भूम्यादीति। सर्वप्राणिनो वस्थानप्रदानतृण्निवारणपाककरणाद्रशोषणावकाशप्रदानाख्यैर्हेतुभिर्निमित्तैः पृथिव्यादीनि पंचभू

ईशाविष्ण्वादयो देवाः पूज्यंते पाप नष्टये ॥ न तन्निष्पापदेवार्थे स्वार्थं तन्नूपयुज्यते ॥१५॥ ऋगाद्यो याधीयंते दुर्ब्राह्मण्यानवाप्तये ॥ न तत्प्रसक्तं वेदेषु मनुष्येषु प्रसज्यते ॥१६॥ भूम्यादि पंच भूतानि स्थानतृट्पाकशोषणेः ॥ हेतुभिश्चावकाशेन वाछंत्येषां न हेतवे ॥१७॥ स्वामिभृत्यादिकं सर्वं स्वोपकाराय वांछति ॥ तत्तत्कृतोपकारस्तु तस्य तस्य न विद्यते ॥१८॥

तानि वांछंति। अपेक्षंते एषां पृथिव्यादीनां तु हेतव अवस्थानवांछनादीनि निमित्तानि न संति ॥ अतो न स्वयमाकांक्षते इत्यर्थः ॥ इदानीं नवाभरे सर्वस्य कामाय इत्यस्य वाक्यस्य तात्पर्यमाह। स्वामिभृत्यादीति ॥ भृत्यादिः सर्वो जनः स्वाम्यादिकं सर्वं स्वोपकाराय स्वप्रयोजनाय वांछति ॥ एवं स्वाम्यादिरपि ॥१८॥ ॥०॥

ननुश्रुतावेवं बहूदाहरणदर्शनं किमर्थं कृ तमित्याशंक्याह सर्वेति इच्छापूर्वकेषु सर्वेष्वपि भोजनादिव्यवहा-
रेषु एवमात्मनस्तु कामाय सर्वं प्रियं भवतीत्युक्तेन प्रकारेण अनुसंधातुं अनुसंधाना य ईदृशा पतिजायादि-
षु प्रीतिदर्शनरूपं उदाहरणबाहुल्यमुक्तमिति शेषः॥ तेन कारणेन स्वास्वबोधिनीमतिं बुद्धिं वासयेत् सर्वस्यापि स्व-
शेषत्वावगमे स्वात्मनः प्रियतमत्वानुसंधानवतीं कुर्यादित्यर्थः॥१९॥ ननु आत्मशेषत्वेन सर्वस्य प्रियस्य तन्ने

सर्वेष्वपि च वस्तुषु एवमनुसंधानमीदृशं उदाहरणबाहुल्यं तेन स्वां वासयेन्मतिं १९॥ अथ केयं भवेत्प्री-
तिः श्रूयते या निजात्मनि रागो वध्वादिविषये श्रद्धा यागादिकर्मणि भक्तिः स्याद्गुरुदेवादाववि

शेषत्वावगमे स्वात्मनः प्रियतमत्वमनुपपन्नं विकल्प्यमाने प्रीतेरेव दुर्निरूपत्वादित्यभिप्रायेण प्रीतिस्वरूपं पृच्छति अथ
रात्मनः प्रियतमत्वमुक्तमनुपपन्नं विकल्प्यमाने प्रीतेरेव ... रागरूपा किं वा श्रद्धारूपा उत भ-
क्तिरूपामिति अथ शब्दः प्रश्नार्थः या निजात्मनि प्रीतिः श्रूयते तृतीय प्रीतिः का किं रागरूपा किं वा श्रद्धारूपा उत भ
क्तिरूपा यद्वेच्छारूपेति किं शब्दार्थश्चतुर्ष्वपि पक्षेषु प्रीतेः सर्वविषयत्वं न संभवती स्याह रागइति राग
स्य वध्वादिष्वेव स्यान्न यागादिषु श्रद्धायाः यागादिष्वेव स्यान्न वध्वादिषु भक्तिश्च गुर्वादिष्वेव स्यान्नेतरेषु इच्छायाश्च
सुविषयेष्वेव स्यान्नेतरविषयास्ततो न सर्वविषयत्व

आ० न०
११४८

३ न प्रकारस्य चतुष्टयातिरिक्तं पक्षमादायोत्तरमाह। नहीति तर्हि प्रीते रागादिरूपत्वासंभवे सति सुख
मात्रानुवर्त्तिनी सुखमेव सुखमात्रं सुखमात्रमनुसृत्य वर्त्तनं इति सुखमात्रानुवर्त्तिनी सुखैकगो
चरेत्यर्थः सात्विकी सत्त्वगुणपरिणामरूपा वृत्तिरंतःकरणवृत्तिः प्रीतिरस्तु ननु तर्हि सा प्रीतिर्वि
छेदे स्यादाशंक्य परिहरति प्रामेनेति इष्टान्नादप्राप्तसुखादिमात्रविषयायं तु विषयाँतेल ध्वेस

सर्वे प्रा

तद्धस्तु सात्विकी वृत्तिः सुखमात्रानुवर्त्तिनी प्रामेन ष्टेपि सद्भावादिच्छातो व्यतिरिच्यते।
सुखसाधनतोपाधेरन्नपानादयः प्रियाः आत्मानुकूल्या रन्नादिसमभ्येर सुनात्रकैः २३

स्यादेन ष्टेपि तस्मिन्विषये विद्यमानत्वादिच्छा तद्दृच्छाया व्यतिरिच्यते भिद्यते २२ इदानीं सुखसाधनभू
तेष्वन्नादिष्विवात्मन्यपि प्रीतिदर्शनादात्मनोप्यन्नादिवत्सुखसाधनतास्यादितिशंकते सुखेति अन्न
पानादयः सुखसाधनतोपाधिना यथा प्रियाद्दृष्टाः आत्मापि आनुकूल्या प्रियतावदन्नादिसम अन्नप
नादिवत्सुखसाधनं स्यादित्यर्थः अत्रेदमनुमानं सूचितं विमत आत्मा सुखसाधनं भवतु मर्हति प्रियत्वादि

212

अन्नादिषु भोग्यत्वमुपाधिरित्यभिप्रायेण परिहरति अमुनेति अत्र लोके अमुना सुखसाधनत्वया अ
नुकूलेन अनुकूलयितव्यः कः स्यान्न कोपि स्यात् आत्मातिरिक्तस्य भोक्तुरभावादित्यर्थः २३ ननु स्वय
मेवानुकूलयितव्यः स्यादित्यत आह नैकस्मिन्निति एकस्यैवात्मनो युगपदुपकार्यत्वमुपकारकत्वं चेति
धर्मद्वयं विरुद्धमित्यर्थः ननु अन्नादिवत्सुखसाधनत्वाभावेपि सुखवद्धेतुकृ शेषत्वात्स्यादित्याशंक्य आत्म
प्रि

अनुकूलयितव्यः स्यान्नैकस्मिन्कर्मकर्तृता सुखे वैषयिके प्रीतिमात्रमात्मातिप्रियः २४ सुखे
व्यभिचरत्येषा नात्मनि व्यभिचारिणी एकं त्यक्त्वान्यदादत्ते सुखं वैषयिकं सदा २५॥

तो निरतिशयप्रेमास्पदत्वान्नैवमिति परिहरति सुखे इति वैषयिके विषयजन्ये सुखे प्रीतिमात्रं प्रीतिरेव न
निरतिशया आत्मा तु अतिप्रीतो निरतिशयप्रेमविषयः अत आत्मा न विषयजन्यसुखतुल्य इत्यर्थः २४ वि
तत्रोभयत्रोपपत्तिमाह सुखे व्यभिचरतीति सुखे वैषयिके सुखे मीयमानानामेषा प्रीतिर्व्यभिचरति कदाचि
सुखांतरं गच्छति न तस्मिन्नेव नियता ऽवतिष्ठते आत्मनि तु विद्यमाना प्रीतिर्नव्यभिचारिणी विषयांतर

पंचदशीव्या० रत्नप्रभा ॥२१५॥

आत्मनितुल्यभावं दर्शयति नात्मेति अयोग्यत्वादित्यर्थः फलितमाह तस्मिन्निति हानादिविषयत्वा
भावेप्यात्मनस्तृणादिवदुपेक्षाविषयत्वं स्यादिति शंकते हानेति हानं परित्यागः आदानं स्वीकारः ॥
उपेक्षा दासीन्यं २६ आत्मनो हानाद्यविषयत्ववदुपेक्षाविषयत्वमपि न संभवत्ययोग्यत्वादित्यभि
प्रायेण परिहरति उपेक्षितुरिति उपेक्षितुरुपेक्षाकर्तुर्योनिजात्मा ऽविनाशिस्वरूपमस्ति तस्य स्वरू

नात्मा त्याज्यो न चादेयस्तस्मिन्व्यभिचरेत्कथं हानादानविहीनेस्मिन्नुपेक्षा चेत्तृणादिवत् २९
रागक्रोधाभिभूतो नो मुमुक्षुर्वीक्ष्य
वत् २६ उपेक्षितुः स्वरूपत्वान्नोपेक्ष्यत्वं निजात्मनः

पत्वात्स्वस्वरूपत्वादेव स्वव्यतिरिक्ततृणादिवन्नोपेक्ष्यत्वं उपेक्षाविषयत्वं न विद्यत इति शेषः ननु हानविष
यत्वमात्मनो नास्तीत्युक्तमनुपपन्नं द्वेष्यत्वाज्ज्वलदङ्गारादिवदिति शंकते रागेति यतो मुमुक्षोर्दृश्यते ननु आ
त्मनि द्वेषसंभवात् वृश्चिकादिवद्धास्यापि त्याज्य इति पद्युत्येनेति शेषः २७ श्रीराम जयराम ॥ ७

तत्त्यागस्यात्मन्यपि तिरस्कारदेहविषयत्वान्नैवमिति परिहरति नत्विति त्यक्तुमुमुक्षुर्योऽसौ चितस्य देहस्या
त्मता नास्ति कस्य तर्हि सेत्यत आह त्यक्तुरेव सेति त्यक्तुर्देहत्यागकारिणो देहादितिरिक्तस्य जीवस्य सात्मते
त्यर्थः २८ भवतु त्यक्तुरात्मत्वं प्रकृते किमायातमित्यत आह नत्यक्तेति अतो नात्मनस्त्याज्यत्वमित्यभिप्रा री न
यः माभूदात्मनि द्वेषः देहे तूपलभ्यत एवेत्याशंक्याह सात्म्येति सात्म्यदेहगोचरे द्वेषे सत्यपि का क्षति

ततो द्वेषाद्वेत्याज्य आत्मेति यदि तन्न हि त्यक्तुं योग्यस्य देहस्य नात्मता त्यक्तुरेव सा २८ ॥
न त्यक्तर्येस्ति सद्द्वेषस्त्याज्यद्वेषे तु का क्षतिः आत्मार्थत्वेन सर्वस्य प्रीतेश्चात्मा ह्यतिप्रियः २९

रित्यात्मनस्त्यागाभाववादिनोपमेतिशेषः नत्वेवं न वा अरे पत्युः कामाय सारभ्यात्मनस्तु कामाय सर्वं प्रियं
भवतीत्येतस्याः श्रुतेस्तात्पर्यपर्यालोचनयात्मनः प्रियतमत्वं प्रदर्शयितुं युक्तिं तावत्तद्दर्शयति आत्मेति ॥
सर्वस्य सुखसाहितस्य तत्साधनजातस्य पतिजायादेरात्मार्थत्वेन स्वस्योपकारकत्वेन प्रीतेश्च प्रियत्वादपि
आत्मा उपकार्यः स्वयमतिशयेन प्रियः सिद्धो हि २९ ॥

॥श्री॰ नं
११८

एतदेव दृष्टांतप्रदर्शनेन स्पष्टयति यथेति लोके यथा पुत्रमित्रात्पुत्रस्य मित्रभूतात्पुत्रद्वारा प्रीतिविषयाद्ध
नरत्नादेः सकाशात्पुत्रो देवदत्तादिरव्यवधानेन प्रीतिविषयत्वात्तस्मादतिशयेन प्रियो भवति तत्पितुर्वि
त्तमित्रादेस्तथा तद्वत्स्वसंबंधित्वेन प्रीतिविषयात्सर्वस्मात्स्वयमतिशयेन प्रिय इत्यर्थः एवमात्मनि श्रु
तियुक्तिभ्यामुपपादितां निरतिशयां प्रीतिमनुभवप्रदर्शनेन द्रढयति मा न भूवमिति अहं मा न भूवमिति

सिद्धो यथा पुत्रमित्रात्पुत्रः प्रियतरस्तथा मा न भूवमहं किंतु भूयासं सर्वदेत्यसौ ॥७॥ आशीः
सर्वस्य दृष्टेति प्रत्यक्षा प्रीतिरात्मनि इत्यादिभिस्त्रिभिः प्रीतौ सिद्धायामेवमात्मनि ॥८॥

न कदापि ममासत्त्वमस्तु किंतु सर्वदा भूयासं सदा मम सत्तास्तु इत्येवंरूपा आशीः प्रार्थना सर्वप्राणिजातस्य संबंधि
नी दृष्टा सर्वोऽप्येवमेव प्रार्थयत इत्यर्थः ॥७॥ फलितमाह प्रत्यक्षेति यत एवं सर्वैः प्रार्थ्यते अत आत्मनि नि
रतिशया प्रीतिः प्रत्यक्षसिद्धेत्यर्थः वृत्तानुकीर्तनपुरःसरं मतांतरं दूषयितुमनुभाषते इत्यादिभिरिति इतिश
ब्देनानुभवः परामृश्यते आदिशब्देन युक्तिः श्रुतिरित्यादिभिरनुभवयुक्तिश्रुतिलक्षणैस्त्रिभिः प्रमाणैरेवमुक्ते

केश्चिच्छ्रुत्यादितात्पर्यानभिज्ञैरात्मनः पुत्रभार्यादिशेषत्वं पुत्रादीनां स्वस्योपसर्जनत्वमीरितमभिहि ति

तं इदं कुतोवगतमित्यत आह एतादिति एवं विवक्षया एवं कैश्चिदीयेत इत्येतदभिव्यक्तीकरणाभिप्रा

येणात्मा वै पुत्रनामासीत्यादिक्या श्रुत्या पुत्रस्य मुख्यात्मत्वमीरितमित्यर्थः ३२ ॥ किंच तत्पुत्रस्य मु

ख्यात्मत्वं उपनिषदि ऐतरेयोपनिषदादौ स्फुटं व्यक्तमभिहितमिति शेषः केन वाक्येनेत्याकांक्षा

पुत्रभार्यादिशेषत्वमात्मनः कैश्चिदीरितं एतद्विवक्षया पुत्रे मुख्यात्मत्वं श्रुतीरितं ३२ ऽयमसौ

आत्मा वै पुत्रनामेति तच्चोपनिषदि स्फुटं सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रति

यां तद्व्याख्यामर्थतः पठति सोऽस्येति अस्य पितुः पुरुषो ह वा अयमादितो गर्भो भवतीति प्रकरणादौ पुरु

षदेहे गर्भत्वेनोक्तः अयं सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयतीत्यत्रातिशयेन पालनीयतयोक्तः

पुत्ररूप आत्मा पुण्येभ्यः कर्मभ्यः पुण्यकर्मानुष्ठानाय प्रतिधीयते प्रतिनिधित्वेनावस्थाप्यते पित्रेति शेषः ३३ ॥

अथानं तस्य पितुरयं प्रत्यक्षेण परिदृश्यमानत्तरः पुत्रादन्यो नरसाग्रस्त्तः पितृरूप आत्मा स्वयं कृ
तकृत्योनुष्ठितकृत्यजातः सन्प्रमीयते म्रियतइत्यर्थः उक्तस्यार्थस्य दृढीकरणाय पुत्ररहितस्य परलो
काभावप्रदर्शनपरस्य नापुत्रस्य लोकोस्तीति वाक्यस्यार्थमाह तस्येति यतः पुत्रस्य मुख्यमात्म
त्वमस्ति अतएवात्मनि स्वस्मिंस्सत्यपि स्थितेपि अपुत्रस्य पुत्ररहितस्य पितुर्लोकः परलोको नास्तिहि

अथास्येतर आत्मायं कृतकृत्यः प्रमीयते सत्यप्यात्मनि लोकोस्ति नापुत्रस्यात एवहि २४
अनुशिष्टं पुत्रमेव लोक्यमाहुर्मनीषिणः मनुष्यलोको जय्यः स्यात्पुत्रेणैव नेतरेण नो २५

इदं पुराणादिषु प्रसिद्धमित्यर्थः २४ व्यतिरेकमुखेनोक्तस्यार्थस्यान्वयमुखेन प्रतिपादकस्यानुशिष्टं पुत्रं लोक्य
माहुरिति वाक्यस्यार्थमाह अनुशिष्टमिति मनीषिणः शास्त्रार्थाभिज्ञा अनुशिष्टं वक्ष्यमाणरीत्या [illegible]
न्धिभिर्मन्त्रैः शिक्षितमेव पुत्रं लोक्यं लोकाय हितं परलोकसाधनमाहुरित्यर्थः इदानीमैहिकसुखस्यापि पुत्र
हेतुकत्वप्रतिपादनपरं सोयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणेति श्रुतिवाक्यमर्थतः पठति मनुष्येति

अनुशिष्टं पुत्रं लोक्यमित्यत्र पुत्रानुशासनं उक्तं इदानीं तस्यावसरं लक्षणं आख्यायति मुमूर्षुरिति आ

अनुशिष्टं पुत्रं लोक्यमित्यत्र पुत्रानुशासनं उक्तं इदानीं तस्यावसरं लक्षणं मंत्रांश्च दर्शयति मुमूर्षुरिति आ
दिशब्देन तं यज्ञस्त्वं लोक इति मंत्रौ गृह्येते एभिस्त्वं ब्रह्मेत्यादिभिस्त्रिभिर्मंत्रैर्मुमूर्षुः पिता मरणावसरे पु
त्रं मंत्रयेत् पुत्रस्यानुशासनं कुर्यादित्यर्थः उक्तमर्थं निगमयति इत्यादीति न केवलमयं श्रुतिसिद्धोर्थः ॥ २६ ॥
किंतु लोकप्रसिद्धोपीत्याह लौकिकेति तदेवोपपादयति स्वस्मिन्निति तथैव यत्नं कुरुत इति स्वस्मि

मुमूर्षुर्मंत्रयेत् पुत्रं त्वं ब्रह्मेत्यादिमंत्रकैः इत्यादिश्रुतयः प्राहुः पुत्रभार्यादिशेषतां ॥ २६ ॥
लौकिका अपि पुत्रस्य प्राधान्यमनुमन्वते स्वस्मिन्मृतेपि पुत्रादिर्जीवेद्वित्तादिना यथा ॥ २७ ॥
तथैव यत्नं कुरुते मुख्याः पुत्रादयस्ततः वांछेत्तावता नात्मा शेषो भवति कस्यचित् ॥ २८ ॥

फलितमाह मुख्या इति यस्मात्स्वप्रया
सिन्पुत्रादेरेकेनादिशब्देन भार्यादयो गृह्यंते द्वितीयेन क्षेत्रादयः ॥ २७ ॥ ततस्तस्मात्पुत्रा मुख्याः प्रधानभूता इत्यर्थः एवं वेदलोकप्रसि
स्वसोऽप्यपि पुत्रादिजीवनोपायं संपादयति बाढं इति तर्ह्यात्मनः शेषित्वोपपादनं व्याकुप्येदित्याशंक्याह
द्धिभ्यां दर्शितं पुत्रादिप्राधान्यमंगीकरोति एतावतेति एतावता पुत्रादेः किंचित्प्राधान्यमस्तीत्येतावता ॥ २८ ॥

द्वा

श्री०आ०म०

माने

न हि प्रति सौगतार्थसिद्धिरित्याशंक्य यत्र यत्र व्यवहारे परस्य यस्यात्मत्वं विवक्षते तस्य तस्यात्मत्वं तत्र तत्र प्राधान्य
प्रदर्शनायोपोद्घातत्वेनात्मनस्त्रैविध्यमाह । गौणेति गौणात्मा मिथ्यात्मा मुख्यात्मा चेत्ययमात्मा त्रिधा भवति
तत्र पुत्रादेर्गौणात्मत्वप्रदर्शनाय लोके गौणप्रयोगमुदाहरति देवदत्त इति अयं देवदत्तः सिंह इति यद्देवदत्तसिंह
योरैक्यं तद्गौणमौपचारिकं तत्र हेतुमाह । एतयोरिति ३ दार्ष्टान्तिके योजयति पुत्रादेरिति अनन्तरं मिथ्यात्मा
नं दर्शयति भेदोऽस्तीति पंचकोशेष्वानंदमयाद्यन्नमयांतेषु पंचसु कोशेषु साक्षिणः सकाशाद्द्वितीयमानोऽपि भेदो

गौणमिथ्यामुख्यभेदैरात्मायं भवति त्रिधा देवदत्तोऽस्तु सिंहोऽयमित्यैक्यं गौणमेतयोः ३ ॥ भेदस्य
भासमानत्वात्पुत्रादेरात्मता तथा भेदोऽस्ति पंचकोशेषु साक्षिणो न तु भात्यसौ ४ मिथ्यात्म
तातः कोशेनां स्थाणोश्चोरात्मता यथा न भाति भेदो नाप्यस्ति साक्षिणोऽप्रतियोगिनः ५

नावभासते अतस्तेषां मिथ्यात्मत्वमित्यर्थः ४ मिथ्यात्मत्वे दृष्टान्तमाह । स्थाणोरिति वस्तुतश्चोराद्भिन्नस्य स्था
णोश्चोररूपत्वं यथा मिथ्या तद्वदित्यर्थः एवं गौणमिथ्यात्मानावुपपाद्येदानीं साक्षिणो मुख्यात्मत्वमुपपादय
ति न भातीति साक्षिणः साक्षिरूपस्यात्मनो गौणात्मनः पुत्रादेरिव कस्मादपि भेदो न भाति मिथ्यात्मनो देहा
देरिव भेदो नास्त्यपि तत्रोभयत्र हेतुरप्रतियोगिन इति हेतुगर्भितं विशेषणमप्रतियोगित्वात् यथा पुत्रादेर्दे

ननु भेदाभावेन साक्षिणो ऽहंगौणमिथ्यात्मत्वे माभूतां मुख्यात्मत्वं कुतस्त्यमत आह सर्वान्तरेति सर्वस्मादहं-
कृपुत्रादेरन्तरत्वात्सर्वसाक्षिणः प्रतीचः सर्वान्तरत्वेन प्रतीयमानत्वात्तस्यैव साक्षिण एवात्मत्वं मुख्यम-
नौपचारिकममिथ्यात्वेनाभ्युपगम्यत इत्यर्थः अत्रेदमनुमानं सूचितं विमतः साक्षी मुख्य आत्मा भवितु-
मर्हति सर्वान्तरत्वाद्यो मुख्य आत्मा न भवति स सर्वान्तरोऽपि न भवति यथाहंकारादिरिति केवलव्यतिरेकी

सर्वान्तरत्वात्तस्यैव मुख्यमात्मत्वमिष्यते सत्येवं व्यवहारेषु येषु यस्यात्मतोचिता तेषु तस्ये-
वशेषित्वं सर्वस्यान्यस्य शेषता ॥ ७८ ॥

भवत्वात्मत्रैविध्यं पुत्रादेः शेषित्वाभिधाने किमायातमित्यत आह सत्येवमिति एवमात्मत्रैविध्ये सति येषु
लौकिकवैदिकलक्षणेषु पालनपोषणश्रवणात्मतानुसंधानादिषु व्यवहारविशेषेषु यस्य पुत्रादेर्देहादेः
साक्षिणो वा आत्मत्वमुचितं भवति तेषु तस्य पुत्रादेर्देहादेः साक्षिणो वा शेषित्वं प्रधानत्वं अन्यस्य तद्व्यतिरि-
क्तस्य सर्वस्य शेषता उपसर्जनत्वं भवतीति शेषः ७८

एतदेव प्रपंचयति मुमूर्षोरित्यादिना श्लोकपंचकेन मुमूर्षोरिति गृहरक्षादौ कर्मविशेषे गौ-
णात्मैव पुत्रभार्यादिरूपएवोपयुज्यते उपयुक्तो भवति इतरे जिजीविषुत्वादित्यर्थः मुख्यात्मासा-
क्षी नोपयुज्यते अविकारित्वात् नापि मिथ्यात्मा तस्य मरणेनाऽखत्वादित्यर्थः फलितमाह पुत्र इ-
ति स्पष्टं ४३ उक्ते गृहरक्षादिव्यवहारे सत्यपि तस्मिन्नुदाहरणांतरे दृष्टांतमाह अध्येता वह्निरिति। १२

मुमूर्षोर्गृहरक्षादौ गौणात्मैवोपयुज्यते न मुख्यात्मा न मिथ्यात्मा पुत्रः शेषी भवत्यतः ४३
अध्येता वह्निरित्यत्र सन्नप्यग्निर्न गृह्यते अयोग्यत्वेन योग्यस्तु रेखावान् गृह्यते तथा ४४
कृशोऽहं पुष्टिमाप्स्यामीत्यादौ देहात्मतोचिता अनपेक्ष्य वपुर्भोगं चरत्युक्तं प्रदर्शितत ४५

अयमध्येता वह्निरित्यस्मिन् प्रयोगे स्वरूपेण विद्यमानोप्यग्निर्नाग्निशब्दार्थेनैव गृह्यते तत्र गृह्यते
अयोग्यत्वादित्यर्थः ४४ एवं गौणत्वप्राधान्यस्य लमुदाहृत्य मिथ्यात्मप्राधान्यस्य लमुदाहरति कृशो-
ऽहमिति अहं कृशो जातः अतोऽन्नभक्षणादिना पुष्टिं संपादयिष्यामीत्यादौ लौकिकव्यवहारेऽन्नभक्षणयो-
ग्यस्य देहस्यैवात्मत्वेन ग्रहणं तु उचितं उक्तमर्थं लौकिकव्यवहारप्रदर्शनेन द्रढयति न पुत्रमिति ॥ ४५॥ कि

न पुत्रं विनियुंक्ते न पुष्टिहेत्वन्नभक्षणे ४६

222

किंच तपसेति यदा तु तपः कृत्वा तु तपः कृत्वा स्वर्गं संपादयिष्यामी त्यादिव्यवहारं करोति तदा तु शब्द
वाच्यविज्ञानमपस्य वा स्मत्वमुचितं न देहादेरित्यर्थः तदेवोपपादयति अनपेक्ष्येति यतो नेदृ
स्यात्मत्वमुचितं ततो देहभोगपरित्यागपूर्वकं कर्तृत्वरूपकारकवृच्छ चांद्रायणादिकं चरतीत्यर्थः ४६ किं
च मोक्ष्येहमिति यदा पुमान् शमादीन्संपाद्य मुक्तिं प्राप्स्यामीति मतिं करोति तदा गुरुशास्त्राभ्यां आ

तपसा स्वर्गमेष्यामीत्यादौ कर्त्रात्मतोचिता अनपेक्ष्य वपुर्भोगं चरेत्कृच्छादिकं ततः ४६
मोक्ष्येहमित्यत्र पुंसश्चिदात्मत्वं तदा पुमान् तद्वेत्ति गुरुशास्त्राभ्यां ननु किंचित्करोमि वै
मोक्ष्येहमित्यत्र पुंसः चिदात्मत्वं तदा पुमान् तद्वेत्ति गुरुशास्त्राभ्यां ननु किंचित्करोमि
ति ४७ विप्रक्षत्रादयो यद्वद्बृहस्पतिसवादिषु व्यवस्थितास्तथा गौणमुख्यामिथ्यो

चार्योपदेशाद्वाक्यार्थविचारजन्यापरोक्षज्ञानेन नाहं कर्तास्मि सच्चिदानंदब्रह्माहमस्मीति चिदात्मान
मवगच्छति तस्य चिदात्मत्वमेवोचितं न तु तत्र कर्त्रात्मत्वमित्यर्थः ४७ उदाहृतानां त्रिविधानामा
त्मनां व्यवहारविशेषेषु व्यवस्थया प्राधान्ये दृष्टांतमाह विप्रेति यथा ब्राह्मणो बृहस्पतिसवेन य
जेतेत्यत्र ब्राह्मणस्यैवाधिकारो न क्षत्रियवैश्ययोः राजा राजसूयेनेत्यत्र राज्ञ एवाधिकारो न ब्राह्म
णवैश्ययोः वैश्यो वैश्यस्तोमेन यजेतेत्यत्र वैश्य

223

आ॰ नं॰
॥१०॥

फलितमाह तत्रतत्रेति यस्मिन्यस्मिन्व्यवहारे योय आत्मा उचितो भवति तत्रतत्र तस्मिंस्तस्मिन्व्यवहा(मू)
रउचित उपयोगितया प्रधानभूत आत्मन्येव प्रीतिरतिशायिनी अतिशयवती तच्छेषे तस्यात्मनः शेषे
शेषभूतेऽनात्मनि आत्मव्यतिरिक्ते वस्तुनि प्रीतिः प्रीतिमात्रं न निरतिशयं प्रेमेत्यर्थः अन्यत्र आत्म
तच्छेषाभ्यामन्यस्मिन्वस्तुनि नोभयमुभयविधमपि प्रेम नास्तीत्यर्थः ॥४९॥ अन्यत्र नोभयमि

तत्रतत्रोचिते प्रीतिरात्मन्येवातिशायिनी अनात्मनि तु तच्छेषे प्रीतिरन्यत्र नो
भयं ४९ उपेक्ष्यं द्वेष्यमित्यन्यद्द्विधा मार्गे तृणादिकं उपेक्ष्यं व्याघ्रसर्पादि द्वेष्यमेवं रि
चतुर्विधं ॥५०॥

त्यत्राभिहितस्यान्यशब्दार्थस्यावांतरभेदमाह उपेक्ष्यमिति अन्यदन्यदित्युच्यमानं वस्तूपेक्ष्यं उपेक्षा
विषयः द्वेष्यं द्वेषविषयश्चेति द्विधा द्विप्रकारं भवति तदुभयमुदाहरति मार्गेति मार्गगतं तृणलोष्टा
दिकमुपेक्ष्यं स्वस्योपद्रवहेतु व्याघ्रादिकं तद्द्वेष्यमित्यर्थः फलितमाह एवमिति ॥५०॥ श्री

चतुर्विध्यमेवदर्शयति आत्मेति नन्वात्मादीनां चतुर्णामपि प्रियत्वमस्त्वादिकं किं नियतं नेत्याह चतुरिति अ
यमेव प्रियतमः अयमेव प्रियः इदमेवोपेक्ष्यं इदमेव द्वेष्यं नान्यदिति नियमो नास्तीत्यर्थः किं तर्हि तत्तत
आह किं त्विति तस्मात्तस्मात्कार्यविशेषादुपकारापकारादिरूपात्तथा तथा प्रियादिरूपेतत्यर्थः ५०
सर्वेत्रानियमप्रयोजनाय प्रसिद्धद्वेष्यव्याघ्रतद्भावं दर्शयति स्यादिति यदा व्याघ्रः स्वभक्षणाय सन्मुख
आत्माद्येषु उपेक्ष्यं च द्वेष्यं चेति चतुर्ष्वपि न व्यक्तिनियमः किंतु तत्तत्कार्ये तथा तथा ५१ स्या
दा व्याघ्रः सन्मुखो द्वेष्यो ऽस्तु पेक्ष्यस्तु पराङ्मुखः लालनादनुकूलश्चेद्विनोदायेति शेषतां ५२
व्यक्तीनां नियमो मा भूल्लक्षणं तु व्यवस्थितिः आनुकूल्यप्रातिकूल्यद्वयाभावश्च लक्षणं ५३
आगच्छति तदा द्वेष्यो भवति स एव पराङ्मुखो गच्छति चेदुपेक्ष्यो भवति स एव यदि लालनात्खानुकूलो भवति तदा
विनोदायेति विनोदसाधनं भवतीति शेषतां स्वस्योपकारकत्वेन प्रियत्वं भजतेरसमभिप्रायः ५२ नन्वेकस्यैव व
स्तुनः प्रियत्वादिधर्मत्रयांगीकारे व्यवहारव्यवस्था न स्यादित्याशंक्याह व्यक्तीनामिति व्यक्तिनियमाभावे
पि लक्षणवशाद्व्यवस्था भविष्यतीत्यर्थः किं लक्षणमित्याकांक्षायां तल्लक्षणमाह आनुकूल्यमिति अ

एतावता ग्रंथसंदर्भेण उपपादितमर्थं बुद्धिसौकर्याय संक्षिप्य कथयति आत्मेति आत्मा प्रत्यगानं
दः प्रेयान् इतिशयेन प्रियः शेषः स्वोपसर्जनभूतः पदार्थः प्रियस्तदन्ययोस्ताभ्यामात्मनस्त
च्छेषाच्चान्ययोर्व्याघ्रपथिगततृणादिरूपयोर्द्वेषोपेक्षे यथाक्रमं भवत इति एवं चानुविधेन लो
के व्यवस्थितः व्यवस्थां प्राप्तः उक्तप्रकारचतुष्टयातिरिक्तं न किंचिद्विद्यत इत्यभिप्रायः अयमर्थः

आत्मा प्रेयान् प्रियः शेषो द्वेषोपेक्षे तदन्ययोः इति व्यवस्थितो लोके याज्ञवल्क्यम...
तं च सत् ५४ अयं त्वापि श्रुतिः प्राह पुत्राद्वित्तात्तथान्यतः सर्वस्मादान्तरं तत्तदि...

श्रुत्यभिमतोऽस्त्याह याज्ञवल्क्येति आत्मादीनां प्रियतमत्वादिकं यत् याज्ञवल्क्यमतं च याज्ञवल्क्यस्यापि
संमतमित्यर्थः ५४ न केवलं मैत्रेयीब्राह्मणे आत्मनः प्रियतमत्वमुक्तं किंतु पुरुषविधब्राह्मणेपी
त्यभिप्रायेण तद्वाक्यार्थं संगृह्णाति अन्यत्रापीति तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्व

226

भवत्येवं श्रुताव् अभिधानं प्रवृत्तेः किं सायातीत्यत आह कोऽसौ विचारेति श्रुत्यर्थपर्यालोचनरूपया विद्वद्
द्‌ष्ट्या साक्षिण एव मुख्यमात्मत्वं नेतरस्य पुत्रादेरित्यर्थः विचारदृष्ट्येत्यभिहितस्य विचारस्य स्वरूपमा
ह कोऽयमिति अन्नमयादीन्पंच कोशान्स्वे त्रिरीयश्रुत्युक्तप्रकारेणात्मनः पृथक्कृत्वान्तःस्थि
तस्यात्मनोऽनुभवो विचारणेत्यर्थः ५६ अन्तःस्थितस्य वस्तुनो दृशिं न प्रकारमेवाह जागरे साक्षिणा

कोऽसौ विचारदृष्ट्यायं साक्ष्येवात्मा न चेतरः । कोऽयं ज्ञानं च विविच्यान्तर्वस्तुदृष्टिर्विचारणा ॥ ५६ ॥
जागरस्वप्नसुप्तीनामागमापायभासनं । यतो भवत्यसावात्मा स्वप्रकाशचिदात्मकः ॥ ५७ ॥
द्वेषाः प्राणादिवित्तान्ता आसन्नास्तारतम्यतः । प्रीतिस्तथा तारतम्यात्तेषु सर्वेषु वीक्ष्यते ॥ ५८ ॥

य जा[illegible]गरावस्थानां मध्य उत्तरोत्तरावस्थागमनस्य पूर्वपूर्वावस्थानां निवृत्तेश्चावभासनं यतो
नित्यचैतन्यरूपात्साक्षिणो भवति सः स्वप्रकाशचिद्रूप आत्मेत्यर्थः ५७ संग्रहेणोक्तं श्रुत्यर्थं प्रपंचय
ति द्वेषा इति साक्षिव्यतिरिक्ताः प्राणादिवित्तान्ता वक्ष्यमाणाः पदार्थास्तारतम्येनात्मन आसन्नाः स
प प्रीतिर्वर्तिनो भवंति तत्रोपपत्तिमाह प्रीतिरिति यथा तारतम्येनान्तरत्वं तद्वदेव तेषु प्राणादिष्वतारतम्यात्प्रीतिर्वी

प त

प्रीतेस्तारतम्येनानुभवमेव विशदयति वित्तादिति पिंडमन्नमयो देहः अयंभावः सर्वैः प्राणिभिः पुत्रादि
विपत्परिहाराय वित्तव्ययः क्रियते स्वदेहरक्षणाय कदाचित्पुत्रादिरपि दीयते इंद्रियनाशपरिहाराय यता
उनादिना देहपीडाप्यंगीक्रियते मरणप्रसक्तौ तत्परिहाराय इंद्रियवैकल्यमप्यंगीक्रियते अत एवोत्तरोत्त

वित्तात्पुत्रः प्रियः पुत्रात्पिंडस्तथेंद्रियं इंद्रियाच्च प्रियः प्राणः प्राणादात्मा परः प्रियः ५९।
एवं स्थिते विवादेऽत्र विमूढप्रतिबुद्धयोः ।। श्रुत्योदाहारि तत्रात्मा प्रेयानित्येव निर्णयः ॥६०॥
साक्ष्यवद्भूयादन्यस्मात्प्रेयानित्याह तत्त्ववित् ।। प्रेयान्पुत्रादिरेवेमं भोक्तु साक्षीति
मूढधीः ॥६१॥ आत्मनोऽन्यं प्रियं ब्रूते शिष्यश्च प्रतिवाद्यपि ॥

रमतिशयेन प्रियत्वं सर्वानुभवसिद्धं आत्मनस्तु निरतिशयप्रेमास्पदत्वं विद्वदनुभवसिद्धमि
ति ॥५९॥ एवमात्मनः प्रियतमत्वे प्रमाणसिद्धेऽपि ज्ञान्यज्ञानिनोर्विप्रतिपत्तिनिरसनाय श्रुत्या
तद्विप्रतिपत्तिर्दर्शितेत्याह । एवमिति । तत्र निर्णयमाह । तत्रेति । आत्मनः प्रियतमत्वस्योपपादि
तत्वादित्यर्थः ॥६०॥ तामेव विप्रतिपत्तिमाह । साक्ष्येवेति ॥६१॥ आत्मातिरिक्तस्य प्रियत्वं वा

द्विनो विभज्योत्तराभिधानायत्तमेव वादिनं विभज्य दर्शयति ।। आत्मन इति ५

तयोः शिष्यप्रतिवादिनोः संबंधिनस्तस्य वचनस्य उत्तरं वचः
उत्तराभिधानप्रकारमाह तस्योत्तरमिति तयोः शिष्यप्रतिवादिनोः संबंधिनस्तस्य वचनस्य उत्तरं वचः प्रश्नानन्तरं
प्रस्तुतरूपं वाक्यं क्रमेण बोधशापो बोधं शापं च कुर्यादित्यर्थः ६२ अनयोः प्रतिवचनस्य प्रदानम्
पक्षयोः न्यमात्मनः प्रियं त्वं ब्रूयाः हि परोक्ष्यतीति समनन्तरश्रुतिवाक्यमर्थतः पठति प्रि
यमिति तत्र विशिष्य प्रतिवादिनावुभौ अपि प्रति हे शिष्य हे प्रतिवादिन् प्रियं तदभिप्रेतं पुत्रादिरूपम्

तस्योत्तरं वचो बोधशापौ कुर्यात्तयोः क्रमात् ६२ प्रियं त्वां रोत्स्यतीत्येवमुत्तरं वक्ति तत्त्ववित्
स्वोक्तं प्रियस्य दुष्टत्वं शिष्योऽवैति विवेकतः ६३ अलभ्यमानस्तनयः पितरौ क्लेशयेच्चिरं।
लब्ध्वापि गर्भपातेन प्रसवेन च बाधते ६४ जातस्य ग्रहरोगादिः कुमारस्य च मूर्खता॥

इद
न्नात्रे तत्त्वां शिष्यं प्रतिवादिनं वा रोत्स्यति रोदयिष्यतीत्येवमुक्तेन प्रकारेण उत्तरं प्रतिवचनं वक्ति ब्रवीति
मेकमेव वचनं शिष्यप्रतिवादिनोरुभयोः कथमुत्तरं जातमित्याशंक्य शिष्यप्रश्नोत्तरत्वमुपदेशरूपत्वं ना
वबोधयति स्वोक्तं प्रियस्येत्यादिना वीक्षते तमदं निराभिस्यं तेन साद्धं श्लोकचतुष्टयेन शिष्यः स्वोक्तं प्रिय
स्य खेनाभिहितस्य पुत्रादिरूपस्य प्रीतिविषयस्य विवेकतः वक्ष्यमाणदोषविचारेण दुष्टत्वं वेत्ति अवगच्छति ६३

७

एवं पुत्रगतदोषसंकीर्तनं दारादिसर्वविषयदोषोपलक्षणार्थं ॥५५॥५६॥ एवं विविच्येति। एव
मुक्तेन प्रकारेण पुत्रादिविषयजाते विविच्य विद्यमानान्दोषान्विभज्य ज्ञात्वा तस्मिन्प्रीतिं परित्य
ज्य निजात्मनि प्रत्यग्रूपे साक्षिणि परमां निरतिशयां प्रीतिं निश्चित्य तं प्रत्यगात्मानमहर्निशं
सर्वदा वीक्षते अनुसंधत्ते इत्यर्थः ॥५७॥ प्रियत्वा रोत्स्यतीत्यस्यैव वाक्यस्य प्रतिवादिनं रूप

उपनीतेप्यविद्यत्वमनुद्वाहश्च पंडिते ॥५५॥ यूनश्च परदारादि दारिद्र्यं च कुटुंबिनः ॥ पित्रोर्दुः
खस्य नास्त्यंतो धनी चेन्म्रियते तदा ॥५६॥ एवं विविच्य पुत्रादौ प्रीतिं त्यक्त्वा निजात्मनि ॥
निश्चित्य परमां प्रीतिं वीक्षते तमहर्निशं ॥५७॥ आग्रहाद्ब्रह्मविद्वेषादपि पक्षममुंचतः ॥
वादिनो नरकः प्रोक्तो दोषश्च बहुयोनिषु ॥५८॥

रूपत्वेन प्रकटयति ॥ आग्रहादिति। आग्रहा
दुक्तं पुत्रादि प्रियत्वं सर्वथा न त्यजामीत्येवंरूपाद्ब्रह्मविद्वेषादनेनोक्तं विघटयिष्यामीत्येवंरूपाच्च
पक्षं पुत्रादीनामेव प्रियत्वाभिधानरूपं अपरित्यजतः प्रतिवादिनो नरकप्राप्तिस्तथा बहुयोनि
षु नरतिर्यगादिषु असंख्येषु अनेकेषु जन्मसु दोषः पुत्रभार्यादिषु दुष्टवियोगानिष्टप्राप्तिरूपः

मो॰ सू॰ प्रियत्वं रोत्स्यतीति वक्तात्मानि नेति शेषः ५६

ननु त्वानिनोक्तस्यैकस्यैव वाक्यस्य शिष्यं प्रत्युपदेशरूपत्वं वादिनं प्रत्याप रूपत्वं चेति विरुद्धरूपद्वयं कथं
घटत इत्याशंक्योत्तरप्रदातुरीश्वररूपत्वात्तदभिप्रायानुसारेणोभयं भविष्यतीति मत्वा तदुपपादक
स्य ईश्वरोऽहं तथैव स्यादिति समनंतरवाक्यस्य तात्पर्यमाह ब्रह्मविदिति । यतो ब्रह्मविदः स्वस्य ब्रह्म
त्वानुभवा दीश्वरत्वमस्ति अतस्तेन यं यं शिष्यादिकं प्रति यद्यदिष्टमनिष्टं वाभिधीयते तत्तच्छि

ब्रह्मविद्ब्रह्मरूपत्वादीश्वरस्तेन वर्णितं ॥ यद्यत्तत्तत्तथैव स्यात्तच्छिष्यप्रतिवादिनोः ॥६९॥ यस्तु
साक्षिणमात्मानं सेवते प्रियमुत्तमं ॥ तस्य प्रेयान्स वा आत्मा न नश्यति कदाचन ॥७०॥

ष्यप्रतिवादि
नोस्तस्य ज्ञानिनो यः शिष्योयश्च प्रतिवादी तयोस्तथैव स्यात् इष्टमनिष्टं वा वश्यं भवेदित्यर्थः ॥६९॥
व्यतिरेकमुखेनोक्तस्यार्थस्यान्वयमुखेन प्रतिपादकमात्मानमेव प्रियमुपासीत स य आत्मान
मेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवतीति समनंतरवाक्यमर्थतः पठति ॥ यस्त्विति । तुरु
क्तवैलक्षण्यद्योतनार्थः । अनात्मत्वप्रियत्ववादिनोऽन्यो यः शिष्य आत्मानमेवोत्तमं प्रियं निर
तिशयप्रेमगोचरं सेवते सदानुस्मरति तस्य शिष्यादेः प्रेयान्प्रियत्वेनाभिमतो स वा आत्मा प्रति
वाद्यभिमतप्रियमिव न कदाचिदपि नश्यति ॥ किंतु सदानंदरूपः सन्नवभासत इत्यर्थः ॥७०॥

१३
८५

रस्मात्मनः परप्रेमास्पदत्वहेतुं प्रसाध्येदानीं फलितमाह। परप्रेमास्पदत्वेनेति। अत्रायं प्रयोगः आत्मा परमा
नंदरूपः निरतिशयप्रेमविषयत्वात् यः परानंदरूपो न भवति स निरतिशयप्रेमविषयोऽपि न भवति यथा घ
टादिरिति केवलव्यतिरेकी। पर प्रेमास्पदत्वहेतोरात्मनः परमानंदरूपतासाधने सामर्थ्यद्योतनाय प्री
तिवृद्धौ सुखवृद्धिमुदाहरति। सुखवृद्धिरिति। यतः सार्वभौमादिहैरण्यगर्भांतेषु पदविशेषेषु यत्र यत्र
प्रीतिवृद्धिस्तत्र तत्र सुखाभिवृद्धिरस्तीति तैत्तिरीयबृहदारण्यश्रुत्योरभिहितं अतः प्रीतेः निरतिशयत्वे

परप्रेमास्पदत्वेन परमानंदरूपता॥ सुखवृद्धिः प्रीतिवृद्धौ सार्वभौमादिषु श्रुता॥७१॥ चैतन्यवत्सु
खं चास्य स्वभावश्चेच्चिदात्मनः॥ धीवृत्तिष्वनुवर्तेत सर्वास्वपि चितिर्यथा॥७२॥ मैवमुष्णप्रकाशा
त्मा दीपस्तस्य प्रभा गृहे॥ व्याप्नोति नोष्णता तद्वच्चितेरेवानुवर्तनं॥७३॥ गंधरूपरसस्पर्शेष्वपि स
त्सु यथा पृथक्॥ एकाक्षेणैक एवार्थो गृह्यते नेतरस्तथा॥७४॥ सति आनंदस्यापि निरतिशयत्वमव
गंतुं शक्यत इति भावः॥७१॥ नन्वात्मनः परमानंदरूपत्वमनुपपन्नं तथात्वे चैतन्यस्येव तत्स्वरूपस्यानं
दस्यापि सर्वासु धीवृत्तिष्वनुवृत्तिः प्रसज्येतेति शंकते। चैतन्येति॥७२॥ चिदानंदयोरुभयोरपि आ
त्मस्वरूपत्वेऽपि वृत्तिषु चित एवानुवृत्तिर्नानंदस्येति दृष्टांतावष्टंभेन परिहरति॥ मैवमिति। यथोष्णप्रका
शात्मकस्य दीपस्य प्रकाश एव गृहादावनुगच्छति नोष्णता एवं चैतन्यस्यैवानुवृत्तिर्नानंदस्येत्यर्थः॥७३

ननु चिदानंदयोरभेदे चिदभिव्यंजकधीवृत्तौ वानंदाभिव्यक्तिरपि स्यादित्याशंक्य तथा नियमाभावे दृष्टांतमाह ॥ गंधेति ॥ यथैकद्रव्यवृत्तीनां गंधादीनां चतुर्णां मध्ये घ्राणादिनैकेंद्रियेण गंधादिकेक एव गुणो गृह्यते नेतरः ॥ तथा चिदानंदयोर्मध्ये चित एवावभासनमित्यर्थः ॥७३॥ दृष्टांतदार्ष्टांतिकयोर्वैषम्यं शंकते ॥ चिदानंदाविति ॥ विलक्षणा भिन्ना इत्यर्थः ॥ उक्तं वैलक्षण्यं परिहर्तुं दा ए

गंधरूपरसस्पर्शेष्वपि सत्सु यथा पृथक् ॥ एकाक्षेणैक एवार्थो गृह्यते नेतरस्तथा ॥७४॥
चिदानंदौ नैव भिन्नौ गंधाद्यास्तु विलक्षणाः ॥ इति चेत्तदभेदोपि साक्षिण्यन्यत्र वा वद ॥७५
आद्ये गंधादयोप्येवमभिन्नाः पुष्पवर्तिनः ॥ ७

कोयं चिदानंदयोरभेदः किं स्वाभाविकः उतौपाधिक इति विकल्पयति ॥ तदभेदोपीति ॥ तयोर्भेदः तयोः चिदानंदयोरभेदः एकं साक्षिणि आत्मस्वरूपे वान्यत्र तदुपाधिभूतासु वृत्तिषु वेत्यर्थः ॥७५॥ प्रथमे पक्षे दृष्टांतदार्ष्टांतिकयोः साम्यमाह ॥ आद्ये गंधादय इति ॥ आद्ये चिदानंदयोः साक्षिणि भेदाभाव पक्षे पुष्पवर्तिनो गंधादयोपि चिदानंदवदेवाभिन्नाः परस्परं भेदरहिताः इतरेतरपरिहारेणैकस्यानेतुमशक्यत्वादिति भावः ॥ ७६

णां

न तद्वेदे

द्रुतौ पक्षेपि साम्यमाह भक्ष्येति भक्ष्याणां गंगादिव्याहृक्रौष्ट्राणां दीद्रुपाणां भेदेन तेषां गंगादीनां भेदा
भ्युपगमे तद्द्वेषवृत्तिभेदाच्चिदानंदाभिव्यक्तिहेतूनां राजससात्त्विकवृत्तीनां भेदात्तयोश्चिदानंदयोर्भि
दा भेदो भविष्यतीत्यर्थः ७६ ननु तर्हि चिदानंदयोरैक्यं कुत्रोपलभ्यत इत्याशंक्याह सत्वेति सत्ववृत्तौ भ
क्ष्यकर्मोपस्थापितायां सत्वगुणपरिणामरूपायां बुद्धिवृत्तौ चित्सुखैक्यं चिदानंदयोरैक्यं भासत इति

भक्ष्यभेदेन तद्द्वेषवृत्तिभेदात्तयोर्भिदा ७६ सत्ववृत्तौ चित्सुखैक्यं तद्वृत्तेर्निर्मलत्वतः रजोवृत्तेस्तु
मालिन्यात्सुखांशोत्र तिरस्कृतः ७७ तिंतिणीफलमत्यम्लं लवणेन युतं यदा तदाम्लस्यात्
तिरस्कारादीषदम्लं यथा तथा ७८ ननु प्रियतमप्रसेन परमानंदतात्मनि विवेकुराकृतामेवं वि

नत्रोपपत्तिमाह तद्वृत्तेरिति कुत्र तर्हि भेदावभास इत्यत आह रजोवृत्तेरिति ७७ विद्यमानस्यापि सुखं
स्यातिरस्कारे दृष्टांतमाह तिंतिणीफलमिति यथा तिंतिणीफले लवणयोगाद्रसम्लत्वं तिरोहितं तद्व
द्वृत्तौ वानंदस्य तिरोभाव इत्यर्थः ७८ गृहस्थितिसंधिः शंकते ननु चेति ननु नैन प्रकारेणात्मनः परमानंद
रूपत्वं परप्रेमास्पदत्वहेतुना गौणमिथ्यात्मरूपेभ्यः प्रियोपेक्ष्यद्वेष्येभ्यो विवेकं विविच्यस

गूढाभिसंधिरेवोत्तरमाह। यद्योगेनेति। यथा योगस्यापरोक्षज्ञानहेतुत्वमस्ति एवं विवेकस्यापी
ति गूढोभिसंधिः। इदानीं चोद्यपरिहारयोरुभयोरभिसंधिं प्रकटयति। ज्ञानेति। यथापरोक्षज्ञा
नसाधनत्वेन योगोभिहितः पूर्वस्मिन्नध्याये एवमस्मिन्नध्याये भिहितेन गौणाद्यात्मविवेकद्वा
रा पंचकोशविवेकेनापि ज्ञानमुत्पद्यत एवेत्यर्थः॥८०॥ तत्र किं प्रमाणमित्याशंक्याह। यत्सांख्यै

यद्योगेन तद्देवेति वदाम ज्ञानसिद्धये॥ योगः प्रोक्तो विवेकेन ज्ञानं किं नोपजायते॥८०॥ य
त्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते॥ इति स्मृतं फलैकत्वं योगिनां च विवेकिनां॥८१॥
असाध्यः कस्यचिद्योगः कस्यचित्तत्त्वनिश्चयः॥ इत्थं विचार्य मार्गौ द्वौ जगाद परमेश्वरः

इति॥ सांख्यैरात्मानात्मविवेकिभिर्यत्स्थानं मोक्षरूपं प्राप्यते गम्यते। तद्योगैर्योगिभिरपि
गम्यते प्राप्यत इति वचनेन योगिनां विवेकिनां च फलैकत्वं ज्ञानद्वारा मोक्षलक्षणस्य फलस्यै
कत्वमुक्तमित्यर्थः॥८१॥ ननु विवेकयोगयोरेकमेव चेत्फलं तर्हि अनयोरन्यतरस्यैव युक्तं शा
स्त्रेषु प्रतिपादनं नोभयोरित्याशंक्याधिकारिवैचित्र्यादुक्तमुभयप्रतिपादनमित्यभिप्राये
णाह॥ असाध्य इति॥८२॥

न चात्यंतायाससाध्यस्य योगस्य निरायाससुलभाद्विवेकादतिशयो वक्तव्य इत्याशंक्य सोतिशयः किमप
रोक्षज्ञानजनकत्वादुच्यते उत रागद्वेषनिवृत्तिहेतुत्वादथवाद्वैतानुपलब्धिकारणत्वादिति विकल्प्य प्रथमे
पक्षे फलसाम्यमित्याह योगेकोतिशय इति द्वयोर्विवेकयोगयोरुभयोरपि ज्ञानलक्षणं फलं समम् उक्तं

योगे कोतिशयस्तत्र ज्ञानमुक्तं समं द्वयोः रागद्वेषाद्यभावश्च तुल्यो योगिविवे
किनोः ८३ न प्रीतिर्विषयेष्वस्ति प्रेयानात्मेति जानतः कुतो रागः कुतो द्वेषः
प्रातिकूल्यमपश्यतः ८४

पत्सांख्येरित्यादिना अतस्तत्र योगे कोतिशयः न कोपीत्यर्थः द्वितीयं प्रत्याह रागद्वेषादीति ८३ वि
वेकिनो रागाद्यभावमुपपादयति न प्रीतीति आत्मा प्रियतम इति जानतः पुरुषस्य न तावद्विषयेषु
प्रीतिरस्ति अतो न तेषु रागो जायते रागहेतोरानुकूल्यज्ञानस्याभावात् नापि द्वेषः तद्धेतोः प्रातिकूल्यस्य

व्यवहा

ननु विवेकिनो [illegible] दशायां देहाद्युपद्रवकारिषु द्वेषो दृश्यत इ[illegible]त्याशंक्य योगिविवेकिनोः स तुल्य इति परिहरति। देहादेरिति। प्रतिकूलेषु वृश्चिकादिषु द्वेषकर्तुस्तदा योगित्वमेव नाभ्युपगम्यते चेत्तर्हि तादृशस्य विवेकित्वमपि नाभ्युपगच्छाम इत्याह। द्वेषमिति। तादृशो द्वेषकर्ता चेदविवेक्यपि विवेकवानपि न भवतीत्यर्थः॥ ८५॥ ननु विवेकिनो द्वैतदर्शनमस्ति योगिनस्तु तन्नास्तीति तत्राह।

देहादेः प्रतिकूलेषु द्वेषस्तुल्यो द्वयोरपि॥ द्वेषं कुर्वन्नयोगी चेदविवेक्यपि तादृशः॥ ८५

द्वैतस्य प्रतिभानं तु व्यवहारे द्वयोः समं॥ समाधौ नेति चेत्तद्वन्नाद्वैतत्वविवेकिनः॥ ८६

येविकल्पयोगिनो निराशयो भविष्यतीत्याशंक्य विवेकिनस्तु द्वैतदर्शनं किं व्यवहारदशायामुच्यते उतान्यदेति विकल्प्याद्ये तद्योगिनोपि समानमित्याह। द्वैतस्येति। द्वितीयमाशंकते। समाधाविति। योगिनः समाधिकाले द्वैतदर्शनं नास्तीत्युच्यते चेदित्यध्याहारः। तर्हि विवेकिनोपि विवेकदशायां द्वैतादर्शनं तुल्यमिति परिहरति। तद्वदिति। योगिनः समाधिदशायामिवाद्वैतत्वविवेकिनोऽद्वैततत्त्वमिति श्रुतियुक्तिभ्यो विवेचनं कुर्वतोपि तस्मिन्काले द्वैतदर्शनं नास्ती

पंचदशी

कथं तस्याद्वरसारंक्योपरितनेऽध्यायेतदुपपादयिष्यतइत्याह विवक्ष्यतेइति उक्तमर्थं निगमयति
सर्वमपीति ८७ ननुद्वैतादर्शनसाहित्तात्मदर्शी नवत्तो योगितमेव भविष्यतीति शंकते सदाप

विवक्ष्यते तदस्माभिरद्वैतानंदनामके अध्याये हि तृतीये तत्सर्वमप्यतिमंगलं ८७
सदा पश्यन्निजानंदमपश्यन्निखिलं जगत् अर्थाद्योगीतिचेत्तर्हि संतुष्टो वर्द्धतां भवान् ८८
ब्रह्मानंदाभिधे ग्रंथे मंदानुग्रहसिद्धये द्वितीयेध्यायएतस्मिन्नात्मानंदो विवेचितः ८९

स्यानिति रूपापसापरिहरति तद्युति अध्यायतात्पर्यं संक्षिप्य दर्शयति ब्रह्मानंदेति ८९ श्रीरामार्पण॰
इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृष्णाख्यविदुषा
विरचिते ब्रह्मानंदे आत्मानंदो नाम द्वितीयोध्यायः॥ प्रकरण १२ ७॥ सांबसदाशिव ॥७॥ ७॥

[OrderDescription]
,CREATED=01.07.20 11:50
,TRANSFERRED=2020/07/01 at 13:22:16
,PAGES=238
,TYPE=STD
,NAME=S0003240
,Book Name=M-1784-PANCHDASHI STIK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF

FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,